॥ श्री गणेशाय नमः ॥

श्रीमद्वामन-जयादित्यविरचिता
पाणिनीयाष्टाध्यायीसूत्रवृत्तिः

काशिका-१

(प्रथम-द्वितीयाध्यायौ)



प्रधानसम्पादकः

आचार्य राधावल्लभत्रिपाठी,

कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्

सम्पादकमण्डलिः

निर्देशकः- आचार्य रामानुजदेवनाथः

डा. सि. एस्. एस्. नरसिंहमूर्तिः

डा. चन्द्रशेखरभट्टः

श्री सि.हेच्. कृष्णानन्तपद्मनाभः

डा. मधुकेश्वरभट्टः

कु. सुगुण एन्.

विषयानुक्रमणिका

क्र.सं	विषयाः	सूत्राङ्काः
०१	प्रत्याहारप्रकरणम्	मा.सू. १-१४
प्रथमाध्याये		
	प्रथमे पादे	
०२	वृद्ध्यादिसंज्ञाप्रकरणम्	१.१.१
०३	प्रगृह्यसंज्ञाप्रकरणम्	१.१.११
०४	ध्वादिसंज्ञाप्रकरणम्	१.१.२०
०५	सर्वनामसंज्ञाप्रकरणम्	१.१.२७
०६	अव्ययसंज्ञाप्रकरणम्	१.१.३७
०७	सर्वनामस्थानसंज्ञा	१.१.४२
०८	विभाषासंज्ञा	१.१.४४
०९	सम्प्रसारणम्	१.१.४५
१०	टित्कित्मितः	१.१.४६
११	आदेशनियमाः	१.१.४८
१२	स्थानिवद्भावप्रकरणम्	१.१.५६
१३	लोपसंज्ञादिप्रकरणम्	१.१.६०
१४	टि-उपधासंज्ञे	१.१.६४
१५	ग्रहणकशास्त्रप्रकरणम्	१.१.६८
१६	वृद्धसंज्ञाप्रकरणम्	१.१.७३
	द्वितीये पादे	
१७	ङित्प्रकरणम्	१.२.१
१८	कित्प्रकरणम्	१.२.५
१९	ह्रस्वदीर्घप्लुतसंज्ञाः	१.२.२७
२०	उदात्तादिसंज्ञाः	१.२.२९
२१	एकश्रुतिविधयः	१.२.३३
२२	प्रतिपदिकप्रकरणम्	१.२.४५
२३	संख्यातिदेशप्रकरणम्	१.२.५१

क्र.सं	विषयाः	सूत्राङ्काः
२४	एकशेषप्रकरणम्	१.२.६४
	तृतीये पादे	
२५	धातु-संज्ञा	१.३.१
२६	इत्संज्ञाप्रकरणम्	१.३.२
२७	आत्मनेपदप्रकरणम्	१.३.१२
२८	उभयपदप्रकरणम्	१.३.७२
२९	परस्मैपदप्रकरणम्	१.३.७८
	चतुर्थे पादे	
३०	नदीसंज्ञाप्रकरणम्	१.४.३
३१	घिसंज्ञादिप्रकरणम्	१.४.७
३२	लघुगुरुदीर्घसंज्ञाः	१.४.१०
३३	पदसंज्ञाप्रकरणम्	१.४.१४
३४	भसंज्ञाप्रकरणम्	१.४.१८
३५	वचनसंज्ञाप्रकरणम्	१.४.२१
३६	कारकसंज्ञाप्रकरणम्	१.४.२३
३७	निपातसंज्ञाप्रकरणम्	१.४.५६
३८	गतिसंज्ञाप्रकरणम्	१.४.६०
३९	कर्मप्रवचनीयसंज्ञाप्रकरणम्	१.४.८३
४०	लादेशप्रकरणम्	१.४.९९
४१	उत्तमपुरुषादिसंज्ञाः	१.४.१०५
४२	संहितावसानसंज्ञे	१.४.१०९
द्वितीयाध्याये		
	प्रथमे पादे	
४३	समासप्रकरणम्	२.१.१
४४	अव्ययीभावप्रकरणम्	२.१.५
४५	तत्पुरुशप्रकरणम्	२.१.२२
४६	(द्विगुः)	२.१.२३
४७	(कर्मधारयः)	२.१.४७

क्र.सं	विषयाः	सूत्राङ्काः
	द्वितीये पादे	
४८	बहुव्रीहिप्रकरणम्	२.२.२३
४९	द्वन्द्वप्रकरणम्	२.२.२९
५०	पूर्वनिपातप्रकरणम्	२.२.३०
	तृतीये पादे	
५१	विभक्तिप्रकरणम्	२.३.१
	चतुर्थे पादे	
५२	एकवद्भावप्रकरणम्	२.४.१
५३	लिङ्गप्रकरणम्	२.४.१७
५४	अन्वादेशप्रकरणम्	२.४.३२
५५	आर्धधातुकोद्देश्यकविधयः	२.४.३५
५६	लुक्प्रकरणम्	२.४.५८
५७	लुडादेशाः	२.४.८५

******

॥ श्री गणेशाय नमः ॥

पाणिनीयाष्टाध्यायीसूत्रवृत्तिः

काशिका

अथ प्रत्याहाराः

वृत्तौ भाष्ये तथा धातुनामपारायणादिषु ।
विप्रकीर्णस्य तन्त्रस्य क्रियते सारसंग्रहः ॥ १॥
इष्ट्युपसंख्यानवती शुद्धगणा विवृतगूढसूत्रार्था ।
व्युत्पन्नरुपसिद्धिर्वृत्तिरियं 'काशिका' नाम ॥ २॥
व्याकरणस्य शरीरं परिनिष्ठितशास्त्रकृत्य मेतावत् ।
शिष्टः परिकरबन्धः क्रियतेऽस्य ग्रन्थकारेण ॥ ३॥

अथ शब्दानुशासनम् ॥ (म. भा. १.१)
केषां शब्दानाम्? लौकिकानां वैदिकानां च । (म. भा.)

कथमनुशासनम्? प्रकृत्यादिविभागकल्पनया सामान्यविशेषवता लक्षणेन॥ (म.भा.)

प्रत्याहारप्रकरणम्

अथ किमर्थो वर्णानामुपदेशः? प्रत्याहारार्थः । प्रत्याहारो लाघवेन शास्त्रप्रवृत्त्यर्थः॥ (म. भा.)

अ इ उ ण् ॥ मा. सू १ ॥

'अ इ उ' इत्यनेन क्रमेण वर्णानुपदिश्यन्ते णकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवत्येकेन ।

'उरण् रपर;' (१.१.५१) इत्यकारेण ।

ह्रस्वमवर्णं प्रयोगे संवृतम् । दीर्घप्लुतयोस्तु विवृतत्वम् । तेषां सावर्ण्यप्रसिध्यर्थमकार इह शास्त्रे विवृतः प्रतिज्ञायते ।

तस्य प्रयोगार्थम् 'अ अ' (८. ४. ६६) इति शास्त्रान्ते प्रत्यापत्तिः करिष्यते ॥ (म. भा. पस्पशा.)

ऋ लृ क् ॥ मा. सूं २ ॥

ऋ लृ इत्येतौ वर्णावुपदिश्य पुर्वश्चान्ते ककारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति त्रिभिः- अकः सवर्णे दीर्घः (६. १. १०१) इत्यकारेण, इको गुणवृद्धी (१. १. ६) इतीकारेण, उगितश्च (४. १. ५) इत्युकारेण ।

अकारादयो वर्णाः प्रचुरप्रयोगविषयास्तेषां सुज्ञानमुपदेशे प्रयोजनम् । लृकारस्तु क्लृपिस्थ एव प्रयुज्यते । क्लृपेश्च ' पूर्वत्रासिद्धम्' (७. २. १) इति लत्वमसिद्धम्, तस्यासिद्धत्वाद् ऋकार एव अच्कार्याणि भविष्यन्तीति किमर्थम् लृकार उपदिश्यते?
लत्वविधानाद् यानि पराण्यच्कार्याणि ताति लृकारे यथा स्युरिति । कानि पुनस्तानि ? (१) प्लुतः, (२) स्वरितः, (३) द्विर्वचनम् - क्लृ३प्तशिखः, प्रक्लृप्तः

१, क्लृप्प्तवान् इति ।

यच्चाशक्तिजमसाधुशब्दरुपं, तदनुकरणस्यापि साधुत्वमिष्यते । तत्स्थस्यापि लृकारस्याच्कार्यप्रतिपत्त्यर्थम् लृकारोपदेशः क्रियते । ' ऋतकः' इति प्रयोक्तव्ये शक्तितवैकल्यात् कुमारी ' लृतक' इति प्रयुङ्क्ते तदन्योऽनुकरोति - कुमार्यृतक
इत्याह- इति ॥

ए ओ ङ् ॥ मा. सू. ३ ॥

'ए ओ' इत्येतौ वर्णावुपदिश्य अन्ते ङकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवत्येकेन- एङि पररुपम् (६. १. ९४) इत्येकारेण ।

ऐ औ च् ॥ मा. सू. ४ ॥

'ऐ औ' इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते चकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति चतुर्भिः-'अचः परस्मिन् पूर्वविधौ' (१. १. ५७) इत्यकारेण, ' इच एकाचोऽम्प्रत्ययवच्च' (६. ६. ६७) इति इकारेण, ' एचोऽयवायावः' (६. १. ७८) इति एकारेण, 'वृद्धिरादैच्' (१. १. १) इति ऐकारेण ।

प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न ।

आचारादप्रधानत्वाल्लोपश्च बलवत्तरः ॥ (म. भा. प. १३६ श्लो. वा. १)

वर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयस्तेषु तत्कार्यं न भवति ।

'तच्छायानुकारिणो हि ते, न पुनस्त एव । पृथक् प्रयत्ननिर्वर्त्यं हि वर्णमिच्छन्त्याचार्याः। 'नुड्विधिलादेशविनामेषु ऋकारे प्रतिविधातव्यम्' (म.भा., माहेश्वरसूत्र १,

वा. ५) नुड्विधौ (८. ४. ८१) ऋकारग्रहणम् - आनृधतुः, आनृधुः । लादेशे (८. २. १८) ऋकारग्रहणम्- क्लृप्तः, क्लृप्तवान् । विनामे (८.४.१) ऋकारग्रहणम्। - कर्तॄणाम् ।

ह य व र ट् ॥ मा. सू. ५ ॥

ह य व र इत्येतान् वर्णानुपदिश्य पूर्वाश्चान्ते टकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवत्येकेन - ' शश्छोऽटि' (८. ४. ६३) इत्यकारेण ।

अयं रेफो यकारात् पर उपदिश्यते । तस्य यर्ग्रहणेन यय्ग्रहणेन च ग्रहणे सति स्वर्नयति प्रातर्नयतीत्यत्र ' यरोऽनुनासिकेऽनुनासिको वा' (८. ४. ४५) इति अनुनासिकः प्राप्नोति मद्रह्रदो भद्रह्रद इत्यत्र द्विर्वचनं प्राप्नोति ' अचो रहाभ्यां द्वे' (८. ४. ४६) इति ।

कुण्डं रथेन, वनं रथेनेत्यत्र (म. भा. प. १२५) ' अनुस्वारस्य ययि परसवर्णः' (८.४.५८) इति परसवर्णः प्राप्नोति, नैष दोषः; आकृतौ पदार्थे समुदाये 'सकृल्लक्ष्ये लक्षणं प्रवर्तते' भाष्यप्रदी० ८०.३ । इत्येतस्मिन् दर्शने 'यरोऽनुनासिकेऽनुनासिको वा' (८. ४. ४५) अन्तरतमो भवतीत्येवमेतत्प्रवर्त्तते । तदनेन गकारादीनां ङकारादयो ये यथास्वं स्थानतो गुणतश्चान्तरतमाः ते सर्वे विहिताः । ये तु न स्थानतः, नापि गुणतः स्थानमात्रेण गुणमात्रेण वा अन्तरतमास्ते सर्वे निवर्तिता इति स्थानमात्रान्तरतमो रेफस्य णकारो न भवति । द्विर्वचनेऽपि रेफस्य यरन्तर्भावे सति यत्कार्यं प्राप्तम्, तत्साक्षाच्छिष्टेन निमित्तभावेन बाध्यत इति न द्विरुच्यते रेफः। 'अनुस्वारस्य ययि परसवर्णः' (८. ४. ५८) इत्येतदप्यनुस्वारान्तरतमं सकृदेव परसवर्णं विदधाति । न च रेफस्यानुस्वरान्तरतमः सवर्णोऽस्तीति न भविष्यति-कुण्डं रथेन, वनं रथेनेत्यत्र । अटां मध्ये विसर्जनीयजिह्वामूलीयोपध्मानीयानामप्युपदेशः कर्तव्यः । किं प्रयोजनम्? उर;केण, उरःकेणः उर;पेण उरःपेण अत्र ' अड्व्यवाये' (८. ४. २) इति णत्वं यथा स्यादिति ॥

ल ण् ॥ मा. सू. ६ ॥

'ल' इत्येकं वर्णमुपदिश्य पूर्वाश्चान्ते णकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति त्रिभिः- 'अणुदित्सवर्णस्य चाप्रत्ययः' (१. १. ६९) इत्यकारेण, 'इण्कोः' (८.३.५८) इतीकारेण, 'इको यणचि' (६.१.८८) इति यकारेण । इण्ग्रहणानि सर्वाणि परेण णकारेण । अण्ग्रहणानि तु पूर्वण; 'अणुदित्सवर्णस्य चाप्रत्ययः' (१.१.६९) इत्येतदेवैकं परेण । अथ किमर्थमज्ग्रहणमेवैतन्न क्रियते ? नैवं शक्यम्; अन्तःस्थानामपि हि सवर्णानां ग्रहणमिष्यते - सयँ यँ यन्ता, सवँ वँ वत्सरः, यलँ लँ लोकम्, तलँ लँ लोकमित्यत्रानुस्वरस्यानुनासिके ययि परसवर्णे कृते (८.४.५८) तस्य यर्ग्रहणेन ग्रहणाद् द्विर्वचनं (८.४.४८) यथा स्यादिति । हकारादिष्वकार उच्चरणार्थः, नानुबन्धः । लकारे त्वनुनासिकः प्रतिज्ञायते, तेन 'उरण् रपरः' (१.१.५१) इत्यत्र प्रत्याहारग्रहणाल्लपरत्वमपि भवति ॥

ञ म ङ ण न म् ॥ मा. सू. ७ ॥

'ञ म ङ ण न' इत्येतान् वर्णानुपदिश्य पूर्वाश्चान्ते मकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति त्रिभिः- 'पुमः खय्यम्परे' (८.३.६) इत्यकारेण, 'हलो यमां यमि लोपः' (८.४.६४) इति यकारेण 'ङमो ह्रस्वादचि ङमुण् नित्यम्' (८.३.३२) इति ङकारेण । 'ञमन्ताड्डः' (उ. सू. १.१११) उतु ञकारेणापि ग्रहणमस्य दृश्यते ।

केचित्तु सर्वाण्येतानि प्रत्याहारग्रहणानि ञकारेण भवन्त्विति मकारमनुबन्धं प्रत्याचक्षते; तथा च सति 'ङमो ह्रस्वादचि ङमुण् नित्यम्' (८.३.३२) इत्यत्रागमिनोर्झभोरभावादागमाभावप्रतिपत्तौ प्रतिपत्तिगौरवं भवति ॥

झ भ ञ् ॥ मा. सू. ८ ॥

' झ भ' इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते ञकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवत्येकेन - अतो दीर्घो यञि (८.३.१०१) इति यकारेण ॥

घ ढ ध ष् ॥ मा. सू. ९ ॥

'घ ढ ध' इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते षकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति द्वाभ्याम् - ' एकाचो बशो भष् झषन्तस्य स्ध्वोः' (८.२.३७)

इति भकारझकाराभ्याम् ॥

ज ब ग ड द श् ॥ मा. सू. १० ॥

' ज ब ग ड द ' इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते शकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति षड्भिः- ' भोभगोअघोअपूर्वस्य योऽशि ' (८.३.१७) इत्यकारेण, ' हशि च ' (६.१.११४) इति हकारेण, ' नेड्वशि कृति ' (७.२.८) इति वकारेण ' झलां जश् झशि ' (८.४.५३) इति जकरझकाराभ्याम् ' एकाचो बशो भष् झषन्तस्य स्ध्वोः' (८.२.३७) इति बकारेण ॥

ख फ छ ठ थ च ट त व् ॥ मा. सू. ११ ॥

'ख फ छ ठ थ च ट त' इत्येतान् वर्णानुपदिश्यान्ते वकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवत्येकेन नश्छव्यप्रशान् (८.३.७) इति छकारेण ।

ख-फग्रहणमुत्तरार्थम् ॥

क प य् ॥ मा. स. १२ ॥

'क प' इत्येतौ वर्णावुपदिश्य पुर्वांश्चान्ते यकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति चतुर्भिः- 'अनुस्वारस्य ययि परसवर्णः' (८.४.५८) इति यकारेण, 'मय उञो वो वा' (८.३.३३) इति मकारेण, ' झयो होऽन्यतरस्याम्' (८.४.६२) इति झकारेण,' पुमः खय्यम्परे' (८.३.६) इति खकारेण ॥

श ष स र् ॥ मा. सू. १३ ॥

'श ष स' इत्येतान् वर्णानुपदिश्य पुर्वांश्चान्ते रेफमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति पञ्चभिः 'यरोऽनुनासिकेऽनुनासिको वा' (८.४.४५) इति यकारेण, 'झरो झरि सवर्णे' (८.४.६५) इति झकारेण, 'खरि च' (८.४.५५) इति खकारेण 'अभ्यासे चर्च' (८.४.५४) इति चकारेण,' शर्पूर्वाः खयः' (७.४.६१) इति शकारेण ॥

ह ल् ॥ मा. सू. १४॥

'ह' इत्येकं वर्णमुपदिश्य पूर्वांश्चान्ते लकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति षड्भिः- 'अलोऽन्त्यात् पूर्व उपधा' (१.१.६५) इति अकारेण, 'हलोऽनन्तराः संयोगः' (१.१.७) इति हकारेण, 'लोपोव्योर्वलि' (६.१.६६) इति वकारेण, 'रलो व्युपधाद्धलादेः संश्च' (१.२.२६) इति रेफेण; 'झलो झलि' (८.२.२६) इति झकारेण 'शल इगुपधादनिटः क्सः' (३.१.४५) इति शकारेण ।

अथ किमर्थमुपदिष्टोऽपि हकारः पुनरुपदिश्यते ? कित्त्वविकल्प-क्स-इड्विधयो यथा स्युरिति । स्निहित्वा, स्नेहित्वेत्यत्र ' रलो व्युपधाद्धलादेः संश्च' (१.२.२६) इति कित्त्वं वा यथा स्यात् लिहेरलिक्षदिति ' शल इगुपधादनिटः क्सः' (३.१.४५) इति क्सो यथा स्यात् । रुदिहि, स्वपिहीति वलादिलक्षण इड् यथा (७.२.७६) स्यात् । अदाग्धाम् । झल्ग्रहणेषु च (८.२.२६) हकारस्य ग्रहणं यथा स्यात् ।

यद्येवम्; ह य व र ट् इत्यत्र तर्हि किमर्थमुपदिश्यते ? महाँ हि सः; देवा हसन्तीत्यत्राड्ग्रहणेषु (८.३.३) चाश्ग्रहणेषु (८.३.२२) च हकारस्य ग्रहणं यथा स्यात्। ' हशि च' इति हकारस्य ग्रहणं यथा स्यात् । ब्राह्मणो हसति - ' हशि च' (६.१.११४) इत्युत्वं यथा स्यात्।

एकस्मान् ङञणवटाः द्वाभ्यां षः; त्रिभ्य एव कणमाः स्युः ।

ञेयौ चयौ चतुर्भ्यो, रः पञ्चभ्यः, शलौ षड्भ्यः ॥ इति ।

॥ इति प्रत्याहारप्रकरणम् ॥

अथ प्रथमाध्याये

प्रथमः पादः

१. वृद्धिरादैच् ॥ १ ॥ (१६)

'वृद्धि'- शब्दः संज्ञात्वेन विधीयते प्रत्येकमादैचां वर्णानां सामान्येन तद्धावितानाम्, अतद्धावितानाञ्च ।

तपकरणमैजर्थम् - 'तादपि परस्तपरः' इति, खट्वैडकादिषु त्रिमात्रचतुर्मात्रप्रसङ्गनिवृत्तये । आश्वालायनः । औतिकायनः। औपगवः । औपमन्यवः। शालीयः। मालीयः।

वृद्धिप्रदेशाः- 'सिचि वृद्धिः परस्मैपदेषु' (७.२.१) इत्येवमादयः ॥

२. अदेङ् गुणः ॥ २॥ (१७)

'गुण' शब्दः संज्ञात्वेन विधीयते प्रत्येकमदेङां वर्णानां सामान्येन तद्भावितानाम्, अतद्भावितानां च । तपरकरणं त्विह सर्वार्थम् । तरिता । चेता । स्तोता । पचन्ति । जयन्ति। अहं पचे । गुणप्रदेशाः - 'मिदेर्गुणः' (७.३.८२) इत्येवमादयः ॥

३. इको गुणवृद्धी ॥ ३ ॥ (३४)

परिभाषेयं स्थानिनियमार्था । अनियमप्रसङ्गे नियमो विधीयते । वृद्धिगुणौ स्वसंज्ञया शिष्यमाणौ इक एव स्थाने वेदितव्यौ । वक्ष्यति 'सार्वधातुकार्धधातुकयोः' (७.३.८४) अङ्गस्य गुण इति । स इक एव स्थाने वेदितव्यः । तरति । नयति । भवति ।

वृद्धिः खल्वपि - अकार्षीत् । अहार्षीत् । अचैषीत् । अनैषीत् । अलावीत्। अशावीत् । गुणवृद्धी स्वसंज्ञया विधीयेते, तत्र 'इकः' इति एतदुपस्थितं द्रष्टव्यम्। किं कृतं भवति ? द्वितीयया षष्ठी प्रादुर्भाव्यते । (१.४६ मिदिमृजिपुगन्तलघूपधच्छिदृशिक्षिप्रक्षुद्रेष्वङ्गेन इग् विशेष्यते (म. भा. १.१.३ वा. ३ पृ. १८२) । जुसि सार्वधातुकादिगुणेषु इकाङ्गं विशेष्यते। मेद्यते । अबिभयुः।

इकः इति किम् ? आत्सन्ध्यक्षरव्यञ्जनानां मा भूत् । (म. भा. १.१.३ वा.१) यानम् । ग्लायति । उम्भिता । पुनर्गुणवृद्धिग्रहणं स्वसंज्ञया विधाने नियमार्थम् ।

इह मा भूत् - द्यौः। पन्थाः । सः । इममिति ॥ (म. भा. पृ. १७७)

४. न धातुलोप आर्धधातुके ॥ ४॥ (२६५६)

धात्वेकदेशो धातुः, तस्य लोपो यस्मिन्नार्धधातुके तदार्धधातुकं धातुलोपं, तत्र ये गुणवृद्धी प्राप्नुतः ते न भवतः । लोलुवः, पोपुवः, मरीमृजः। (म. भा.) लोलूयादिभ्यो यङन्तेभ्यः पचाद्यचि (३.१.१३४) विहिते 'यङोऽचि च' (२.४.७४) इति यङो लुकि कृते तमेवाचमाश्रित्य ये गुणवृद्धी प्राप्ते तयोः प्रतिषेधः ।

धातुग्रहणं किम्? लूञ्-लविता । (धा. पा. १४८३) रेडसि । (वा. सं. ६.१८) पर्णं नवेः । (ऋ ४.४०३) अनुबन्धप्रत्ययलोपे मा भूत् । रिषेर्हिंसार्थस्य (धा. पा. ६९४) विच्प्रत्ययलोप उदाहरणं रेडिति (वा. सं. ६.१८) ।

आर्धधातुके इति किम्? त्रिधा बद्धो वृषभो रोरवीति (ऋ ४.५.८३) । सार्वधातुके मा भूत्। इक इत्येव-अभाजि, रागः॥ बहुव्रीहिसमाश्रयणं किम्? क्नोपयति, प्रेद्धम् ।

५. क्ङिति च ॥ ५॥ (२२१७)

निमित्तसप्तम्येषा । क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतः ते न भवतः (म. भा.)। चितः, चितवान् । स्तुतः स्तुतवान् । भिन्नः, भिन्नवान् । मृष्टः, मृष्टवान् ङिति खल्वपि-चिनुतः, चिन्वन्ति । मृष्टः, मृजन्ति । गकारोऽप्यत्र चर्त्वभूतो निर्दिश्यते । 'ग्लाजिस्थश्च ग्स्नुः'-(३.२.१३९) । जिष्णुः, भूष्णुः । इकः इत्येव कामयते, लैगवायनः (म० भा०)। मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यते (म. भा. १.४८)। संक्रमो नाम गुणवृद्धिप्रतिषेधविषयः । परिमृजन्ति, परिमार्ज्जन्ति; परिमृजन्तु, परिमार्ज्जन्तु। लघूपधगुणस्याप्यत्र प्रतिषेधः। अचिनवम्, असुनवमित्यादौ लकारस्य सत्यपि ङित्त्वे यासुटो ङिद्वचनं ज्ञापकम् - ' ङिति यत्कार्यं तल्लकारे ङिति न भवति' इति ॥

६. दीधीवेवीटाम् ॥ ६॥ (२१९०)

दीधीवेव्योरिटश्च ये गुणवृद्धी प्राप्नुतः ते न भवतः । आदीध्यनम्, आदीध्यकः। आवेव्यनम्, आवेव्यकः इटः खल्वपि कणिता श्वः, रणिता श्वः । वृद्धिरिटो न सम्भवतीति लघूपधगुणस्यात्र प्रतिषेधः ॥

७. हलोऽनन्तराः संयोगः ॥ ७॥ (३०)

भिन्नजातीयैरज्भिरव्यवहिताः श्लिष्टोच्चारिता हलः संयोगसंज्ञा भवन्ति । समुदायः संज्ञी। जातौ चेदं बहुवचनम्, तेन द्वयोर्बहूनां च संयोगसंज्ञा सिद्धा भवति। अग्निरिति ग-नौ । अश्वः इति श-वौ । कर्ण इति र-णौ । इन्द्रश्चन्द्रो मन्द्रः इति न-द-राः । उष्ट्रो राष्ट्रं भ्रष्ट्रमिति ष-ट-राः। तिलान्स्त्र्यावपतीति न-स-त-र-याः, न-त-स-त-र-या वा ।

हल इति किम् ? तितउच्छत्रम् (नि. ४.९.१०)। 'संयोगान्तस्य लोपः' (८.२.२३) इति लोपः स्यात् । अनन्तरा इति किम्? पचति पनसम् । ' स्कोः संयोगाद्योरन्ते च' (८.२.२९) इति लोपः स्यात् । संयोगप्रदेशाः - ' संयोगान्तस्य लोपः' (८.२.२३) इत्येवमादयः ॥

८. मुखनासिकावचनोऽनुनासिकः ॥ ८ ॥ (९)

मुखसहिता नासिका मुखनासिका, तया य उच्चार्यते वर्णः सोऽनुनासिकसंज्ञो भवति । 'आडोऽनुनासिकश्छन्दसि' - (६.१.१२६) ' अभ्र आँ अपः', (ऋ ५.४८.१) ' गभीर आँ उग्रपुत्रे' (ऋ. ८.६७.११) च न आँ इन्द्रः।

मुखग्रहणं किम्? अनुस्वारस्यैव हि स्यात् । नासिकाग्रहणं किम्? कचटतपानां मा भूत्। अनुनासिकप्रदेशाः- ''आडोऽनुनासिकश्छन्दसि'' (६.१.१२६) इत्येवमादयः ।

९. तुल्यास्यप्रयत्नं सवर्णम् ॥ ९॥ (१०)

'तुल्य' शब्दः सदृशपर्यायः, आस्ये भवमास्यं - ताल्वादिस्थानम्, प्रयतनं-प्रयत्नः- स्पृष्टतादिर्वर्णगुणः। तुल्य आस्ये प्रयत्नो यस्य वर्णस्य येन वर्णेन सह, स समानजातीयं प्रति सवर्णसंज्ञो भवति । चत्वार आभ्यन्तराः प्रयत्नाः सवर्णसंज्ञायामाश्रीयन्ते-स्पृष्टता, ईषत्स्पृष्टता, संवृतता, विवृतता चेति ।

'अ अ अ' इति त्रयोऽकारा उदात्तानुदात्तस्वरिताः प्रत्येकं सानुनासिका निरनुनासिकाश्च ह्रस्वदीर्घप्लुतभेदादष्टादशधा भिद्यन्ते । तथा इवर्णः, तथा उवर्णः, तथा ऋवर्णः। लृवर्णस्य दीर्घा न सन्ति (आपि. शि. ६.४) तं द्वादशप्रभेदमाचक्षते। सन्ध्यक्षराणां ह्रस्वा न सन्ति, तान्यपि द्वादशप्रभेदानि । अन्तःस्था द्विप्रभेदाः, रेफवर्जिता यवलाः सानुनासिका निरनुनासिकाश्च । रेफोष्मणां सवर्णा न सन्ति ।

'वर्ग्यो वर्ग्येण सवर्णः' (आपि. शि. ६.११) । दण्डाग्रम् । खट्वाग्रम् ।

आस्यग्रहणं किम्? कचटतपानां भिन्नस्थानानां तुल्यप्रयत्नानां मा भूत् । किं च स्यात्? तप्ता तप्तुमित्यत्र "झरो झरि सवर्णे"(८.४.६५) इति पकारस्य तकारे लोपः स्यात् ।

प्रयत्नग्रहणं किम्? इचुयशानां तुल्यस्थानानां भिन्नजातीयानां माभूत् । किं च स्यात् ? अरुश्च्योततीत्यत्र झरो झरि सवर्णे (८.४.६५) इति शकारस्य चकारे लोपः स्यात् ॥ ऋकारलृकारयोः सवर्णसंज्ञा वक्तव्या (म. भा. १.१.९ वा. ६) । होत्लृकारः। होतृकारः । उभयोऋवर्णस्य लृवर्णस्य चान्तरतमः सवर्णो दीर्घो नास्तीति ऋकार एव दीर्घो भवति । सवर्णप्रदेशाः अकः सवर्णे दीर्घः (६.१.१०१) इत्येवमादयः ॥

१०. नाऽज्झलौ ॥ १०॥ (१३)

अच्च हल् च, अज्झलौ । तुल्यास्यप्रयत्नावपि अज्झलौ परस्परं सवर्णसंज्ञौ न भवतः । अवर्णहकारौ-दण्डहस्तः । इवर्णशकारौ-दधिशीतम्, सवर्णदीर्घत्वं न भवति । वैपाशो मत्स्यः, आनडुहं चर्मेति 'यस्येति च' (६.४.१४८) इति लोपो न भवति ॥

११. ईदूदेद्द्विवचनं प्रगृह्यम् ॥ ११॥ (१००)

ईद्, ऊद्, एद् इत्येवमन्तं द्विवचनं शब्दरूपं प्रगृह्यसंज्ञं भवति । अग्नी इति। वायू इति । माले इति । पचेते इति । यजेते इति ।

ईदूदेदिति किम्? वृक्षावत्र । प्लक्षावत्र । द्विवचनमिति किम्? कुमार्यत्र । किशोर्यत्र । तपरकरणमसन्देहार्थम् ।

प्रगृह्यप्रदेशाः- ' प्लुतप्रगृह्या अचि नित्यम् ' (६.१.१२५) इत्येवमादयः । ईदादीनां प्रगृह्यत्वे मणीवादीनां प्रतिषेधो वक्तव्यः ।

मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम ॥ (महाभारत १२.१७२.१२) दम्पतीव, (ऋ. २.३९.२) जम्पतीव, रोदसीव ॥

१२. अदसो मात् ॥ १२॥ (१०१)

अदसः संबन्धी यो मकारस्तस्मात्परे ईदूदेतः प्रगृह्यसंज्ञा भवन्ति । अमी अत्र । अमी आसाते । अमू अत्र । अमू आसाते । एकारस्य नास्त्युदाहरणम् ।

अदस इति किम् ? शम्यत्र । दाडिम्यत्र । मादिति किम् ? अमुकेऽत्र ॥

१३. शे ॥ १३॥ (१०३)

'शे' इत्येतत्प्रगृह्यसंज्ञं भवति । किमिदं शे इति? सुपामादेशश्छन्दसि । 'न यु ष्मे वाजबन्धवः । ' (ऋ० ८.६८.१९) । अस्मे इन्द्राबृहस्पती । (ऋ. ४.४९.४)। युष्मे इति (ऋ. पदपाठः) । अस्मे इति (ऋ० पदपाठः) । त्वे रायः (त. सं. ३.२.५.२) । मे रायः (वाज. सं. ४.२२)। त्वे इति (तै. सं. पदपाठः) । मे इति (वाज. सं. पदपाठः) ।

छान्दसमेतदेवैकमुदाहरणम् - 'अस्मे इन्द्राबृहस्पती' (ऋ. ४.४९.४) इति । तत्र तथा पाठात् । इतरत्तु लौकिकमनुकरणम्-युष्मे इति । अस्मे इति । त्वे इति । मे इति ॥

१४. निपात एकाजनाङ् ॥ १४॥ (१०३)

एकश्चासावच्च एकाच्, निपातो य एकाच् आङ्वर्जितः स प्रगृह्यसंज्ञो भवति। अ अपेहि। इ इन्द्रं पश्य । उ उत्तिष्ठ । आ एवं नु मन्यसे (म. भा. १.१.१४) । आ एवं किल तत् (म. भा. १.१.१४)।

निपात इति किम् ? चकारात्र । जहारात्र । एकाज् इति किम्? प्राग्नये वाचमीरय । (ऋ. १०.१८७.१) अनाङिति किम् ? आ उदकान्तात् ओदकान्तात्।

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥ (म. भा. १.१.१४)

१५. ओत् ॥ १५॥ (१०४)

'निपातः' इति वर्त्तते । तस्यौकारेण तदन्तविधिः । ओदन्तो यो निपातः स प्रगृह्यसंज्ञो भवति । आहो इति । उत्तहो इति ॥ (म. भा. १.१.१४)

१६. संबुद्धौ शाकल्यस्येतावनार्षे ॥ १६॥ (१०५)

'ओत्' इति वर्त्तते । संबुद्धिनिमित्तो य ओकारः स शाकल्यस्याचार्यस्य मतेन प्रगृह्यसंज्ञो भवति, 'इति' शब्देऽनार्षे=अवैदिके परतः। वायो इति, वायविति (ऋ. ४.४६.१) । भानो इति, भानविति ।

संबुद्धाविति किम्? गवित्ययमाह । अत्रानुकार्यानुकरणयोर्भेदस्याविवक्षितत्वात्। असत्यर्थवत्त्वे विभक्तिर्न भवति । शाकल्यग्रहणं विभाषार्थम् । इताविति किम् ? वायोऽत्र । अनार्ष इति किम् ? एता गा ब्रह्मबन्धवित्यब्रवीत् (का. सं. १०.६) ।

१७. उञः ॥ १७॥ (१०६)

' शाकल्यस्येतौ' [अनार्षे] इति वर्तते । उञः प्रगृह्यसंज्ञा भवति, इतौ शाकल्यस्याचार्यस्य मतेन । शाकल्यस्येति विभाषार्थम् । उ इति, विति ॥

१८. ऊँ ॥ १८ ॥ (१०७)

'उञः' इति वर्त्तते । उञ इतावनार्षे ऊँ इत्ययमादेशो भवति दीर्घोऽनुनासिकः, शाकल्यस्य मतेन प्रगृह्यसंज्ञकश्च । शाकल्यस्य ग्रहणं विभाषार्थमिहाप्यनुवर्तते, तेन त्रीणि रूपाणि भवन्ति उ इति, विति, ऊँ इति ॥

१९. ईदूतौ च सप्तम्यर्थे ॥ १९ ॥ (१०९)

'शाक्ल्यस्येतावनार्षे' इति निवृत्तम् । ईदन्तमूदन्तं च शब्दरूपं सप्तम्यर्थे वर्त्तमानं प्रगृह्यसंज्ञं भवति । 'अध्यस्यां मामकी तनू ।' (पै. १.६.८) मामक्यां तन्वामिति प्राप्ते । मामक्याम्, मामकी इति । तन्वाम्, तनू इति । सोमो गौरी अधिश्रितः । (ऋ. ९.१२.३) ईदूताविति किम्? 'प्रियः सूर्ये' प्रियो अग्ना भवति । (ऋ. ५.३७.५) अग्निशब्दात् परस्याः सप्तम्याः डादेशः।

सप्तमीग्रहणं किम्? धीती (ऋ. १.१६४.८), मती (ऋ. १.१६५.१), सुष्टुती (ऋ. २.३२.४)। धीत्या, मत्या (ऋ. ५.५८.५), सुष्टुत्या इति प्राप्ते । अर्थग्रहणं किम्? वाप्यश्वः, नद्यातिः । तपरकरणमसन्देहार्थम्।

ईदूतौ सप्तमीत्येव लुप्तेऽर्थग्रहणाद्भवेत् ।
पूर्वस्य चेत्सवर्णोऽसावाडाम्भावः प्रसज्यते ॥ १ ॥
वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि ।
ज्ञापकं स्यात्तदन्तत्वे मा वा पूर्वपदस्य भूत् ॥ २ ।। (म.भा. १.१.१९)

२०. दाधा घ्वदाप् ॥ २०॥ (२३७३)

दारूपाश्चत्वारो धातवः, धारूपौ च द्वौ दाब्दैपौ वर्जयित्वा घुसंज्ञका भवन्ति।
डुदाञ् (धा. पा. १०९१) - प्रणिददाति । दाण् दाने (धा. पा. ९३०) - प्रणिदाता। दो (धा.पा. ११४८) - प्रणिद्यति । देङ् (धा. पा. ९६२) - प्रणिदयते । डुधाञ् (धा. पा १०९२) - प्रणिदधाति। धेट् (पाने) (धा. पा. ९०२) - प्रणिधयति वत्सो मातरम्।

अदाबिति किम्? दाप् लवने (धा. पा. १०५९) - दातं बर्हिः । दैप् शोधने (धा. पा. ९२४) - अवदातं मुखम् ।

घुप्रदेशाः- ' घुमास्थागापाजहातिसां हलि ' (६.४.६६) इत्येवमादयः ॥

२१. आद्यन्तवदेकस्मिन् ॥ २१॥ (३४८)

असहायस्य आद्यन्तोपदिष्टानि कार्याणि न सिद्ध्यन्तीत्ययमतिदेश आरभ्यते। सप्तम्यर्थे वतिः । आदाविव अन्त इव एकस्मिन्नपि कार्यं भवति । यथा कर्त्तव्यमित्यत्र प्रत्ययाद्युदात्तत्वं भवति (३.१.३), एवम् औपगवमित्यत्रापि यथा स्यात् । यथा वृक्षाभ्यामित्यत्रातोऽङ्गस्य दीर्घत्वम्, (७.३.१०२) एवम् 'आभ्याम् ' इत्यत्रापि यथा स्यात् ।

एकस्मिन्निति किम्? सभासन्नयने भवः - साभासन्नयनः, आकारमाश्रित्य वृद्धसंज्ञा न भवति ॥

२२. तरप्तमपौ घः ॥ २२॥ (२००३)

'तरप् तमप्' - इत्येतौ प्रत्ययौ घसंज्ञौ भवतः । कुमारितरा । कुमारितमा। ब्रह्माणितरा। ब्राह्माणितमा ।

घप्रदेशाः 'घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः' (६.३.४३) इत्येवमादयः॥

२३. बहुगणवतुडति संख्या ॥ २३॥ (९५८)

'बहुगणवतुडति' (५.२.३९.४१) इत्येते संख्यासंज्ञा भवन्ति । बहुकृत्वः (५.४.१७) । बहुधा (५.३.४२) । बहुकः (५.१.२२) । बहुशः (५.४.४३) । गणकृत्वः। गणधा । गणशः । तावत्कृत्वः । तावद्धा । तावत्कः । तावच्छः । कतिकृत्वः। कतिधा। कतिकः। कतिशः।

बहुगणशब्दयोर्वैपुल्ये सङ्घे च वर्तमानयोरिह ग्रहणं नास्ति, संख्यावाचिनोरेव। भूर्यादीनां निवृत्त्यर्थं संख्यासंज्ञा विधीयते ॥

अर्धपूर्वपदश्च पूरणप्रत्ययान्तः संख्यासंज्ञो भवतीति वक्त्तव्यं समासकन्विध्यर्थम् (म. भा. १.८२) ॥ अर्धपञ्चमशूर्पः । अर्धं पञ्चमं येषामिति बहुव्रीहौ कृतेऽर्धपञ्चमैः शूर्पैः क्रीतः । तद्धितार्थेति (२.१.५१) समासः । तत्र दिक्संख्ये संज्ञायाम् (२.१.५०) इत्यनुवृत्तेस्ततः संख्यापूर्वस्य द्विगुसंज्ञायां (२.१.५२) शूर्पादञन्यतरस्याम् (५.१.२६) इत्यञ् ठञ्च । अध्यर्धपूर्वद्विगोर्लुगसञ्ज्ञायाम् (५.१.२८) इति लुक् । अर्धपञ्चमकः (५.१.२२) ।

संख्याप्रदेशाः- ' सख्या वंश्येन ' (२.१.१९) इत्येवमादयः ॥

२४. ष्णान्ता षट् ॥ २४॥ (३६९)

स्त्रीलिङ्गनिर्देशात् ' संख्या ' इति सम्बध्यते । षकारान्ता नकारान्ता च या संख्या सा षट्संज्ञा भवति । षकारान्तास्तावत् - षट् तिष्ठन्ति, षट् पश्य । नकारान्ताः- पञ्च, सप्त, नव, दश ।

अन्तग्रहणमौपदेशिकार्थम्, तेनेह न भवति शतानि, सहस्राणि । अष्टानामित्यत्र नुड् भवति (७.१.५५) । षट्प्रदेशाः- ' षड्भ्यो लुक् ' (७.१.२२) इत्येवमादयः॥

२५. डति च ॥ २५॥ (२५९)

डत्यन्ता च या संख्या सा षट्संज्ञा भवति । कति तिष्ठन्ति । कति पश्य ॥

२६. क्तक्तवतू निष्ठा ॥ २६॥ (३०१२)

क्तश्च क्तवतुश्च=क्तक्तवतू प्रत्ययौ निष्ठासंज्ञौ भवतः । कृतः । कृतवान् । भुक्तः। भुक्तवान् । ककारः कित्कार्यार्थः । उकार उगित्कार्यार्थः ।

निष्ठाप्रदेशाः- ' श्वीदितो निष्ठायाम् ' (७.२.१४) इत्येवमादयः ॥

२७. सर्वादीनि सर्वनामानि ॥ २७॥ (२१३)

सर्वशब्द आदिर्येषां तानीमानि सर्वादीनि सर्वनामसंज्ञानि भवन्ति । सर्वः, सर्वौ, सर्वे (७.१.१७) । सर्वस्मै (७.१.१४)। सर्वस्मात् (७.१.१५)। सर्वेषाम् (७.१.५२) । सर्वस्मिन् (७.१.१५)। सर्वकः (५.३.७१) । विश्वः, विश्वौ, विश्वे । विश्वस्मै । विश्वस्मात् । विश्वेषाम् । विश्वस्मिन्। विश्वकः।

उभ । उभय । उभशब्दस्य सर्वनामत्वे प्रयोजनम् ' सर्वनाम्नस्तृतीया च' (२.३.२७) इति। [उभाभ्यां हेतुभ्यां वसति, उभयोः हेत्वोः वसति ।] उभये । उभयस्मै । उभयस्मात् । उभयेषाम्। उभयस्मिन् ।

डतर । डतम । कतर । कतम । कतरस्मै, कतमस्मै । इतर । अन्य । अन्यतर। इतरस्मै । अन्यस्मै । अन्यतरस्मै । त्वशब्दोऽन्यवाची, स्वरभेदाद् द्विःपठितः । एक उदात्तः द्वितीयोऽनुदात्तः । केचित्तकारान्तमेकं पठन्ति । (ऋ०) त्व-त्वदिति द्वावपि चानुदात्ताविति स्मरन्ति ।

नेम । नेमस्मै । वक्ष्यमाणेन जसि विभाषा भवति । नेमे, नेमाः (१.१.३३) इति।

सम । समस्मै । कथं 'यथासंख्यमनुदेशः समानाम्' (१.३.१०), समे देशे यजेतेति? समस्य सर्वशब्द-पर्यायस्य सर्वनामसंज्ञा इष्यते, न सर्वत्र । सिम-सिमस्मै।

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । (१.१३४ ग.सू. १) । 'स्वमज्ञातिधनाख्यायाम् ।' (१.१.३५ ग. सू. २) 'अन्तरं बहिर्योगोपसंव्यानयोः।' (१.१.३६ ग. सू. ३) । त्यद् । तद्, यद्, एतद्, इदम्, अदस्, एक , द्वि, युष्मद्, अस्मद्, भवतु, किम् । सर्वादिः।

सर्वनामप्रदेशाः- ' सर्वनाम्नः स्मै ' (७.१.१४) इत्येवमादयः ॥

२८. विभाषा दिक्समासे बहुव्रीहौ ॥ २८॥ (२९२)

'न' बहुव्रीहौ (१.१.२९) इति प्रतिषेधं वक्ष्यति । तस्मिन्नित्ये प्रतिषेधे प्राप्ते विभाषेयमारभ्यते । दिशां समासो दिक्समासः, दिगुपदिष्टे समासे बहुव्रीहौ विभाषा सर्वादीनि सर्वनामसंज्ञानि भवन्ति । उत्तरपूर्वस्यै, उत्तरपूर्वायै । दक्षिणपूर्वस्यै । दक्षिणपूर्वायै ।

दिग्ग्रहणं किम्? 'न बहुव्रीहौ' इति प्रतिषेधं वक्ष्यति, तत्र न ज्ञायते-क्व विभाषा, क्व प्रतिषेध इति । दिग्ग्रहणे पुनः क्रियमाणे ज्ञायते - दिगुपदिष्टसमासे विभाषा, अन्यत्र प्रतिषेध इति ।

समासग्रहणं किम्? समास एव यो बहुव्रीहिस्तत्र विभाषा यथा स्यात्; बहुव्रीहिवद्भावेन यो बहुव्रीहिः, तत्र मा भूत् । दक्षिणदक्षिणस्यै (८.१.१०) देहि ।

बहुव्रीहाविति किम्? द्वन्द्वे विभाषा मा भूत् । दक्षिणोत्तरपूर्वाणामिति (म. भा. १.१०)। द्वन्द्वे च (१.१.३१) इति नित्यं प्रतिषेधो भवति ॥

२९. न बहुव्रीहौ ॥ २९॥ (२२२)

सर्वनामसंज्ञायां तदन्तविधेरभ्युपगमाद् बहुव्रीहेरपि सर्वाद्यन्तस्य संज्ञा स्यादिति प्रतिषेध आरभ्यते ।

बहुव्रीहौ समासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति-प्रियविश्वाय, प्रियोभयाय, द्व्यन्याय, त्र्यन्याय । इह च त्वत्कपितृकः, मत्कपितृक इत्यकज् न भवति ।

बहुव्रीहाविति वर्त्तमाने पुनर्बहुव्रीहिग्रहणं भूतपूर्वमात्रेऽपि प्रतिषेधो यथा स्यात्। वस्त्रान्तरवसनान्तराः (म. भा. १.९०) इति ॥

३०. तृतीयासमासे ॥ ३०॥ (२२३)

तृतीयासमासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति । मासपूर्वाय, संवत्सरपूर्वाय, द्व्यहपूर्वाय, त्र्यहपूर्वाय । 'समासे' इति वर्त्तमाने पुनः समासग्रहणं तृतीयासमासार्थवाक्येऽपि प्रतिषेधो यथा स्यात्- मासेन पूर्वाय । 'पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ' (२.१.३१) इति तृतीयासमासं प्रतिपदं वक्ष्यति, तस्येदं ग्रहणम् । न यस्य कस्यचित्तृतीयासमासस्य 'कर्तृकरणे कृता बहुलम्' (२.१.३२) इति । त्वयका कृतम्, मयका कृतम् ॥

३१. द्वन्द्वे च ॥ ३१॥ (२२४)

द्वन्द्वे च समासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति । पूर्वापराणाम् । कतरकतमानाम्।

३२. विभाषा जसि ॥ ३२॥ (२२५)

पूर्वेण नित्ये प्रतिषेधे प्राप्ते जसि विभाषाऽऽरभ्यते । द्वन्द्वसमासे जसि विभाषा सर्वादीनि सर्वनामसंज्ञानि न भवन्ति । कतरकतमे, कतरकतमाः । जसः कार्यं प्रति विभाषाऽकज् हि न भवति-कतरकतमकाः ।

३३. प्रथमचरमतयाल्पार्धकतिपयनेमाश्च ॥ ३३ ॥ (२२६)

'विभाषा जसि' (१.१.३२) इति वर्त्तते । 'द्वन्द्वे' (१.१.३१) इति निवृत्तम्। प्रथम, चरम, तय, अल्प, अर्ध, कतिपय, नेम - इत्येते जसि विभाषा सर्वनामसंज्ञा भवन्ति । प्रथमे, प्रथमाः। चरमे, चरमाः । द्वितये, द्वितयाः । अल्पे, अल्पाः । अर्धे, अर्धाः । कतिपये, कतिपयाः। नेमे, नेमाः।

'तय' इति तयप्प्रत्ययः, शिष्टानि प्रातिपदिकानि ।

तत्र ' नेम' इति सर्वादिषु पठ्यते; तस्य प्राप्ते विभाषा, अन्येषामप्राप्ते । उभयशब्दस्य तयप्प्रत्ययान्तस्य गणे पाठान्नित्या सर्वनामसंज्ञा इहापि जस्कार्यं प्रति विभाषा । काकचोर्यथायोगं वृत्तिः ॥

३४. पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ॥ ३४ ॥ (२१८)

पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर-इत्येतेषां गणे पाठात् पूर्वेण नित्यायां सर्वनामसञ्ज्ञायां प्राप्तायां जसि विभाषाऽऽरभ्यते । पूर्वादीनि विभाषा जसि सर्वनामसंज्ञानि भवन्ति व्यवस्थायामसंज्ञायाम् । स्वाभिधेयापेक्षावधिनियमो व्यवस्था। पूर्वे, पूर्वाः। परे, पराः । अवरे, अवराः । दक्षिणे, दक्षिणाः । उत्तरे, उत्तराः। अपरे, अपराः । अधरे, अधराः।

व्यवस्थायामिति किम्? दक्षिणा इमे गाथकाः । प्रवीणा इत्यर्थः । असंज्ञायामिति किम्? उत्तरा कुरवः । सत्यामेव व्यवस्थायामियं तेषां संज्ञा ।

३५. स्वमज्ञातिधनाख्यायाम् ॥ ३५ ॥ (२१९)

अत्रापि नित्या सर्वनामसंज्ञा प्राप्ता जसि विभाष्यते । स्वमित्येतच्छब्दरूपं जसि विभाषा सर्वनामसंज्ञं भवति, न चेज्ज्ञातिधनयोस्संज्ञारूपेण वर्तते । स्वेः पुत्राः, स्वाः पुत्राः। स्वे गावः, स्वा गावः। आत्मीया इत्यर्थः। ज्ञातिप्रतिषेधः इति किम्?

धूमायन्त इवाश्लिष्टाः प्रज्वलन्तीव संहताः।
उल्मुकानीव मेऽमी स्वा ज्ञातयो भरतर्षभ ॥ (महाभारते ५ ३६.३८)।

अधनाख्यायामिति किम्? प्रभूताः स्वा न दीयन्ते, प्रभूताः स्व न भुज्यन्ते । प्रभूतानि धनानीत्यर्थः ॥

३६. अन्तरं बहिर्योगोपसंव्यानयोः ॥ ३६॥ (२२०)

अत्रापि पूर्वेण नित्या सर्वनामसंज्ञा प्राप्ता सा जसि विभाष्यते ।

अन्तरमित्येतच्छब्दरूपं विभाषा जसि सर्वनामसंज्ञं भवति बहिर्योगे उपसंख्याने च गम्यमाने । अन्तरे गृहाः अन्तरा गृहाः। नगरबाह्याश्चाण्डालादिगृहा उच्यन्ते । [उपसंख्याने] अन्तरे शाटकाः, अन्तराः शाटकाः । उपसंख्यानं परिधानीयमुच्यते, न प्रावरणीयम्।

बहिर्योगोपसंव्यानयोरिति किम् ? अनयोर्ग्रामयोरन्तरे तापसः प्रतिवसति । तस्मिन्नन्तरे शीतान्युदकानि । मध्यप्रदेशवचनोऽन्तरशब्दः । गणसूत्रस्य चेदं प्रत्युदाहरणम्॥

अपुरीति च वक्तव्यम् (म. भा. १.१.३६ वा.) ॥ [इह मा भूत्] - अन्तरायां पुरि वसति ।

विभाषाप्रकरणे तीयस्य वा ङित्सु सर्वनामसंज्ञेत्युपसंख्यानम् (म. आ. १.१.३६ वा. १) द्वितीयस्मै द्वितीयाय । तृतीयस्मै, तृतीयाय ॥

३७. स्वरादिनिपातमव्ययम् ॥ ३७॥ (४४७)

स्वरदिनि शब्दरूपाणि निपातश्चाव्ययसंज्ञानि भवन्ति । स्वर्, अन्तर्, प्रातर्-एते अन्तोदात्ताः पठ्यन्ते । पुनर् आद्युदात्तः । सनुतर्, उच्चैस्, नीचैस्, शनैस्, ऋधक्, आरात्, ऋते, युगपत्, पृथक्-एतेऽपि सनुतर्प्रभृतयोऽन्तोदात्ताः पठ्यन्ते। ह्यस्, श्वस्, दिवा, रात्रौ, सायम्, चिरम्, मनाक्, ईषत्, जोषम्, तूष्णीम्, बहिस्, आविस्, अवस्, अधस्, समया, निकषा, स्वयम्, मृषा, नक्तम्, नञ्, हेतौ, अद्धा, इद्धा, सामि-एतेऽपि ह्यस्प्रभृतयोऽन्तोदात्ताः पठ्यन्ते। वत्, वदन्तमव्ययसंज्ञं भवति-ब्राह्मणवत्, क्षत्रियवत्। सन्, सनात्, सनत्, तिरस्-एते आद्युदात्ताः पठ्यन्ते । अन्तरा-अयमन्तोदात्तः। अन्तरेण, ज्योक्, कम्, शम्, सना, सहसा, विना, नाना, स्वस्ति, स्वधा, अलम्, वषट्, अन्यत्, अस्ति, उपांशु, क्षमा, विहायसा, दोषा, मुधा, मिथ्या। क्त्वतोसुन्कसुनः-कृन्मकारान्तः, सन्ध्यक्षरान्तः, अव्ययीभावश्च । पुरा, मिथो, मिथस्, प्रबाहुकम्, आर्यहलम्, अभीक्षणम्, साकम्, सार्धम्, समम्, नमस्, हिरुक् । तसिलादिः तद्धित एधाच्पर्यन्तः, शस्तसी, कृत्वसुच्, सुच्, आस्थालौ, च्व्यर्थाश्च, अम्, आम्, प्रतान्, प्रशान्। स्वरादिः।

निपाता वक्ष्यन्ते-'प्राग्रीश्वरान्निपाताः' (१.४.५६) इति । च, वा, ह, अह, एव, एवमित्यादयः। अव्ययप्रदेशाः अव्ययादाप्सुपः (२.४.८२) इत्येवमादयः। 'अव्ययम्' इत्यन्वर्थसंज्ञा।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ (गो. ब्रा. १.१.२६)

३८. तद्धितश्चासर्वविभक्तिः ॥ ३८ ॥ (४४८)

तद्धितान्तः शब्दोऽसर्वविभक्तिरव्ययसंज्ञो भवति । यस्मान्न सर्वविभक्तेरुत्पत्तिः, सोऽसर्वविभक्तिः । ततः, यतः, तत्र, यत्र, तदा, यदा, सर्वदा, सदा ।

तद्धितः इति किम्? एकः, द्वौ, बहवः । असर्वविभक्तिरिति किम्? औपगवः, औपगवौ, औपगवाः ॥

३९. कृन्मेजन्तः ॥ ३९ ॥ (४४९)

कृद्यो मकारान्तः, एजन्तश्च तदन्तं शब्दरूपमव्ययसंज्ञं भवति । स्वादुङ्कारं भुङ्क्ते, सम्पन्नङ्कारं भुङ्क्ते, लवणङ्कारं भुङ्क्ते । एजन्तः-वक्षे रायः। 'ता वामेषे रथानाम्' । (ऋ. ४.६६.३) । क्रत्वे दक्षाय जीवसे । (ऋ. १०.५७.४) । ज्योक्च सूर्यं दृशे। ' वक्षो' इति वचेः 'तुमर्थे सेसेन्' (३.४.९) इति सेप्रत्यये कुत्वे षत्वे च कृते रूपम् । ' एषे' इति इणः सेप्रत्यये गुणे षत्वे च कृते रूपम् । ' जीवसे' इति जीवेरसे प्रत्यये रूपम् । ' दृशे' इति दृशेः केन्प्रत्ययो निपात्यते- 'दृशे विख्ये च' (३.४.११) इति ।

अन्तग्रहणमौपदेशिकप्रतिपत्त्यर्थम् । इह मा भूत्-आधये, चिकीर्षवे, कुम्भकारेभ्यः इति॥

४०. क्त्वातोसुन्कसुनः ॥ ४०॥ (४५०)

क्त्वा-तोसुन्-कसुन्-इत्येवमन्तं शब्दरूपमव्ययसंज्ञं भवति । कृत्वा, हृत्वा। तोसुन्-[व्युष्टायां] पुरा सूर्यस्योदेतोराधेयः, (का. सं. ८.३) । पुरा वत्सानामपाकर्त्तोः (का. सं. ३१. १५)। 'भावलक्षणे स्थेण्कृञवदि' (३.४.१६) इति इणः, कृञश्च तोसुन्प्रत्ययः। कसुन्- 'सृपितृदोः कसुन्'। (३.४.१७) 'पुरा क्रूरस्य विसृपो' विरप्शिन् (तै० सं० १.१.९.३) 'पुरा जर्तृभ्य' आतृदः (ऋ० ८१.१२) ॥

४१. अव्ययीभावश्च ॥ ४१॥ (४५१)

अव्ययीभावसमसोऽव्ययसंज्ञो भवति । किं प्रयोजनम् ? लुङ्मुखस्वरोपचारः। लुक्-(२.४.८२)। उपाग्नि, प्रत्यग्नि शलभाः पतन्ति । मुखस्वरः - उपाग्निमुखः, प्रत्यग्निमुखः। 'मुखं स्वाङ्गम्'(६/२/१६७) इत्युत्तरपदान्तोदात्तत्वं प्राप्तम् 'नाव्ययदिक्छब्द' (६.२.१६८) इति प्रतिषिध्यते । तस्मिन् प्रतिषिद्धे पूर्वपदप्रकृतिस्वर एव भवति । उपचारः - उपपयःकारः, उपपयःकामः। विसर्जनीयस्थानिकस्य सकरस्य 'उपचारः' इति संज्ञा, तत्राव्ययीभावस्याव्ययत्वे 'अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य' (८.३.४६) इति पर्युदासः सिद्धो भवति (म. भा. १.१८) । सर्वमिदं काण्डं स्वरादावपि पठ्यते ।

पुनर्वचनमनित्यत्वज्ञापनार्थम् । तेनायं कार्यनियमः सिद्धो भवति । इह च - ' पुरा सूर्यस्योदेतोराधेयः' (का. सं. ८.३) पुरा क्रूरस्य विसृपो विरप्शिन् (तै. सं. १.१.९.३)। इति ' न लोकाव्ययनिष्ठाखलर्थतृनाम्' (२.३.६९) इति षष्ठीप्रतिषेधो न भवति ॥

४२. शि सर्वनामस्थानम् ॥ ४२॥ (३१३)

' शि ' इत्येतत् सर्वनामस्थानसंज्ञं भवति । किमिदं शि इति? जश्शसोःशिः (८.१.२०) इति शिः आदेशः। कुण्डानि (८.१.८२; ६.४.८) तिष्ठन्ति, कुण्डानि पश्य । (म. भा. १.१.४३) दधीनि, मधूनि । त्रपूणि, जतूनि।

सर्वनामस्थानप्रदेशाः - ' सर्वनामस्थाने चासंबुद्वौ ' (६.४.८) इत्येवमादयः॥

४३. सुडनपुंसकस्य ॥ ४३॥ (२२९)

'सुट्' इति पञ्च वचनानि सर्वनामस्थानसंज्ञानि भवन्ति नपुंसकादन्यत्र । नपुंसके न विधिर्न प्रतिषेधः, तेन जसंशे सर्वनामस्थानसंज्ञा पूर्वेण भवत्येव । राजा, राजानौ, राजानः; राजानम्, राजानौ (६.४.८) ।

सुडिति किम्? राज्ञः पश्य । अनपुंसकस्येति किम्? सामनी, वेमनी ॥

४४. नवेति विभाषा ॥ ४४॥ (३४)

नेति प्रतिषेधः, वेति विकल्पः, तयोः प्रतिषेधविकल्पयोर्विभाषेति संज्ञा भवति। इतिकरणोऽर्थनिर्देशार्थः। विभाषाप्रदेशेषु प्रतिषेधविकल्पावुपतिष्ठेते । तत्र प्रतिषेधेन समीकृते विषये पश्चाद्विकल्पः प्रवर्तते । उभयत्रविभाषाः प्रयोजयन्ति ' विभाषा श्वेः' - (६.१.३०) शुशाव, शिश्वाय; शुशुवतुः शिश्वियतुः।

विभाषाप्रदेशाः- ' विभाषा श्वेः' (६.१.३०) इत्येवमादयः ॥

४५. इग्यणः सम्प्रसारणम् ॥ ४५ ॥ (३२८)

इग्यो यणः स्थाने भूतो भूवी वा तस्य संप्रसारणम् इत्येषा संज्ञा भवति । यज्-इष्टम्, वप्-उप्तम् । ग्रह-गृहीतम् ।

केचिदुभयथा सूत्रमिदं व्याचक्षते- वाक्यार्थः संज्ञी, वर्णश्चेति । इग्यण इति यो वाक्यार्थः स्थान्यादेशसम्बन्धलक्षणः स सम्प्रसारणसंज्ञो भवति; यण्स्थानिक इग्वर्णः स संप्रसारणसंज्ञो भवतीति । तत्र विधौ वाक्यार्थ उपतिष्ठते- 'ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे' (६.१.१३), 'वसोः संप्रसारणम्' (६.४.१३१) इति । अनुवादे वर्णः- 'संप्रसारणाच्च' (३.६.१०८) इति ।

संख्यातानुदेशादिह न भवति- अदुहितरामिति । द्युभ्यामित्यत्र 'दिव उत्' (६.१.१३१) इति तपरकरणाद् दीर्घो न भवति । संप्रसारणप्रदेशाः-वसोः संप्रसारणम् (६.४.१३१) इत्येवमादयः॥

४६. आद्यन्तौ टकितौ ॥ ४६॥ (३६)

आदिष्टिद् भवति, अन्तः किद् भवति षष्ठीनिर्दिष्टस्य । लविता, (७.२.३५) मुण्डो भीषयते (७.३.४०) ।

टित्प्रदेशाः- ' आर्धधातुकस्येड्वलादेः ' (७.२.३५) इत्येवमादयः ।

कित्प्रदेशाः- ' भियो हेतुभये षुक् ' (७.३.४०) इत्येवमादयः ।

४७. मिदचोऽन्त्यात् परः ॥ ४७ ॥ (३७)

'अचः' इति निर्धारणे षष्ठी । जातौ चेदमेकवचनम् । अचां संनिविष्टानामन्त्यादचः परो मिद् भवति । स्थानेयोगप्रत्ययपरत्वस्य (३.१.१,२) अयमपवादः । विरुणद्धि (३.१.७८), मुञ्चति (७.१.५९), पयांसि (७.१.७२)।

मित्प्रदेशाः - ' रुधादिभ्यः श्नम् ' (३.१.७८) इत्येवमादयः ।

मस्जेरन्त्यात्पूर्वं नुममिच्छन्त्यनुषङ्गसंयोगादिलोपार्थम् (म. भा. १.१.४७)॥ मग्नः, (७.१.६०) , (७.२.२९) मग्नवान् । मङ्क्ता, मङ्क्तुम् ॥

४८. एच इग्घ्रस्वादेशे ॥ ४८ ॥

एचो ह्रस्वादेशे कर्त्तव्य इगेव ह्रस्वो भवति, नान्यः ।

रै-अतिरि । नौ-अतिनु (१.२.४७) गो-उपगु (१.२.४८) ।

एच इति किम्? अतिखट्वः अतिमालः। ह्रस्वादेशे इति किम्? देऽवदत्त (८.२.८६) । देवदऽत्त (६.१.१९८) ॥

४९. षष्ठी स्थानेयोगा ॥ ४९॥ (३८)

परिभाषेयं योगनियमार्था । इह शास्त्रे या षष्ठी अनियतयोगा श्रूयते, सा स्थानेयोगैव भवति, नान्ययोगा । स्थानेयोगस्य निमित्तभूते सति सा प्रतिपत्तव्या । स्थानशब्दश्च प्रसङ्गवाची, यथा-दर्भाणां स्थाने शरैः प्रस्तरितव्यमिति दर्भाणां प्रसङ्ग इति गम्यते; एवमिहापि अस्तेः स्थाने=प्रसङ्गे भूर्भवति-भविता, भवितुम्, भवितव्यम्। ब्रुवः प्रसङ्गे वचिर्भवति-वक्ता, वक्तुम्, वक्तव्यम्। प्रसङ्गे=संबन्धस्य निमित्तभूते 'ब्रुवः' इति षष्ठी ।

बहवो हि षष्ठ्यर्थाः स्वस्वाम्यनन्तरसमीपसमूहविकारावयवाद्याः, तत्र यावन्तः शब्दे संभवन्ति तेषु सर्वेषु प्राप्तेषु नियमः क्रियते । षष्ठी स्थानेयोगेति -स्थाने योगोऽस्या इति व्यधिकरणो बहुव्रीहिः । अत एव निपातनाच्च सप्तम्या अलुक् ॥

५०. स्थानेऽन्तरतमः ॥ ५० ॥ (३९)

स्थाने प्राप्यमाणानामन्तरतम आदेशो भवति सदृशतमः। कुतश्च शब्दस्यान्तर्यम्? स्थानार्थगुणप्रमाणतः ।

स्थानतः- 'अकः सवर्णे दीर्घः' (३.१.१०१) । दण्डाग्रम्, यूपाग्रम् । द्वयोरकारयोः कण्ठ्य एव दीर्घ आकारो भवति ।

अर्थतः- वतण्डी चासौ युवतिश्च वातण्ड्ययुवतिः । पुंवद्भावेन अन्तरतमः पुंशब्दोऽतिदिश्यते ।

गुणतः- पाकः, त्यागः, रागः। 'चजोः कु घिण्यतोः' (७.३.४२) इति चकारस्याल्पप्राणस्याघोषस्य तादृश एव ककारो भवति । जकारस्य घोषवतोऽल्पप्राणस्य तादृश एव गकारः ।

प्रमाणतः - अमुष्मै, अमूभ्याम् । 'अदसोऽसेर्दादु दो मः' (८.२.८०) इति ह्रस्वस्य ह्रस्वः, दीर्घस्य दीर्घः ।

'स्थाने' इति वर्त्तमाने पुनः स्थानेग्रहणं किम्? यत्रानेकमान्तर्यं संभवति तत्र स्थानत एवान्तर्यं बलीयो यथा स्यात्-चेता, स्तोता । प्रमाणतोऽकारो गुणः प्राप्तः तत्र स्थानत आन्तर्यादेकारौकारौ भवतः ।

तमब्ग्रहणं किम्? वाग्घसति, त्रिष्टुब्भसति । ' झयो होऽन्यतरस्याम् ' (८.४.६२)। इति हकारस्य पूर्वसवर्णे क्रियमाणे 'सोष्मणः सोष्माणः' इति द्वितीयाः प्रसक्ताः, 'नादवतो नादवन्त' इति तृतीयाः प्रसक्ताः । तमब्ग्रहणाद् ये सोष्माणो नादवन्तश्च ते भवन्ति चतुर्थाः (म. भा. १.१.५०) ॥

५१. उरण् रपरः ॥ ५१ ॥ (७०)

उः स्थानेऽण् प्रसज्यमान एव रपरो वेदितव्यः । कर्ता, (७.३.८४) हर्त्ता । किरति, (७.१.१००) । गिरति । द्वैमातुरः (४.१.११५), त्रैमातुरः ।

उरिति किम्? खेयम् (३.१.१११), गेयम् (६.५.६५) ।

अण्ग्रहणं किम् ? 'सुधातुरकङ् च' - (४.१.९७) सौधातकिः ॥

५२. अलोऽन्त्यस्य ॥ ५२ ॥ (४२)

षष्ठीनिर्दिष्टस्य य उच्यते आदेशः, सोऽन्त्यस्यालः स्थाने वेदितव्यः । ' इद् गोण्याः' - (१.२.५०) पञ्चगोणिः, दशगोणिः ॥

५३. ङिच्च ॥ ५३ ॥ (४३)

ङिच्च य आदेशः सोऽनेकालपि अलोऽन्त्यस्य भवति । 'आनङ्ऋतो द्वन्द्वे' - (६.३.२५) होतापोतारौ, मातापितरौ ।

तातङि ङित्करणस्य सावकाशत्वाद् गुणवृद्धिप्रतिषेधार्थत्वात् सर्वादेशस्तातङ् भवति - जीवताद्भवान् । जीवतात् (७.१.३५) त्वम् ॥

५४. आदेः परस्य ॥ ५४ ॥ (४४)

परस्य कार्यं शिष्यमाणमादेरलः प्रत्येतव्यम् । क्व च परस्य कार्यं शिष्यते ? यत्र पञ्चमीनिर्देशः । तद् यथा- ' ईदासः' ; (७.२.८३) । आसीनो यजते । 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' (६.३.९७) द्वीपम्, अन्तरीपम्, प्रतीपम्; समीपम् ॥

५५. अनेकाल्शित् सर्वस्य ॥ ५५ ॥ (४५)

अनेकाल् य आदेशः शिच्च स सर्वस्य षष्ठीनिर्दिष्टस्य स्थाने भवति । 'अस्तेर्भूः'- (२.४.५२) । भविता, भवितुम्, भवितव्यम् ।

शित्खल्वपि- 'जश्शसोः शिः'। (ओ७१.२०) कुण्डानि तिष्ठन्ति, कुण्डानि पश्य ॥

५६. स्थानिवदादेशोऽनल्विधौ ॥ ५६ ॥ (४१)

स्थान्यादेशयोः पृथक्त्वात् स्थान्याश्रयं कार्यमादेशे न प्राप्नोतीत्ययमतिदेश आरभ्यते । स्थानिना तुल्यं वर्त्तत इति स्थानिवत् । स्थानिवदादेशो भवति स्थान्याश्रयेषु कार्येष्वनलाश्रयेषु, स्थान्यलाश्रयाणि कार्याणि वर्जयित्वा । न अल्विधिरनल्विधिरित्यर्थः। किमुदाहरणम्? धात्वङ्गकृत्तद्धिताव्ययसुप्तिङ्पदादेशाः ।

धात्वादेशो धातुवद्भवति - ' अस्तेर्भूः', (२.४.५२) 'ब्रुवो वचिः', (२.४.५३) आर्धधातुके विषये प्रागेवादेशेषु कृतेषु 'धातोः' (३.१.९१) इति तव्यादयो भवन्ति- भविता, भवितुम्, भवितव्यम्; वक्ता, वक्तुम्, वक्तव्यम् ।

अङ्गादेशोऽङ्गवद्भवति-केन, काभ्याम् कैः । ‘ किमः कः’ (७.२.१०३) इति कादेशे कृतेऽङ्गाश्रया इनदीर्घत्वैस्भावा भवन्ति ।

कृदादेशः कृद्वद्भवति-प्रकृत्य, प्रहृत्य । क्त्वो ल्यबादेशे कृते ‘ह्रस्वस्य पिति कृति तुक्’ (६१ ७१) इति तुग्भवति ।

तद्धितादेशस्तद्धितवद्भवति -दाधिकम्, अद्यतनम् । ‘कृत्तद्धितसमासाश्च’(१.२.४६)। इति प्रातिपदिकसंज्ञा भवति ।

अव्ययादेशोऽव्ययवद्भवति - प्रस्तुत्य, पहृत्य, उपहृत्य, उपस्तुत्य । ‘अव्ययात्’ (२.४.८२) इति सुब्लुग् भवति ।

सुबादेशः सुब्वद्भवति-वृक्षाय, प्लक्षाय । ‘ सुपि च ’ (७ ३ १०२) इति दीर्घत्वं भवति ।

तिङादेशस्तिङ्वद्भवति-अकुरुताम्, अकुरुतम् । ‘ सुप्तिङन्तं पदम् ’ (१.४.१४) इति पदसंज्ञा भवति ।

पदादेशः पदवद्भवति - ग्रामो वः स्वम्, जनपदो नः स्वम् । ‘ पदस्य ’ (८.१.१६) इति रुत्वं भवति ।

वत्करणं किम्? स्थानी आदेशस्य संज्ञा मा विज्ञायेति । स्वाश्रयमपि यथा स्यात् । ‘आङो यमहनः’(१.३.२८) आहत, आवधिष्टेति आत्मनेपदमुभयत्रापि भवति ।

आदेशग्रहणं किम् ? आनुमानिकस्यप्यादेशस्य स्थानिवद्भावो यथा स्यात्-पचतु। ‘ एरुः’ (३.४.८६) ।

अनल्विधाविति किम् ? द्युपथित्यदादेशा न स्थानिवद् भवन्ति - द्यौः, पन्थाः, स्यः (सः) इति । हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् (६.१.६८) इति सुलोपो न भवति ॥

५७. अचः परस्मिन् पूर्वविधौ ॥ ५७ ॥ (५०)

पूर्वेणानल्विधौ स्थानिवद्भाव उक्तः, अल्विध्यर्थमिदमारभ्यते । आदेशः स्थानिवदिति वर्तते । अच इति स्थानिनिर्देशः । परस्मिन्निति निमित्तसप्तमी । पूर्वविधाविति विषयसप्तमी। अजादेशः परनिमित्तकः पूर्वविधौ कर्तव्ये स्थानिवद्भवति। पटयति । अवधीत् । बहुखट्वकः । पटुमाचष्टे इति णिचि टिलोपे कृते तस्य स्थानिवद्भावाद् ‘अत उपधायाः’ (७.२.११६) इति वृद्धिर्न भवति । अवधीत् - अतो लोपस्य (६.४.४८) स्थानिवद्भावाद् ‘ अतो हलादेर्लघोः’ (७.२.७) इति हलन्तलक्षणा वृद्धिर्न भवति । बहुखट्वकः इति - ‘आपोऽन्यतरस्याम्’ (७.४.१५) इति ह्रस्वस्य स्थानिवद्भावाद् ‘ह्रस्वान्तेऽन्त्यात् पूर्वम्’ (६.२.१७४) इति स्वरो न भवति।

अच इति किम्? प्रश्नः । आक्राष्टाम् । आगत्य । प्रश्नः इति- प्रच्छेर्नङ्प्रत्यये 'च्छवोः शूडनुनासिके च' (६.४.१९) इति छकारस्य शकारः परनिमित्तकस्तुकि कर्त्तव्ये न स्थानिवद् भवति।

आक्राष्टामिति - ' झलो झलि' (८.२.२६) इति सिचो लोपः परनिमित्तकः कृषेः षकारस्य 'षढोः कः सि' (८.२.५१) इति ककारे कर्तव्ये न स्थानिवद् भवति ।

आगत्येति - ' वा ल्यपि ' (६.४.३८) इति अनुनासिकलोपः परनिमित्तकस्तुकि कर्तव्ये न स्थानिवद् भवति ।

परस्मिन्निति किम्? युवजानिः । वधूटीजानिः । वैयाघ्रपद्यः। आदीध्ये । युवजानिरिति-' जयाया निङ् ' (५.४.१३४) न परनिमित्तकः, तेन यलोपे (६.४.६६) न स्थानिवद् भवति । वैयाघ्रपद्यः इति - न परनिमित्तकः पादस्यान्तलोपः (५.४.१३७) पद्भावं (६.४.१३०) न प्रतिबध्नाति । आदीध्ये इति - दीधीङ उत्तमपुरुषैकवचने टेरेत्वस्यापरनिमित्तकत्वाद् 'यीवर्णयोर्दीधीवेव्योः' (७.४.५३) इति लोपो न भवति।

पूर्वविधाविति किम्? हे गौः । बभ्रवीयाः । नैधेयः (म. भा. १.१.५७) । हे गौरिति - वृद्विरजादेशः (७.१.९०) सम्बुद्धिलोपे कर्त्तव्ये न स्थानिवद् भवति । बाभ्रवीया इति - बाभ्रव्यस्यामी च्छात्रा इति ' वृद्धाच्छः ' (४.२.११४) इति छः, 'हलस्तद्धितस्य ' (६.४.१५०) इति यकारलोपे कर्त्तव्येऽवादेशो न स्थानिवद् भवति। नैधेयः - ' आतो लोप इटि च ' (६.४.६४) इत्यकारलोपः इतश्चानिञः (४.१.१२२) इति द्व्यज्लक्षणे प्रत्ययविधौ न स्थानिवद् भवति ॥

५८. न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्च-र्विधिषु ॥ ५८ ॥ (५१)

पूर्वेणातिप्रसक्तः स्थानिवद्भाव एतेषु विधिषु प्रतिषिध्यते ।

(१) पदान्तविधिं प्रत्यजादेशो न स्थानिवद् भवति - कौ स्तः, यौ स्तः। तानि सन्ति, यानि सन्ति । श्नसोरल्लोपः (६.४.१११) क्ङिति सार्वधातुके (८.४.४७) इति परनिमित्तकः, स पूर्वविधावावादेशे यणादेशे च कर्त्तव्ये स्थानिवत् स्यात्, अस्माद्वचनान्न भवति ।

(२) द्विर्वचनविधिः- द्विर्वचनविधिं प्रति [अजादेशः] न स्थानिवद् भवति - दध्यत्र। मद्ध्वत्र । यणादेशः परनिमित्तकस्तस्य स्थानिवद्भावाद् 'अनचि च' (८.४.४७) इति धकारस्य द्विर्वचनं न स्यादस्माद्वचनाद् भवति ।

(३) वरेविधिः- वरे योऽजादेशः स पूर्वविधिं प्रति न स्थानिवद् भवति - अप्सु यायावरः प्रवपेत् पिण्डान् । यातेर्यङन्ताद् 'यश्च यङः' (३.२.१७६) इति वरचि कृते 'अतो लोपः' (६.४.६८) परनिमित्तकः तस्य स्थानिवत्त्वाद् 'आतो लोप इटि च' (६.४.६४) इत्याकारलोपः स्याद् अस्माद्वचनान्न भवति ।

(४) यलोपविधिः- यलोपविधिं प्रत्यजादेशो न स्थानिवद् भवति - कण्डूतिः। कण्डूयतेः क्तिनि कृते, 'अतो लोपः' (६.४.४८) परनिमित्तकः 'लोपो व्योर्वलि' (६.१.६६) इति यलोपे स्थानिवत् स्याद् अस्माद्वचनान्न भवति ।

(५) स्वरविधिः- स्वरविधिं प्रति अजादेशो न स्थानिवद् भवति - चिकीर्षकः जिहीर्षकः। ण्वुलि कृते अतो लोपः (६.४.४८) परनिमित्तको लिति (६.१.१९३) प्रत्ययात् पूर्वमुदात्तमिति स्वरे कर्त्तव्ये न स्थानिवद् भवतीति ।

(६) सवर्णविधिः- सवर्णविधिं प्रति अजादेशो न स्थानिवद् भवति - शिण्ढि, पिण्ढि । शिषे: पिषेश्च लोण्मध्यमपुरुषैकवचने, 'रुधादिभ्यः श्नम्' (३.१.७८) हित्वधित्वष्टुत्वजश्त्वेषु कृतेषु 'श्नसोरल्लोपः' (६.४.१११) क्ङिति सार्वधातुके (८.४.४७) परनिमितकः अनुस्वारस्य ययि परसवर्णे (८.४.५८) कर्त्तव्ये न स्थानिवद् भवति ।

(७) अनुस्वारविधिः- अनुस्वारविधिं प्रत्यजादेशो न स्थानिवद् भवति । शिषन्ति, पिषन्ति । 'नश्चापदान्तस्य झलि' (८ ३ २४) इति अनुस्वारे कर्त्तव्ये 'श्नसोरल्लोपः' (६.४.१११) न स्थानिवद् भवति ।

(८) दीर्घविधिः- दीर्घविधिं प्रति अजादेशो न स्थानिवद् भवति - प्रतिदीव्ना प्रतिदीव्ने। प्रतिदिवन्नित्येतस्य 'भस्य' (६.४.१२९) इत्यधिकृत्य तृतीयैकवचने चतुर्थ्येकवचने च 'अल्लोपोऽनः' (६.४.१३४) इति अकारलोपः परनिमित्तकः, तस्य स्थानिवद्भावाद् 'हलि च' (८.२.७७) इति दीर्घत्वं न स्यात् न ह्मयं वकारो हल्पर इति, अस्माद्वचनाद् भवति ।

(९) जश्विधिः- जश्विधिं प्रत्यजादेशो न स्थानिवद् भवति - ' सग्धिश्च मे सपीतिश्च मे' (वाज सं० १८.९) 'बब्धान्ते हरी धानाः' (नि. ५.१२) अदेः क्तिनि 'बहुलं छन्दसि' (२.४.३९) इति घस्लादेशः 'घसिभसोहलि च' (६.४.१००) इति उपधालोपः ' झलो झलि ' (८.२.२६) इति सलोपः, ' झषस्तथोर्धोऽधः ' (८.२.४०) इति धत्वम्, उपधालोपस्य स्थानिवत्त्वात् 'झलां जश् झशि ' (८.४.५३) इति धकारस्य जश्त्वं न स्याद् अस्माद्वचनाद् भवति । समाना ग्धि समानस्य सभावः सग्धिः । बब्धामिति - भसेर्लोड्द्विवचने शपः श्लुः द्विवचनम्, अभ्यासकार्यम्, 'घसिभसोर्हलि च' (६.४.१००) इति उपधालोपः, 'झलो झलि' (८.२.२६) इति सलोपः 'झषस्तथोर्धोऽधः' (७.२.४०) इति धत्वम्, उपधालोपस्य स्थानिवत्त्वात् 'झलां जश् झशि'(८.४.५३) इति जश्त्वं न स्याद् अस्मद्वचनाद् भवति ।

(१०) चर्विधिः-चर्विधिं प्रत्यजादेशो न स्थानिवद् भवति जक्षतुः, जक्षुः । 'अक्षन्नपितरोऽमीमदन्त पितरः' । (वाज. स. १९.३६) लिड्द्विवचन-बहुवचनयोरदेर्घस्लादेशः, 'गमहनजनखनघसाम् ' (६.४.९८) इत्युपधालोपः, द्विर्वचनम्, अभ्यासकार्यम् । तत्रोपधलोपस्य स्थानिवत्त्वात् ' खरि च' (८.४.५५) इति धकारस्य चर्त्वं न स्यादस्माद्वचनाद् भवति ।

'शासिवसिघसीनां च ' (८.३.६०) इति षत्वम् । अक्षन्नित्यदेलुङ्बहुवचने घस्लादेशच्लेरागतस्य 'मन्त्रे घसह्वर ' (२.४.८०) इति लुक् ' गमहजनखनघसाम् ' (६.४.९८) इत्युपधालोपः, तस्य स्थानिवत्त्वात् 'खरि च ' (८.४.५५) इति चर्त्वं न स्याद् अस्माद्वचनाद् भवति ।

स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवद् भवति, अन्यत्र तु स्थानिवदेव । तेन बहुखट्वकः किर्योः, गिर्योः, वाय्वोरिति स्थानिवत्त्वात् स्वर - दीर्घ - यलोपा न भवन्ति ॥

५९. द्विर्वचनेऽचि ॥ ५९ ॥ (२२४३)

द्विर्वचननिमित्तेऽचि अजादेशः स्थानिवद्भवति द्विर्वचन एव कर्त्तव्ये । रूपातिदेशश्चायं नियतकालः, तेन कृते द्विर्वचने पुनरादेशरूपमेवावतिष्ठते ।

आल्लोपोपधालोपणिलोपयणवायावादेशाः प्रयोजनम् । (म. भा. १.१.५७)।

आल्लोपः - पपतुः, पपुः, । ' आतो लोप इटि च ' (६.४.६४) इत्याकारलोपे कृते तस्य स्थानिवद्भावाद् ' एकाचः ' (६.१.१.) इति द्विर्वचनं भवति ।

उपधालोपः- जघ्नतुः, जघ्नुः। 'गमहनजनखनघसाम्' (६.४.९८) इत्युपधालोपे कृतेऽनच्कत्वाद् द्विर्वचनं न स्यात्, अस्माद्वचनाद् भवति ।

णिलोपः- आटिटत् । अटतेर्णिचि, लुङि, चङि, णिलोपे कृते तस्य स्थानिवत्त्वाद् 'अजादेर्द्वितीयस्य ' (६.१.२) इति टिशब्दस्य द्विर्वचनं भवति ।

यण्-चक्रतुः, चक्रुः । करोतेरतुसि उसि च यणादेशे कृतेऽनच्कत्वाद् द्विर्वचनं न स्यात्, स्थानिवत्त्वाद् भवति ।

अयवायावादेशाः- निनय, निनाय । लुलव, लुलाव । नयतेर्लुनातेश्चोत्तमे णलि गुणे कृते वृद्वौ चायवायावादेशास्तेषां स्थानिवत्त्वान् नेनैलोलाविति द्विर्वचनं भवा।

द्विर्वचन इति किम्? जग्ले । मम्ले। श्रवणमाकारस्य न भवति ।

द्विर्वचननिमित्त इति किम् ? दुद्यूषति । ऊठि यणादेशो न स्थानिवद् भवति ।

अचीति किम् ? जेघ्रीयते, देध्मीयते । ' ई घ्राध्मोः ' (८.४.३१) ' यङि च' (८.४.३०) इति ईकारादेशस्तस्य स्थानिवद्भावादाकारास्य द्विर्वचनं स्यात् । अज्ग्रहणान्न भवति ॥

६०. अदर्शनं लोपः ॥ ६० ॥ (५३)

अदर्शनमश्रवणमनुच्चारणानुपलब्धिरभावो वर्णविनाशः - इत्यनर्थान्तरम् । एतै शब्दैर्योऽर्थोभिधीयते तस्य 'लोपः' इतीयं संज्ञा भवति । अर्थस्येयं संज्ञा, न शब्दस्य । प्रसक्त्तस्यादर्शनं लोपसंज्ञं भवति ।

‘ गोधाया ढ्रक् ’ - (४.१.१२९) गौधेरः (६.१.६६) । पचेरन् । ‘ जीवेरदानुक्’ - (द. उ. १.१६३)। जीरदानु (ऋ. ८.६२.३) स्रिवेमनिन्-आस्त्रेमाणम् । यकारवकारयोरदर्शनमिहोदाहरणम् । अपरस्यानुबन्धादेः प्रसक्तस्य ।

लोपप्रदेशाः- ‘ लोपो व्योर्वलि ’ (६.१.६६) इत्येवमादयः ॥

६१. प्रत्ययस्य लुक्श्लुलुपः ॥ ६१ ॥ (२६०)

‘अदर्शनम्’ इति वर्त्तते । प्रत्ययादर्शनस्य लुक्-श्लु-लुप्-इत्येताः संज्ञा भवन्ति । अनेकसंज्ञाविधानाच्च तद्भावितग्रहणमिह विज्ञायते। लुक्संज्ञाभावितं प्रत्ययादर्शनं लुक्संज्ञं भवति, श्लुसंज्ञाभावितं श्लुसंज्ञं भवति लुप्संज्ञाभावितं लुप्संज्ञं भवति । तेन संज्ञानां सङ्करो न भवति । विधिप्रदेशेषु च भाविनो संज्ञा विज्ञायते । अत्ति। जुहोति। वरणाः ।

प्रत्ययग्रहणं किम्? अगस्तयः । कुण्डिनाः ।

लुक्शलुलुप्प्रदेशाः- ‘ लुक् तद्धितलुकि’, (१.२.४९) ‘जुहोत्यादिभ्यः श्लुः’, (२.४.७५) ‘ जनपदे लुप् ’ (४२८१) इत्येवमादयः ॥

६२. प्रत्ययलोपे प्रत्ययलक्षणम् ॥ ६२ ॥ (२६२)

प्रत्ययनिमित्तं कार्यमसत्यपि प्रत्यये कथं तु नाम स्यादिति सूत्रमिदमारभ्यते । प्रत्ययलोपे कृते प्रत्ययलक्षणं प्रत्ययहेतुकं कार्यं भवति । अग्निचित्, सोमसुत्, अधोगित्यत्र सुप्तिङोर्लुप्तयोः ‘ सुप्तिङन्तं पदम् ’ (१.४.१४) इति पदसंज्ञा भवति। अधोगिति दुहेर्लङि तिपि शब्लुकि तिलोपे घत्वभष्भावजश्त्वचर्त्वेषु कृतेषु रूपम्।

‘प्रत्यय’ इति वर्तमाने पुनः प्रत्ययग्रहणं किम्? कृत्स्नप्रत्ययलोपे यथा स्यात् । इह मा भूत् - आघ्नीय, सङ्ग्मीय । (का० सं० ६९) । हनिगम्योर्लिङात्मनेपदे ‘लिङः सलोपोऽनन्त्यस्य’ (७.२.७९) । इति सीयुट्सकारलोपः प्रत्ययैकदेशलोपः तत्र प्रत्ययलक्षणेन झलीत्यनुनासिकलोपो न भवति ।

प्रत्ययलक्षणमिति किम्? रायः कुलं - रैकुलम्, गवे हितं - गोहितम् - (म. भा. १.१.६२)। आयवादेशौ न भवतः, वर्णाश्रयत्वात् ।

६३. न लुमताऽङ्गस्य ॥ ६३ ॥ (२६३)

पूर्वेणातिप्रसक्तं प्रत्ययलक्षणमिति विशेषे प्रतिषेध उच्यते । लुमता शब्देन लुप्ते प्रत्यये यदङ्गं तस्य प्रत्ययलक्षणं कार्यं न भवति । गर्गाः । मृष्टः । जुहुतः । यञ्शपोर्लुमता लुप्तयोरङ्गस्य गुणवृद्धी न भवतः ।

लुमतेति किम्? कार्यते । हार्यते । (६.४.४१) । अङ्गस्येति किम्? पञ्च । सप्त पयः। साम ॥

६४. अचोऽन्त्यादि टि ॥ ६४ ॥ (८९)

'अचः' इति निर्धारणे षष्ठी । जातावेकवचनम् । अचां संनिविष्टानां योऽन्त्योऽच् तदादि शब्दरूपं टिसंज्ञं भवति । अग्निचित्-इच्छब्दः । सोमसुद् - उच्छब्दः । आताम्,आथाम्-आम् शब्दः। पचेते, पचेथे ।

टिप्रदेशाः - ' टित आत्मनेपदानां टेरे ' (३.४.८९) इत्येवमादयः ॥

६५. अलोऽन्त्यात् पूर्व उपधा ॥ ६५ ॥ (२४९)

धात्वादौ वर्णसमुदायेऽन्त्यादलः पूर्वो यो वर्णः सोऽलेवोपधासंज्ञो भवति । पच् पठ् - अकारः । भिद्, छिद्-इकारः । बुध्, युध्-उकारः । वृत्, वृध्-ऋकारः । अलः इति किम्? शिष्टः शिष्टवान् (म. भा. १.१.६५) । समुदायात् पूर्वस्य मा भूत् । उपधाप्रदेशाः- अत उपधायाः (८.२.११५) इत्येवमादयः ॥

६६. तस्मिन्निति निर्दिष्टे पूर्वस्य ॥ ६६ ॥ (४०)

' तस्मिन् ' इति सप्तम्यर्थनिर्देशे पूर्वस्यैव कार्यं भवति, नोत्तरस्य । 'इको यणचि' (६.१.८८) दध्युदकम्, मध्विदम्, पचत्योदनम् । निर्दिष्टग्रहणमानन्तर्यार्थम् - 'अग्निचिदत्रेति' व्यवहितस्य मा भूत् ॥

६७. तस्मादित्युत्तरस्य ॥ ६७ ॥ (४१)

निर्दिष्टग्रहणमनुवर्त्तते । ' तस्माद् ' इति पञ्चम्यर्थनिर्देशः । उत्तरस्यैव कार्यं भवति, न पूर्वस्य । 'तिङ्ङतिङः' (८.१.२८)-ओदनं पचति । इह न भवति - पचत्योदनमिति ॥

६८. स्वं रूपं शब्दस्याशब्दसंज्ञा ॥ ६८॥ (२५)

शास्त्रे स्वमेव रुपं शब्दस्य ग्राह्यं = बोध्यं=प्रत्याय्यं भवति, न बाह्योऽर्थः, शब्दसंज्ञां वर्जयित्वा । शब्देनार्थावगतेरर्थे कार्यस्यासम्भवात् तद्वाचिनां शब्दानां संप्रत्ययो मा भूदिति सूत्रमिदमारभ्यते । अग्नेर्ढक् (४.२.३३) आग्नेयमष्टाकपालं निर्वपेत् (वै. श्रौ. सू. १.१९)। अग्निशब्दोऽग्निशब्दस्यैव ग्राहको भवति, न ज्वलनः, पावको, धूमकेतुरिति नातः प्रत्ययो भवति ।

'उदश्वितोऽन्यतरस्याम्'(४.२.१९) - औदश्वित्कम् । औदश्वितम् । तक्रम् अरिष्टं, कालशेषं, दण्डाहतं, मथितमिति, नातः प्रत्ययो भवति ।

अशब्दसंज्ञेति किम्? ' दाधा घ्वदाप् ' (१.१.२०) ' तरप्तमपौ घः' (१.१.२३) - घग्रहणेषु च सञ्ज्ञिनां ग्रहणम्, न संज्ञायाः ।

सित्तद्विशेषाणां वृक्षाद्यर्थम् (म. भा. १.१.६८ वा. ५) ॥ सिन्निर्देशः कर्त्तव्यः। ततो वक्तव्यम् - तद्विशेषाणां ग्रहणं भवतीति । किं प्रयोजनम्? वृक्षाद्यर्थम् । विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशुकुन्यश्ववडवपूर्वापराधरोत्तराणाम् (२.४.१२) इति - प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः ।

पित्पर्यायवचनस्य च स्वाद्यर्थम् (म. भा. १.१.६८ वा. ६) ॥ पिन्निर्देशः कर्त्तव्यः। ततो वक्तव्यम्-पर्यायवचनस्य ग्रहणं भवति, चकारात् स्वस्य रूपस्य तद्विशेषाणां चेति । किं प्रयोजनम् ? स्वाद्यर्थम् । 'स्वे पुषः' (३.४.४०) - स्वपोषं पुष्टः । रैपोषम् । धनपोषम्। विद्यापोषम् । अश्वपोषम् । गोपोषम् ।

जित्पर्यायवचनस्यैव राजाद्यर्थम् (म. भा. १.१.६८ वा. ८) ॥ जिन्निर्देशः कर्त्तव्यः। ततो वक्तव्यम् - पर्यायवचनस्यैव ग्रहणं भवतीति, न स्वरूपस्य, नापि तद्विशेषाणाम् । किं प्रयोजनम्? राजाद्यर्थम् । ' सभाराजाऽमनुष्यपूर्वा ' (२.५.२३) - इनसभम्; ईश्वरसभम् । तस्यैव न भवति - राजसभा । तद्विशेषाणां च न भवति - पुष्यमित्रसभा, चन्द्रगुप्तसभा ।

झित्तद्विशेषाणां च मत्स्याद्यर्थम् (म. भा. १.१.६८ वा. ८) ॥ झिन्निर्देशः कर्त्तव्यः । ततो वक्तव्यम् - तस्य च ग्रहणं भवति तद्विशेषाणां चेति । किं प्रयोजनम्? मत्स्याद्यर्थम् । 'पक्षिमत्स्यमृगान् हन्ति' (४.४.३५) इति ठक् । पाक्षिकः, मात्स्यिकः। तद्विशेषाणाम् - शाकुनिकः। पर्यायाणां न भवति - अजिह्मान् हन्ति, अनिमिषान् हन्तीति । अस्यैकस्येष्यते (मा. भा. १.१.६८) - मीनान् हन्तीति मैनिकः ।

६९. अणुदित्सवर्णस्य चाप्रत्ययः ॥ ६९ ॥ (२४)

परेण णकारेण प्रत्याहारग्रहणम् । अण्, गृह्यमाण उदिच्च सवर्णानां ग्राहको भवति स्वस्य च रूपस्य; प्रत्ययं वर्जयित्वा । 'आद् गुणः' , (६.१.८७) ' अस्य च्वौ' , (७.४.३२) 'यस्येति च' (६.४.१४८) स्वरानुनासिक्यकालभिन्नस्य ग्रहणं भवति (म. भा. १.१.६९) उदित्खल्वपि - 'चुटू' (१.३.७) 'लशक्वतद्धिते' (१.३.८) । चवर्गटवर्गयोः कवर्गस्य च ग्रहणं भवति।

अप्रत्यय इति किम्? 'सनाशंसभिक्ष उः' (३.२.१६८) 'अ सांप्रतिके' (४.३.९) दीर्घो न भवति॥

७०. तपरस्तत्कालस्य ॥ ७० ॥ (१५)

तः परो यस्मात्सोऽयं तपरः, तादपि परस्तपरः, तपरो वर्णस्तत्कालस्यात्मना तुल्यकालस्य गुणान्तरयुक्तस्य सवर्णस्य ग्राहको भवति, स्वस्य च रूपस्य । विध्यर्थमिदम् । 'अण्' इति नानुवर्तते । अणामन्येषां च तपराणाम् इदमेव ग्रहणकशास्त्रम् । 'अतो भिस ऐस्' (२७.१.९) इत्येवमादिषु पूर्वग्रहणकशास्त्रं न प्रवर्त्तत एव । अतपरा अणस्तस्यावकाशः।

किमुदाहरणम्? अतो भिस ऐस् - वृक्षैः, प्लक्षैः । विड्वनोरनुनासिकस्यात् (६.४.४१) - अब्जाः, गोजाः (ऋ. ४.४०.५)। तत्कालस्येति किम्? खट्वाभिः, मालाभिः ॥

७१. आदिरन्त्येन सहेता ॥ ७१ ॥ (२)

आदिरन्त्येनेत्संज्ञकेन सह गृह्यमाणस्तन्मध्यपतितानां वर्णानां ग्राहको भवति, स्वस्य च रूपस्य । अण् । अक् । अच् । हल् । सुप् । तिङ् ।

अन्त्येनेति किम्? सुडिति तृतीयैकवचनेन 'टा' इत्यनेन ग्रहणं मा भूत् ॥

७२. येन विधिस्तदन्तस्य ॥ ७२ ॥ (२३)

येन विशेषणेन विधिर्विधीयते स तदन्तस्यात्मान्तस्य समुदायस्य ग्राहको [संज्ञा] भवति, स्वस्य च रूपस्य । 'एरच्' (३.३.५६) इवर्णान्तादच्प्रत्ययो भवति - चयः, जयः, अयः। 'ओरावश्यके' (३.१.१२५) उवर्णान्ताद् ण्यद्भवति - अवश्यलाव्यम्, अवश्यपाव्यम् ॥

समासप्रत्ययविधौ तदन्तविधेः प्रतिषेधो वक्तव्यः (म. भा. १.१.८२ वा. १) द्वितीयान्तं श्रितादिभिः सह समस्यते (२.१.२४) कष्टश्रितः । इह मा भूत् - कष्टं परमश्रित इति । प्रत्ययविधौ - 'नडादिभ्यः फक्' (४.१.९९) नडस्यापत्यं नाडायनः। इह मा भूत् - सूत्रनडस्यापत्यं सौत्रनाडिः ।

किमविशेषेण? नेत्याह ।

उगिद्वर्णग्रहणवर्जमिति वाच्यम् (म. भा. १.१.८२ वा. २) । 'उगितश्च' (४.१.६) इति ङीप्प्रत्ययस्तदन्तादपि भवति । भवती, अतिभवती । वर्णग्रहणम् -'अत इञ्'। (४.१.९५) दाक्षिः, प्लाक्षिः ।

यस्मिन्विधिस्तदादावल्ग्रहणे (म. भा. १.१.७२ वा.१) । अल्ग्रहणेषु यस्मिन्विधिस्तदादाविति वक्तव्यम् । 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' (६.४.७७) इति - श्रियः, भ्रुवः ॥

७३. वृद्धिर्यस्याचामादिस्तद् वृद्धम् ॥ ७३ ॥ (१३३५)

यस्येति समुदाय उच्यते । अचां मध्ये यस्य वृद्धिसंज्ञक आदिभूतस्तच्छब्दरूपं वृद्धसंज्ञं भवति । 'अचाम्' इति जातौ बहुवचनम् । शालीयः, मालीयः, औपगवीयः, कापटवीयः (४.२.११४) ।

आदिरिति किम् ? सभासन्नयने भवः साभासन्नयनः (४.३.५३) (म. भा. १.१.७३) ।

वा नामधेयस्य वृद्धसंज्ञा वक्तव्या (म०. भा. १.१.७३ वा. १) । देवदत्तीयाः, दैवदत्ताः (४.३.१२०) ।

गोत्रान्तादसमस्तवत् प्रत्ययो भवतीति वक्तव्यम् (म. भा. १.१.७३ वा. ३)। घृतप्रधानो रौढिः घृतरौढिः, तस्य छात्रा घृतरौढीयाः। ओदनप्रधानः पाणिनिः ओदनपाणिनिः, तस्य छात्रा ओदनपाणिनीयाः, वृद्धाम्भीयाः, वृद्धकाश्यपीयाः।

जिह्वाकात्यहरितकात्यवर्जम् (म. भा. १.१.७३ वा० ४) जैह्वाकाताः, हारितकाताः (४.३.१२०) ॥

७४. त्यदादीनि च ॥ ७४ ॥ (१३३६)

यस्याचामादिग्रहणमुत्तरार्थमनुवर्तते । इह तु न सम्बध्यते । त्यदादीनि शब्दरूपाणि वृद्धसंज्ञानि भवन्ति । त्यदीयम्, तदीयम्, एतदीयम्, इदमीयम्, अदसीयम्; त्वदीयम्, त्वादायनिः; (४.१.१५७) मदीयम्, मादायनिः; भवदीयम्, किमीयम् ॥

७५ एङ् प्राचां देशे ॥ ७५ ॥ (१३३८)

यस्याचामादिग्रहणमनुवर्त्तते । एङ् यस्याचामादिस्तत्प्राचां देशाभिधाने वृद्धसंज्ञं भवति । एणीपचनीयः, भोजकटीयः, गोनर्दीयः ।

एङिति किम्? आहिच्छत्रः, कान्यकुब्जः । प्राचामिति किम् ? देवदत्तो नाम वाहीकेषु ग्रामः तत्र भवो दैवदत्तः ।

देशे इति किम्? गोमत्यां भवा - मत्स्या गौमताः ।

प्रागुदञ्चौ विभजते हंसः क्षीरोदके यथा ।
विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती ॥

॥ इति श्रीजयादित्यविरचितायां काशिकावृत्तौ प्रथमाध्यायस्य प्रथमः पादः ॥

अथ प्रथमाध्याये

द्वितीयः पादः

१६. गाङ्कुटादिभ्योऽञ्णिन्ङित् ॥ १ ॥ (२४६१)

अतिदेशोऽयम् । ' गाङ् ' इति इङादेशो (२.४.४९) गृह्यते, न ' गाङ् गतौ' (धा. पा. ९५०) इति; ङकारस्यानन्यार्थत्वात् । कुटादयोऽपि - ' कुट कौटिल्ये ' (धा. पा. १३६७) इत्येतदारभ्य यावत् ' कुङ् शब्दे ' (धा. पा. १४०२) इति । एभ्यो गाङ्कुटादिभ्यः परेऽञ्णितः प्रत्ययाः ङितो भवन्ति । ङिद्वद् भवन्तीत्यर्थः । गाङः- अध्यगीषाताम्, अध्यगीषत । कुटादिभ्यः - कुटिता (१.१.५), कुटितुम्, कुटितव्यम्। उत्पुटिता, उत्पुटितुम्, उत्पुटितव्यम् ।

अञ्णिदिति किम्? उत्कोटयति (३.१.२६), उच्चुकोट (३.४.४२), उत्कोटकः (३.१.१३३), उत्कोटो (३.३.१८) वर्तते।

व्यचेः कुटादित्वमनसीति वक्तव्यम् । विचिता, विचितुम्, विचितव्यम् । अनसीति किम्? उ रु व्यचाः। (ऋ० १.१०४.९)

७७. विज इट् ॥ २ ॥ (२५३६)

'ओविजी भयचलनयोः' (धा. पा. १२९०), अस्मात्परः इडादिः प्रत्ययो ङिद्वद् भवति । उद्विजिता, उद्विजितुम्, उद्विजितव्यम् ।

इडिति किम्? उद्वेजनम्, (३.३.११३) उद्वेजनीयम् (३.१.९६) ।

७८. विभाषोर्णोः ॥ ३ ॥ (२४४७)

' इट् ' इति वर्तते । ' ऊर्णुञ् आच्छादने ' (धा. पा. १०३९), अस्मात्पर इडादिः प्रत्ययो विभाषा ङिद्वद् भवति । प्रोर्णुविता, प्रोर्णविता । इडित्येव-प्रोर्णवनम्, प्रोर्णवनीयम् ।

७९. सार्वधातुकमपित् ॥ ४ ॥ (२२३४)

सार्वधातुकं यदपित् तत् ङिद्वद् भवति । कुरुतः, कुर्वन्ति । चिनुतः, चिन्वन्ति ।

सार्वधातुकमिति किम् ? कर्ता, कर्तुम्, कर्तव्यम् । अपिदिति किम्? करोति, करोषि, करोमि ॥

८०. असंयोगाल्लिट् कित् ॥ ५ ॥ (२२४२)

' अपित् ' इति वर्तते । असंयोगान्ताद्धातोः परो लिट् प्रत्ययोऽपित् किद् भवति । बिभिदतुः, बिभिदुः। चिच्छिदतुः, चिच्छिदुः । ईजतुः, ईजुः।

असंयोगादिति किम् ? सस्रंसे, दध्वंसे । अपिदित्येव - बिभेदिथ ॥

८१. इन्धिभवतिभ्यां च ॥ ६ ॥ (३३९३)

'इन्धि - भवति' इत्येताभ्यां परो लिट् प्रत्ययः किद् भवति । 'समीधे' दस्युहन्तमम् (ऋ. ६.१६.१५), पुत्रईधे अथर्वणः (ऋ. ६.१६.१४) । भवतेः खल्वपि - बभूव । बभूविथ ।

इन्धेः संयोगार्थं ग्रहणम् । भवतेः पिदर्थम् (म. भा. १.२.६)। अत्रेष्टिः-श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति वक्तव्यम् ॥ श्रेथतुः, श्रेथुः । ग्रेथतुः, ग्रेथुः। देभतुः, देभुः। परिषस्वजे, परिषस्वजाते ॥

८२. मृडमृदगुधकुषक्लिशवदवसः क्त्वा ॥ ७ ॥ (३३२३)

मृड, मृद, गुध, कुष, क्लिश, वद, वस् - इत्येतेभ्यः परः क्त्वाप्रत्ययः किद् भवति । 'न क्त्वा सेट् ' (१.२.१८) इति कित्त्वप्रतिषेधं वक्ष्यति, तस्यायं पुरस्तादपकर्षः। गुध-कुष-क्लिशीनां तु 'रलो व्युपधाद्धलादेः संश्च' (१.२.२६) इति विकल्पे प्राप्ते नित्यार्थं वचनम् । मृदित्वा। मृडित्वा। गुधित्वा । कुषित्वा । क्लिशित्वा । उदित्वा । उषित्वा ॥

८३. रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ॥ ८ ॥ (२६०९)

रुद, विद, मुष, ग्रहि, स्वपि, प्रच्छ - इत्येतेभ्यः संश्च क्त्वा च कितौ भवतः। रुद - विद - मुषीणां ' रलो व्युपधाद्धलादेः संश्च ' (१.२.२६) इति विकल्पे प्राप्ते नित्यार्थं ग्रहणम् । ग्रहेर्विध्यर्थमेव । स्वपिप्रच्छयोः सन्नर्थं ग्रहणम्, किदेव हि क्त्वा । रुदित्वा, रुरुदिषति । विदित्वा, विविदिषति । मुषित्वा, मुमुषिषति । गृहीत्वा, जिघृक्षति । सुप्त्वा, सुषुप्सति । पृष्ट्वा, पिपृच्छिषति । ग्रहादीनां कित्त्वात् संप्रसारणं भवति । 'किरश्च पञ्चभ्यः' (७.२.७५) इति प्रच्छेरिडागमः ॥

८४. इको झल् ॥ ९ ॥ (२६१२)

'सन्' इत्यनुवर्तते । 'क्त्वा' इति निवृत्तम् । इगन्ताद्धातोः परो झलादिः सन् किद् भवति । चिचीषति । तुष्टूषति । चिकीर्षति ।

इक इति किम्? पिपासति । तिष्ठासति । झल् इति किम्? शिशयिषते ।

किमर्थमिदमुच्यते? गुणो मा भूदिति । ' अज्झनगमां सनि ' (६.४.१६) इति दीर्घत्वं गुणस्य बाधकं भविष्यति ? यथैव तर्हि दीर्घत्वं गुणं बाधते तथा णिलोपमपि बाधेत । तस्माद् दीर्घत्वस्यावकाशदानाय कित्त्वमिदमारभ्यते । चिचीषतीत्यादिषु सावकाशं दीर्घत्वं परत्वाद् णिलोपेन बाध्यते (६.४.२१) ज्ञीप्सति ।

इकः कित्त्वं गुणो मा भूद्दीर्घारम्भात्कृते भवेत् ।
अनर्थकं तु ह्रस्वार्थं दीर्घाणां तु प्रसज्यते ॥ १ ॥
सामर्थ्याद्धि पुनर्भाव्यमृदित्वं दीर्घसंश्रयम् ।
दीर्घाणां नाकृते दीर्घे णिलोपस्तु प्रयोजनम् ॥ २ ॥

(म. भा. १.२.९ वा. १-१०)

८५. हलन्ताच्च ॥ १० ॥ (२६१३)

' इकः सन् झल्कित् ' इति वर्तते । समीपवचनोऽन्तशब्दः । हल् चासावन्तश्च हलन्तः। इगन्तादिक्समीपाद्धलः परः सन झलादिः किद् भवति । बिभित्सति । बुभुत्सते। इकः इत्येव - यियक्षते । झल् इत्येव-विवर्तिषते ।

दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात् सिद्धम् । धीप्सति । धिप्सति (६.४.२४)॥

८६. लिङ्सिचावात्मनेपदेषु ॥ ११ ॥ (२३००)

'हलन्तादिको झल्कित्' इति वर्तते । 'सन्' इति निवृत्तम् । इगन्तादिक्समीपाद्धलः परौ झलादी लिङ्सिचौ आत्मनेपदेषु परतः कितौ भवतः। भित्सीष्ट, सिचि खल्वपि - अभित्त, अबुद्ध। इकः इत्येव - यक्षीष्ट, अयष्ट । संप्रसारणं (६.१.१५) हि स्यात् ।

आत्मनेपदेष्विति किम् ? अस्राक्षीत्, अद्राक्षीत् । ' सृजिदृशोर्झल्यमकिति ' (६.१.५८) इत्यमागमो न स्यात् । हलन्तादित्येव - चेषीष्ट, अचेष्ट । गुणो न स्यात्। झलित्येव - वर्तिषीष्ट, अवर्त्तिष्ट । गुणो न स्यात् ।

लिङ्सिचाविति किम् ? द्वेष्टा, द्वेक्ष्यति ॥

८७. उश्च ॥ १२ ॥ (२३६८)

'ऋवर्णान्ताद्धातोः परो लिङ्सिचावात्मनेपदेषु झलादी कितौ भवतः । कृषीष्ट । हृषीष्ट । सिचः खल्वपि- अकृत । अहृत । झलित्येव - वरिषीष्ट, अवरिष्ट । ' वृतो वा ' (७.२.३८)। अवरीष्ट ॥

८८. वा गमः ॥ १३ ॥ (२७००)

' लिङ्सिचावात्मनेपदेषु ' इति वर्तते । गमेर्धातोः परौ लिङ्सिचौ आत्मनेपदेषु झलादी वा कितौ भवतः । संगंसीष्ट, संगसीष्ट । सिचः खल्वपि - समगत, समगंस्त । कित्त्वपक्षे अनुनासिकलोपो भवति ' अनुदात्तोपदेशवनतितनोत्यादीनाम्' (६.४.३७) इति ॥

८९. हनः सिच् ॥ १४ ॥ (२६९७)

हन्तेर्धातोः परः सिच् किद् भवति । आहत, आहसाताम्, आहसत । सिचः कित्त्वादनुनासिकलोपः (६.४.३७) । सिज्ग्रहणं लिङ्निवृत्त्यर्थम्, उत्तरत्रानुवृत्तिर्मा भूत् ।

आत्मनेपदग्रहणमुत्तरार्थमनुवर्तते । इह तु परस्मैपदे हन्तेर्वधभावस्य नित्यत्वात् कित्त्वस्य प्रयोजनं नास्ति ॥

९०. यमो गन्धने ॥ १५ ॥ (२६९८)

'सिच्, आत्मनेपदेषु' इति वर्तते । यमेर्धातोर्गन्धने वर्तमानात् परः सिच् प्रत्ययः किद् भवति आत्मनेपदेषु परतः । गन्धनम्= सूचनम्, परेण प्रच्छाद्यमानस्यावद्यस्याविष्करणम् । अनेकार्थत्वाद्धातूनां यमिस्तत्र वर्तते ।

उदायत, उदायसाताम्, उदायसत । सूचितवानित्यर्थः । सिचः कित्त्वादनुनासिकलोपः (६.४.३७)। आङो यमहनः (१.३.२८) इत्यात्मनेपदम् ।

गन्धन इति किम् ? उदायंस्त पादम् । उदायंस्त कूपादुदकम् । उद्धृतवानित्यर्थः। सकर्मकत्वेऽपि ' समुदाङ्भ्यो यमोऽग्रन्थे ' (१.३.७५) इत्यात्मनेपदम् ॥

९१. विभाषोपयमने ॥ १६ ॥ (२७३०)

' यमः सिच्, आत्मनेपदेषु ' इति वर्तते । यमेर्धातोरुपयमने वर्तमानात् परः सिच् प्रत्ययो विभाषा किद् भवति आत्मनेपदेषु परतः । उपायत कन्याम्, उपायंस्त कन्याम् । उपायत भार्याम्, उपायंस्त भार्याम् ।

' उपयमनम्=स्वीकरणम् ' विवाहः, दारकर्म, पाणिग्रहणमित्यर्थः । ' उपाद्यमः स्वकरणे ' (१.३.५६) इत्यात्मनेपदम् ॥

९२. स्थाघ्वोरिच्च ॥ १७ ॥ (२३८९)

' सिच् आत्मनेपदेषु ' इति वर्तते । तिष्ठतेर्धातोः घुसंज्ञकानां च इकारश्चान्तादेशः

सिच्च किद् भवति आत्मनेपदेषु परतः । उपास्थित, उपास्थिषाताम्, उपास्थिषत । घुसंज्ञकानाम् - अदित, अधित ।

इच्च कस्य तकारेत्त्वं दीर्घो मा भूद्दृतेऽपि सः ।

अनन्तरे प्लुतो मा भूत् प्लुतश्च विषये स्मृतः ॥ (म. भा. १.२.१७ वा. १-५)

९३. न क्त्वा सेट् ॥ १८ ॥ (३३२२)

क्त्वाप्रत्ययः सेट् न किद् भवति । देवित्वा, वर्त्तित्वा ।

सेडिति किम्? कृत्वा, हृत्वा । क्त्वाग्रहणं किम्? निगृहीतिः (का. सं. २०.५) । उपस्निहितिः । निकुचितिः ॥

न सेडिति कृतेऽकित्त्वे निष्ठायामवधारणात् ।

ज्ञापकान्न परोक्षायां सनि झल्ग्रहणं विदुः ॥ (म. भा. १.२००)

इत्वं कित्संनियोगेन रेण तुल्यं सुधीवनि ।

वस्वर्थं किदतौदेशान्निगृहीतिः प्रयोजनम् ॥ (म. भा. १.२.१८ वा. १-९)

९४. निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः ॥ १९ ॥ (३०५२)

'न सेट्' इति वर्तते । शीङ्-स्विदि-मिदि-क्ष्विदि-धृष्-इत्येतेभ्यः परो निष्ठाप्रत्ययः सेट् न किद् भवति ।

शयितः, शयितवान् । प्रस्वेदितः, प्रस्वेदितवान् । मेदितः, प्रमेदितवान् । प्रक्ष्वेदितः, प्रक्ष्वेदितवान्। प्रधर्षितः, प्रधर्षितवान् । सेडित्येव-स्विन्नः, स्विन्नवान् । स्विदादीनाम् आदितश्च (७.२.१६) । इति निष्ठायामिट् प्रतिषिध्यते । विभाषा भावादिकर्मणोः (७.२ १७) इति पक्षेऽभ्यनुज्ञायते, स विषयः कित्त्वप्रतिषेधस्य ॥

९५. मृषस्तितिक्षायाम् ॥ २० ॥ (३०५५)

मृषेर्धातोः तितिक्षायामर्थे निष्ठा सेट् न किद्भवति । तितिक्षा=क्षमा । मर्षितः, मर्षितवान्। तितिक्षायामिति किम्? अपमृषितं वाक्यमाह ॥

९६. उदुपधाद्भावादिकर्मणोरन्यतरस्याम् ॥ २१ ॥ (३०५६)

' निष्टा, सेण्न, कित् ' इति वर्तते । उदुपधाद्धातोः परो भावे आदिकर्मणि च वर्तमानो निष्ठाप्रत्ययः सेडन्यतरस्यां न किद्भवति । द्युतितमनेन, द्योतितमनेन । प्रद्युतितः, प्रद्योतितः। मुदितमनेन, मोदितमनेन । प्रमुदितः, प्रमोदितः ।

उदुपधादिति किम्? लिखितमनेन । भावादिकर्मणोरिति किम्? रुचितं कार्षापणं ददाति। सेडित्येव-प्रभुक्त ओदनः ।

व्यवस्थितविभाषा चेयम् । तेन शब्विकरणानामेव भवति । ' गुध परिवेष्टने ' (धा. पा. ११२०), गुधितमित्यत्र न भवति ॥

९७. पूङः क्त्वा च ॥ २२ ॥ (३०५१)

'अन्यतरस्याम्' इति न स्वर्यते; उत्तरसूत्रे पुनर्वावचनात् । 'न सेट्' इति वर्तते। पूङश्च इड्विहितः ' क्लिशः क्त्वानिष्ठयोः ', (७.२.५०), ' पूङश्च ' (७.२.५१) इति । पूङःपरो निष्ठाप्रत्ययः क्त्वा च सेण्न किद्भवति । पवितः पवितवान् ।

क्त्वाप्रत्ययस्य ' न क्त्वा सेट् ' (१.२.१८) इति सिद्ध एव प्रतिषेधः । तस्य ग्रहणमुत्तरार्थम् । तथा चोक्तम्- ' नित्यमकित्त्वमिडाद्योः क्त्वानिष्ठयोः कत्वाग्रहणमुत्तरार्थम्' (म. भा. १.२.२२ वा. ३) इति [भारद्वाजीयाः पठन्ति] ॥

९८. नोपधात् थफान्ताद्वा ॥ २३ ॥ (३३२४)

निष्ठा इति निवृत्तम् नकारोपधाद्धातोस्थकारान्ताच्च परः क्त्वाप्रत्ययः सेड् वा न किद्भवति । ग्रथित्वा, ग्रन्थित्वा । श्रथित्वा, श्रन्थित्वा । गुफित्वा, गम्फित्वा ।

नोपधादिति किम्? रेफित्वा । गोफित्वा । थफान्तादिति किम्? स्रंसित्वा । ध्वंसित्वा॥

९९. वञ्चि-लुञ्च्यृतश्च ॥ २४ ॥ (३३२५)

वञ्चि-लुञ्चि-ऋत्-इत्येतेभ्यः परः क्त्वाप्रत्ययः सेड् वा न किद् भवति ।
वचित्वा, वञ्चित्वा । लुचित्वा, लुञ्चित्वा । ऋतित्वा, अर्तित्वा । 'ऋतेरीयङ्' (३.१.२९) आर्धधातुके विकल्पितः (३.१.३१) । स यत्र पक्षे नास्ति तत्रेदमुदाहरणम् । सेडित्येव - वक्त्वा॥

१००. तृषिमृषिकृशेः काश्यपस्य ॥ २५ ॥ (३३२६)

' न क्त्वा सेट् ' (१.२.१८) । इति प्रतिषेधे प्राप्ते कित्त्वं विकल्प्यते । तृषि, मृषि, कृशि - इत्येतेभ्यः परः क्त्वाप्रत्ययः सेट् काश्यपस्याचार्यस्य मते वा न किद् भवति । तृषित्वा, तर्षित्वा । मृषित्वा, मर्षित्वा । कृशित्वा, कर्शित्वा । काश्यपग्रहणं पूजार्थम् वा इत्येव हि वर्त्तते (म. भा. १.२.२५) ॥

१०१. रलो व्युपधाद्धलादेः संश्च ॥ २३ ॥ (२६१७)

' वा ' इति वर्तते, ' सेट् ' इति च । उश्च इश्च वी, वी उपधे यस्य स व्युपधः। उकारोपधादिकारोपधाच्च धातोः रलन्ताद्धलादेः परः संश्च क्त्वा च सेटौ वा कितौ भवतः । द्युतित्वा, द्योतित्वा । दिद्युतिषते, दिद्योतिषते । लिखित्वा, लेखित्वा । लिलिखिषति, लिलेखिषति।

रलः इति किम् ? देवित्वा, दिदेविषति । व्युपधादिति किम् ? वर्त्तित्वा, विवर्त्तिषते । हलादेरिति किम् ? एषित्वा, एषिषिषति । सेडित्येव - भुक्त्वा, बुभुक्षते॥

१०२. ऊकालोऽज्झ्रस्वदीर्घप्लुतः ॥ २७ ॥ (४)

' ऊ ' इति त्रयाणामयं ' मात्रिक - द्विमात्रिक - त्रिमात्रिकाणां प्रश्लिष्टनिर्देशः' (तै. प्रा. १.३१) । ' ह्रस्वदीर्घप्लुतः ' इति द्वन्द्वैकवद्भावे पुंल्लिङ्गनिर्देशः । उ ऊ ऊ३ - इत्येवंकालोऽज् यथाक्रमं ' ह्रस्वदीर्घप्लुतः' - इत्येवं संज्ञो भवति । उकालो ह्रस्वः - दधि, मधु । ऊकालो दीर्घः- कुमारी, गौरी । ऊ३कालः प्लुतः - देवदत्त ३ अत्र न्वसि ।

कालग्रहणं परिमाणार्थम् ; दीर्घप्लुतयोः ह्रस्वसंज्ञा मा भूत् । आलूय, प्रलूय - ' ह्रस्वस्य पिति कृति तुक् ' (३.१.७१) । इति तुङ् न भवति ।

अज्ग्रहणं संयोगाच्चसमुदायनिवृत्त्यर्थम् - (म. भा. १.२.२८ वा. ४) प्रतक्ष्य, प्ररक्ष्य, ह्रस्वाश्रयस्तुङ् मा भूत् । तितउच्छत्रम् - ' दीर्घात् ' (६.१.७५) ।
' पदान्ताद्वा ' (६.१.७६) । इति विभाषा तुङ् मा भूत् (म. भा. १.२.२८) ।

ह्रस्वदीर्घप्लुतप्रदेशाः - 'ह्रस्वो नपुंसके प्रातिपदिकस्य' , (१.२.४७) । 'अकृत्सार्वधातुकयोर्दीर्घः', (७.४.२५) । ' वाक्यस्य टेः प्लुत उदात्तः ' (८.२.८२)॥

१०३ अचश्च ॥ २८ ॥ (३५)

परिभाषेयं स्थानिनियमार्था । ह्रस्वदीर्घप्लुताः स्वसंज्ञया शिष्यमाणा अच एव स्थाने वेदितव्याः । वक्ष्यति - ह्रस्वो नपुंसके प्रातिपदिकस्य (१.२.४७) । रै - अतिरि । नौ - अतिनु। गो - उपगु ।

अच इति किम् ? सुवाग् बाहमणकुलम् । 'अकृत्सार्वधातुकयोर्दीर्घः' - (७.४.२५)। चीयते, श्रूयते । अच इति किम् ? भिद्यते । छिद्यते (म. भा. १.२.२८ वा. ३) । ' वाक्यस्य टेः प्लुत उदात्तः' (८.२.८२) देवदत्त३, यज्ञदत्त३। अच इति किम् ? अग्निचि३त् सोमसु३त् - तकारस्य मा भूत् ।

स्वसंज्ञया विधाने नियमः (म. भा. १.२.२८ वा. ३) । अच् इति वर्तते, इह मा भूत् - द्यौः, पन्थाः, सः । द्युभ्याम्, द्युभिः । अत्र नियमो नास्ति ॥

१०४.उच्चैरुदात्तः ॥ २९ ॥ (५)

'अच्' इति वर्तते । उदात्तादिशब्दाः स्वरे = वर्णधर्मे लोकवेदयोः प्रसिद्धा एव, त इह तद्गुणेऽचि परिभाष्यन्ते । उच्चैरुपलभ्यमानो योऽच् स उदात्तसंज्ञो भवति ।

उच्चैरिति च श्रुतिप्रकर्षो न गृह्यते - उच्चैर्भाषते, उच्चैः पठतीति; किं तर्हि? स्थानकृतमुच्चत्वं संज्ञिनो विशेषणम् । ताल्वादिषु हि भागवत्सु स्थानेषु वर्णा निष्पद्यन्ते, तत्र यः समाने स्थाने ऊर्ध्वभागनिष्पन्नोऽच् स उदात्तसंज्ञो भवति । यस्मिन्नुच्चार्यमाणे गात्राणामायामः - निग्रहो भवति, रूक्षता = अस्निग्धता स्वरस्य, संवृतता कण्ठविवरस्य। ये, ते, के ।

उदात्तप्रदेशाः- ' आद्युदात्तश्च ' (३.१.३) इत्येवमादयः ॥

१०५. नीचैरनुदात्तः ॥ ३० ॥ (६)

'अच्' इति वर्तते । नीचैरुपलभ्यमानो योऽच् सोऽनुदात्तसंज्ञो भवति । समाने स्थाने नीचभागे निष्पन्नोऽच् अनुदात्तः । यस्मिन्नुच्चार्यमाणे गात्राणामन्ववसर्गः = मार्दवं भवति, स्वरस्य मृदुता = स्निग्धता, कण्ठविवरस्योरुता = महत्ता । त्व-सम-सिम-नेमं इत्यनुच्चानि । नमस्ते रुद्र नीलकण्ठ सहस्त्राक्ष (?) ।

अनुदात्तप्रदेशाः - ' अनुदात्तौ सुप्पितौ ' (३.१.४) इत्येवमादयः ॥

१०६. समाहारः स्वरितः ॥ ३१ ॥ (७)

'अच्' इति वर्तते । उदात्तानुदात्तस्वरसमाहारो योऽच् स स्वरितसंज्ञो भवति। सामर्थ्याच्चात्र लोकवेदयोः प्रसिद्धौ गुणावेव वर्णधर्मावुदात्तानुदात्तौ गृह्येते, नाचौ । तौ समाह्रियेते यस्मिन्नचि तस्य स्वरित इत्येषा संज्ञा विधीयते । शिक्यम्, कन्या, सामन्यः क्व

स्वरितप्रदेशाः - ' तित्स्वरितम् ' (६.१.१८५) इत्येवमादयः ॥

१०७. तस्यादित उदात्तमर्धह्रस्वम् ॥ ३२ ॥ (८)

'उदात्तानुदात्तस्वरसमाहारः स्वरितः' इत्युक्तम् । तत्र न ज्ञायते - कस्मिन्नंशे उदात्तः? कस्मिन्नंशेऽनुदात्तः? कियान्वा उदात्तः? कियान्वा अनुदात्त इति?

तदुभयमनेनाख्यायते । तस्य स्वरितस्य आदावर्धह्रस्वमुदात्तम्, परिशिष्टमनुदात्तम् । 'अर्धह्रस्वम् ' इति चार्धमात्रोपलक्ष्यते ।

ह्रस्वग्रहणमतन्त्रम् । सर्वेषामेव ह्रस्वदीर्घप्लुतानां स्वरितानामेषः स्वरविभागः। शिक्यमित्यत्रार्द्धमात्रा आदित उदात्ता, अपरार्धमात्रा अनुदात्ता, एकश्रुतिर्वा । कन्या इत्यत्रार्द्धमात्राऽऽदित उदात्ता, अध्यर्धमात्रा अनुदात्ता । माणवक ३ माणवक (८.२.१०३) इत्यत्रार्धमात्राऽऽदित उदात्ता, अर्धतृतीयमात्रा अनुदात्ता ॥

१०८. एकश्रुति दूरात्संबुद्धौ ॥ ३३ ॥ (३६६२)

त्रैस्वर्ये पदानां प्राप्ते दूरात्संबुद्धावैकश्रुत्यं विधीयते । एका श्रुतिर्यस्य तदिदमेकश्रुतिः । एकश्रुतिः वाक्यं भवति । दूरात्संबोधयति येन वाक्येन तत्संबोधनं = संबद्धिः, नैकवचनं संबुद्धिः। स्वराणामुदात्तादीनामविभागो = भेदतिरोधानमेकश्रुतिः। आगच्छ भो माणवक देवदत्त३॥

दूरादिति किम् ? आगच्छ भो माणवक देवदत्त३ ॥

१०९. यज्ञकर्मण्यजपन्यूङ्खसामसु ॥ ३४ ॥ (३६६३)

त्रैस्वर्येण वेदे मन्त्राः पठ्यन्ते, तेषां यज्ञक्रियायामपि तथैव प्रयोगे प्राप्ते एकश्रुतिर्विधीयते, जपन्यूङ्खसामानि वर्जयित्वा । यज्ञकर्मणि मन्त्राणामैकश्रुत्यं भवति।

अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् ।

अपां रेतांसि जिन्वतो३म् (ऋ० ८.४४.१६)

यज्ञकर्मणीति किम्? संपाठे मा भूत् । अजपेष्विति किम् ? ममाग्ने वर्चो विह वेष्वस्तु (ऋ० १०.१२८.१) । जपः = अनुकरणमन्त्रः, उपांशुप्रयोगः ।

अन्यूङ्खेति किम्? न्यूङ्खा ओकाराः षोडशः , तेषु केचिदुदात्ताः, केचिदनुदात्ताः।

असामसु इति किम् ? ए३ विश्व समत्रिणं दह३ (जै. स. अ. ११) । सामानि वक्यविशेषस्था गीतय उच्यन्ते । तत्रैकश्रुतिर्न भवति ॥

११०. उच्चैस्तरां वा वषट्कारः ॥ ३४ ॥ (३६६४)

' यज्ञकर्मणि ' इति वर्तते । यज्ञकर्मणि वषट्कारः उच्चैस्तरां वा भवति, एकश्रुतिर्वा । ' वषट् ' शब्देनात्र ' वौषट् ' शब्दो लक्ष्यते, ' वौषट् ' - इत्यस्यैवेदं स्वरविधानम् ।

यद्येवम्, वौषड्ग्रहणमेव कस्मान्न कृतम् ? वैचित्र्यार्थम् । विचित्रा हि सूत्रस्य कृतिः पाणिनेः ।

सोमस्याग्ने विहीɜवौɜषट् । सोमस्याग्ने वीहीɜ वौɜषट् (ए. ब्रा. ɜ.५.४.६) ॥

१११. विभाषा छन्दसि ॥ ɜ६ ॥ (ɜ६६५)

छन्दसि विषये विभाषा एकश्रुतिर्भवति, पक्षान्तरे त्रैस्वर्यमेव भवति । वेति प्रकृते विभाषाग्रहणं ' यज्ञकर्मणि ' इत्यस्य निवृत्यर्थम् । तेनायं स्वाध्यायकालेऽपि पाक्षिक ऐकश्रुत्यविधिर्भवति । ' इषे त्वोर्जे त्वा ' । इषे त्वोर्जे त्वा (वाज. सं. १.१.१) । अग्न आया हि वीतये । अग्न आयाहि वीतये (ऋ. ६.१६.१०) ।
'अग्निमीळे पुरोहितम्' । अग्निमीळे पुरोहितम् (ऋ. १.१.१) । शंनो दे वीरभिष्टये। शंनो देवीरभिष्टये (ऋ. १०.९.४) ॥

११२. न सुब्रह्मण्यायां स्वरितस्य तूदात्तः ॥ ɜ७ ॥ (ɜ६६६)

सुब्रह्मण्या नाम निगदः, तत्र ' यज्ञकर्मणि ' (१.२.ɜ४) इति ' विभाषा छन्दसि ' (१.२.ɜ६) इति च एकश्रुतिः प्राप्ता प्रतिषिध्यते । सुब्रह्मण्यायामेकश्रुतिर्न भवति । यस्तु लक्षणप्राप्तः स्वरितस्तस्योदात्त आदेशो भवति ।

सुब्रह्मण्याɜम् इन्द्रागच्छ, हरिव आगच्छ, मेधातिथेर्मेष वृषणश्वस्य मेने गौरावस्कन्दिन्नहल्यायै जारकाशिकब्राह्मण गातमब्रुवाण श्वः सुत्यामागच्छ मघवन्
(शत० ब्रा० ɜ.ɜ.१ १९) ।

अत्र सुब्रह्मण्योमित्योकारस्तित्स्वरेण स्वरितः, तस्योदात्तो विधीयते ।

इन्द्र आगच्छ इत्यामन्त्रितमाद्युदात्तं द्वितीयो वर्णोऽनुदात्तः । ' उदात्तादनुदात्तस्य स्वरितः' (८.४.६६) इति स्वरितः प्रसक्तः, तस्यानेनोदात्तः क्रियते; तेन द्वावप्युदातौ सम्पन्नौ। आगच्छ इत्याकार उदात्तः । ततः परोऽनुदात्तः स्वरितः , तस्यानेनोदात्तः क्रियते । तदेवम् इन्द्र आगच्छ इति चत्वार उदात्ताः । पश्चिम एकोऽनुदात्तः ।

हरिव आगच्छ इत्यनयैव प्रक्रियया चत्वार उदात्ताः, द्वावनुदात्तौ ।

मेधातिथेरिति षष्ठ्यन्तं परमामन्त्रितमनुप्रविशति ' सुबामन्त्रिते पराङ्गवत्स्वरे ' (२.१.२) इति । ततः सकलस्यामन्त्रिताद्युदात्तत्वे कृते द्वितीयमक्षरमनुदात्तम् । तस्य ' उदात्तादनुदात्तस्य स्वरितः ' (८.४.६६) इति स्वरितत्वे प्राप्ते इदमुदात्तत्वं विधीयते। तेन द्वावप्युदात्तौ भवतः शेषमनुदात्तम् ।

'वृषणस्वस्य मेने' इति समानं पूर्वेण । गौरावस्कन्दिन् इति तथैव द्वे आद्ये अक्षरे उदात्ते, शेषमनुदात्तम् । अहल्यायै जार इति सुबन्तस्यामन्त्रितमाद्युदात्तम् । तत्र पूर्ववद् द्वावुदात्तौ । शेषमनुदात्तम् ।

कौशिकब्रह्मण इति समस्तमामन्त्रितमाद्युदात्तम् । तत्र पूर्ववद् द्वावुदात्तौ । शेषमनुदात्तम् ।

एवं गौतमब्रुवाणेति द्वावुदात्तौ । शेषमनुदात्तम् ।

श्वः सुत्यामागच्छ मघवन्निति श्वःशब्द उदात्तः, सुत्यामित्यन्तोदात्तः । ' संज्ञायां समजनिपदनिपतमनविदषुञ्शीङ्भृञिणः ' (३.३.९९) । इति क्यपो विधाने 'उदात्तः' इति वर्तते । आगच्छ इति द्वावुदात्तौ । अन्त्योऽनुदात्तः । मघवन्निति पदात् परमामन्त्रितं निहन्यते ॥

११३. देवब्रह्मणोरनुदात्तः ॥ ३८ ॥ (३६६७)

सुब्रह्मण्यायामेव 'देवा ब्रह्माणः' इति पठ्यते, तत्र पूर्वेण स्वरितस्योदात्ते प्राप्तेऽनेनानुदात्तो विधीयते । देवब्रह्मणोः स्वरितस्यानुदात्त आदेशो भवति । ' दे वा ब्रह्माण आगच्छत' (श. ब्रा. ३.३.१.२०) । द्वयोरपि पदयोरामन्त्रिताद्युदात्तत्वे शेषनिघाते चोदात्तादनुदात्तस्य स्वरितः कृतः, तस्यानुदात्तो भवति ॥

११४. स्वरितात् संहितायामनुदात्तानाम् ॥ ३९ ॥ (३६६८)

' एकश्रुतिः ' इति वर्तते । संहितायां विषये स्वरितात् परेषामनुदात्तानामे-कश्रुतिर्भवति । इमं मे गङ्गे यमुने सरस्वति शुतुद्रि (ऋ. १०.७५.५) । माणवक जटिलकाध्यापक क्व गमिष्यसि । इमम् इत्यन्तोदात्तम्, मे इति अनुदात्तम्; विधिकाल एव निघातविधानात्। तत्पुनः ' उदात्तादनुदात्तस्य स्वरितः' (८.४.६६) । इति स्वरितं संपद्यते । तस्मात् स्वरितात् परेषामनुदात्तानां गङ्गेप्रभृतीनामेकश्रुतिर्भवति । सर्व एते आमन्त्रितनिघातेनानुदात्ताः। माणवक जटिलक इति प्रथममामन्त्रितमाद्युदात्तम्, तस्य द्वितीयमक्षरं स्वरितम्, ततः परेषामनुदात्तानामेकश्रुतिर्भवति ।

संहिताग्रहणं किम्? अवग्रहे मा भूत् । इमं मे गङ्गे यमु ने सरस्वति (ऋ. १०.७५.५)॥

११५. उदात्तस्वरितपरस्य सन्नतरः ॥ ४० ॥ (३६६९)

अनुदात्तग्रहणमनुवर्तते । उदात्तः परो यस्मात् स उदात्तपरः । स्वरितः परो यस्मात् स स्वरितपरः; उदात्तपरस्य स्वरितपरस्य चानुदात्तस्य सन्नतर आदेशो भवति । अनुदात्ततरः इत्यर्थः । ' देवा मरुतः पृश्निमातरोऽपः ' । (पै. ३.३१.१) । मातर इत्यनुदात्तः । अप इत्यन्तोदात्तः । ' ऊडिदंपदाद्यप्पुम्रैद्युभ्यः (६.१.१७१) । इति । तत्रानुदात्तयोरेकादेश ओकारोऽनुदात्तः। तस्योदात्ते परभूते सन्नतर आदेशो भवति । इमं मे गङ्गे यमुने सरस्वति शुतुद्रि (ऋ. १०.७५.५) । इकारोऽनुदात्तः । शुतुद्रि इत्येतदामन्त्रितं पादादौ तस्मान्न निहन्यते, '

अनुदात्तं सर्वमपादादौ ' (८.१.१८) इति । तस्य प्रथममक्षरमुदात्तम्, तस्मिन्परभूते पूर्वस्य सरस्वति इति इकारस्य सन्नतर आदेशो भवति । माणवक जटिलकाध्यापक क्व गमिष्यसि । क्व इति स्वरितः, तस्मिन् परभूते क इति अनुदात्तस्तस्य सन्नतर आदेशो भवति ॥

११६. अपृक्त एकाल्प्रत्ययः ॥ ४२ ॥ (२५१)

' अपृक्त ' इति इयं संज्ञा भवति, एकाल् यः प्रत्ययस्तस्य । असहायवाची एकशब्दः। ' स्पृशोऽनुदके क्विन् ' - (३.२.५८) । घृतस्पृक् । ' भजो ण्विः ' (३.२.६२) । - अर्धभाक्, पादभाक्। एकालिति किम् ? दर्विः, (उ. सू. ५०२)। जागृविः (उ. सू. ५०३) । (म. भा. १.२.४३) । प्रत्यय इति किम् ? सुराः ।

अपृक्तप्रदेशः - ' वेरपृक्तस्य' (६.१.६७) इत्येवमादयः ॥

११७. तत्पुरुषः समानाधिकरणः कर्मधारयः ॥ ४२ ॥ (७४५)

'तत्पुरुषः' इति समासविशेषस्य संज्ञा वक्ष्यति । स तत्पुरुषः समानाधिकरणपदः कर्मधारयसंज्ञो भवति । अधिकरणशब्दोऽभिधेयवाची । समानाधिकरणः = समानाभिधेयः । परमराज्यम्, उत्तमराज्यम्, 'अकर्मधारये राज्यम्' (६.२.१३०) । इत्युत्तरपदाद्युदात्तं न भवति। पाचकवृन्दारिका (६.३.४२) ।

तत्पुरुष इति किम्? पाचिकाभार्यः (६.३.३७) । समानाधिकरण इति किम्? ब्राह्मणराज्यम्। कर्मधारयप्रदेशाः - ' कर्मधारये निष्ठा ' (६.२.४६) इत्येवमादयः ॥

११८. प्रथमानिर्दिष्टं समास उपसर्जनम् ॥ ४३ ॥ (६५३)

प्रथमया विभक्त्या यन्निर्द्दिश्यते समासशास्त्रे तदुपसर्जनसंज्ञं भवति । 'समासे' इति समासविधायि शास्त्रं गृह्यते। वक्ष्यति - 'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' (२.१.२४) इति द्वितीयासमासे द्वितीयेत्येतत्प्रथमा निर्दिष्टम्। तृतीयासमासे तृतीयेति, चतुर्थीसमासे चतुर्थीति, पञ्चमीसमासे पञ्चमीति, षष्ठीसमासे षष्ठीति, सप्तमीसमासे सप्तमीति । कष्टश्रितः । शङ्कुलाखण्डः (२.१.३०) यूपदारु (२.१.६३) । वृकभयम् (२.१.३७) । राजपुरुषः (२.२.८) । अक्षशौण्डः (२.१.४०) । उपसर्जनप्रदेशाः ' उपसर्जनं पूर्वम् ' (२.२.३०) इत्येवमादयः॥

११९. एकविभक्ति चापूर्वनिपाते ॥ ४४ ॥ (६५५)

एका विभक्तिर्यस्य तदिदमेकविभक्ति, समासे विधीयमाने यन्नियतविभक्तिकं द्वितीये सम्बन्धिनि बहुभिर्विभक्तिभिर्युज्यमानेऽप्येकयैव विभक्त्या युज्यते तदुपसर्जनसंज्ञं भवति अपूर्वनिपाते । पूर्वनिपातं पूर्वनिपाताख्यमुपसर्जनकार्यं वर्जयित्वा ।

निरादयः क्रान्ताद्यर्थे पञ्चम्या (वा. १३३९) । पूर्वपदे नानाविभक्तिकेऽप्युत्तरपदं पञ्चम्यन्तमेव भवति निष्क्रान्ता कौशाम्ब्या निष्कौशाम्बिः । निष्क्रान्तं कौशाम्ब्या निष्कौशाम्बिम् । निष्क्रान्तेन कौशाम्ब्या निष्कौशाम्बिना । निष्क्रान्ताय कौशाम्ब्या निष्कौशाम्बये । निष्क्रान्तात् कौशाम्ब्या निष्कौशाम्बेः । निष्क्रान्तस्य कौशाम्ब्याः निष्कौशाम्बेः । निष्क्रान्ते कौशाम्ब्या निष्कौशाम्बौ । एवं निर्वाराणसिः ।

एकविभक्तीति किम् ? राजकुमारी । अपूर्वनिपात इति किम्? न हि भवति कौशाम्बीनिरिति ॥

१२०. अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ॥ ४५ ॥ (१७८)

अभिधेयवचनोऽर्थशब्दः । अर्थवच्छब्दरूपं प्रातिपदिकसंज्ञं भवति धातुप्रत्ययौ वर्जयित्वा। डित्थः । कपित्थः । कुण्डम् । पीठम् ।

अर्थवदिति किम्? वनम्, धनमिति नान्तस्यावधेर्मा भूत् । नलोपो हि स्यात् (८.२.७) । अधातुरिति किम्? हन्तेर्लङ्, अहन् - नलोपो हि स्यात् । अप्रत्यय इति किम्? काण्डे । कुड्ये - (म० भा० १.२.४५) । ' ह्रस्वो नपुंसके प्रातिपदिकस्य' (१.२.४७) इति ह्रस्वः स्यात् ।

अनर्थकस्यापि निपातस्य प्रातिपदिकसंज्ञेष्यते (म. भा. १.२.४५ वा. १२) ॥ अध्यागच्छति । प्रलम्बते ।

प्रातिपदिकप्रदेशाः - ' ह्रस्वो नपुंसके प्रातिपदिकस्य ' (१.२.४७) इत्येवमादयः॥

१२१. कृत्तद्धितसमासाश्च ॥ ४६ ॥ (१७९)

कृतस्तद्धिताः समासाश्च प्रातिपदिकसंज्ञा भवन्ति । ' अप्रत्ययः' इति पूर्वसूत्रे पर्युदासात्कृदन्तस्य तद्धितान्तस्य चानेन प्रातिपदिकसंज्ञा विधीयते । अर्थवत्समुदायानां समासग्रहणं नियमार्थम् (म. भा. १.२.४५ वा. ६) ।

कृत् - कारकः, हारकः, कर्ता, हर्ता । तद्धितः - औपगवः कापटवः । समासः - राजपुरुषः, ब्राह्मणकम्बलः । समासग्रहणस्य नियमार्थत्वाद् वाक्यस्यार्थवतः संज्ञा न भवति ॥

१२२. ह्रस्वो नपुंसके प्रातिपदिकस्य ॥ ४७ ॥ (३१८)

नपुंसकलिङ्गेऽर्थे यत्प्रातिपदिकं वर्तते तस्य ह्रस्वो भवति आदेशेऽलोन्त्यस्याचः। अतिरि कुलम्, अतिनु कुलम् ।

नपुंसक इति किम् ? ग्रामणीः । सेनानीः । प्रातिपदिकस्येति किम् ? काण्डे तिष्ठतः। कुड्ये तिष्ठतः । प्रातिपदिकग्रहणसामर्थ्यादेकादेशः पूर्वस्यान्तवन्न भवति ॥

१२३. गोस्त्रियोरुपसर्जनस्य ॥ ४८ ॥ (६५६)

' प्रातिपदिकस्य ' इति वर्तते । ' गो ' इति स्वरूपग्रहणम्, ' स्त्री ' इति प्रत्ययग्रहणम्; स्वरितत्वात् । उपसर्जनग्रहणं तयोर्विशेषणम् - गोरुपसर्जनस्य, स्त्रीप्रत्ययान्तस्योपसर्जनस्येति। ताभ्यां प्रातिपदिकस्य तदन्तविधिः । उपसर्जनगोशब्दान्तस्य उपसर्जनस्त्रीप्रत्ययान्तान्तस्य च प्रातिपदिकस्य ह्रस्वो भवति । चित्रगुः । शबलगुः । स्त्रियाः - निष्कौशाम्बिः । निर्वाराणसिः। अतिखट्वः। अतिमालः।

उपसर्जनस्येति किम्? राजकुमारी । स्वरितत्वं किम्? अतितन्त्रीः। अतिलक्ष्मीः। अतिश्रीः ।

ईयसो बहुव्रीहेः प्रतिषेधो वक्तव्यः (म. भा. १.२.४८ वा. ३) ॥ बहुश्रेयसी । विद्यमानश्रेयसी ॥

१२४. लुक्तद्धितलुकि ॥ ४९ ॥ (१४०८)

स्त्रीग्रहणमनुवर्त्तते, ' उपसर्जनस्य ' इति च । पूर्वेण ह्रस्वत्वे प्राप्ते लुग्विधीयते। तद्धितलुकि सति स्त्रीप्रत्ययस्य उपसर्जनस्य लुग्भवति । पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्रः। दशेन्द्रः । (४.२.२४) (४.१.८८) पञ्चभिः शष्कुलीभिः क्रीतः पञ्चशष्कुलः (५.१.३७; ५.१.२८) । आमलक्याः फलमामलकम् (४.३.१४४; १६३) । बदरम् । कुवलम् ।

तद्धितग्रहणं किम् ? गार्ग्याः कुलं गार्गीकुलम् । लुकीति किम् ? गार्गीत्वम्। उपसर्जनस्येत्येव -अवन्ती, कुन्ती, कुरूः ॥

१२५. इद् गोण्याः ॥ ५० ॥ (१७०३)

पूर्वेण लुकि प्राप्ते इकारो विधीयते । गोण्यास्तद्धितलुकि सति इकारादेशो भवति । पञ्चभिर्गोणीभिः क्रीतः पटः पञ्चगोणिः । दशगोणिः ।

'इत्' इति योगविभागः । पञ्चभिः सूचीभिः क्रीतः - पञ्चसूचिः । दशसूचिः। स च एवं विषय एव ॥

१२६. लुपि युक्तवद्व्यक्तिवचने ॥ ५१ ॥ (१५९४)

'लुपि' इति लुप्संज्ञया लुप्तस्य प्रत्ययस्यार्थ उच्यते । तत्र लुपि युक्तवद् व्यक्तिवचने भवतः । ' युक्तवत् ' इति निष्ठाप्रत्ययेन क्तवतुना प्रकृत्यर्थ उच्यते । स हि प्रत्ययार्थमात्मना युनक्ति, तस्य युक्तवतो व्यक्तिवचने लुबर्थे विधीयेते ।

अथ वा - युक्तः प्रकृत्यर्थः प्रत्ययार्थेन संबद्धः, तस्मिन्निव व्यक्तिवचने लुबर्थे भवतः । सप्तम्यर्थे वतिः । व्यक्तिवचने इति च लिङ्गसंख्ययोः पूर्वाचार्यनिर्द्देशः, तदीयमेवेदं सूत्रम् । तथा चास्य प्रत्याख्यानं भविष्यति- ' तदशिष्यं संज्ञाप्रमाणत्वात्' (१.२.५३) । इति ।

व्यक्तिः- स्त्रीपुंनपुंसकानि, वचनम् - एकत्व-द्वित्व-बहुत्वानि । पञ्चालाः क्षत्रियाः,पुंलिङ्गाः बहुवचनविषयाः । तेषां निवासो जनपदः (४.२.८१) । यथा तेषु क्षत्रियेषु व्यक्तिवचने, तद्वज्जनपदे भवतः - पञ्चालाः , मगधाः, मत्स्याः, अङ्गाः, सुह्मः, पुण्ड्राः (ऐ. ब्रा. ७.३.६ पृ. ११६९) ।

लुपीति किम् ? लुकि मा भूत् । लवणः सूपः, लवणा यवगूः, लवणं शाकम् (४.२.२२.२४) । व्यक्ति वचने इति किम् ? शिरीषाणामदूरभवो ग्रामः (४.२.७०,८२) शिरीषाः, तस्य वनं शिरीषवनम् - (म. भा. १.२.४९) ' विभाषौषधिवनस्पतिभ्यः' (८.४.६) इति णत्वं न भवति ।

हरीतक्यादिषु व्यक्तिः (म. भा. १.२.५२ वा० ३) । हरीतक्याः फलानि हरीतक्यः (४.३.१६७) फलानि । खलतिकादिषु वचनम् (म. भा. १.२.५२ वा० ४) । खलतिकस्य पर्वतस्यादूरभवानि वनानि (४.२.७०, ८२) । खलतिकं वनानि॥

१२७. विशेषणानां चाजातेः ॥ ५२ ॥ (१३००)

' लुपि ' इति वर्तते । लुबर्थस्य यानि विशेषणानि तेषामपि व्यक्तिवचने भवतः, जातिं वर्जयित्वा पञ्चालाः रमणीयाः, बह्वन्नाः, बहुक्षीरघृताः, बहुमाल्यफलाः। गोदौ रमणीयौ, बह्वन्नौ, वहुक्षीरघृतौ, बहुमाल्यफलौ । अजातेरिति किम् ? पञ्चालाः जनपदः । गोदौ ग्रामः ।

जात्यर्थस्य चायं युक्तवद्भावप्रतिषेधः । तेन जातिद्वारेण यानि विशेषणानि तेषामपि युक्तवद्भावो न भवति - पञ्चालाः जनपदो रमणीयो, बह्वन्नः, गोदौ ग्रामो रमणीयो, बह्वन्न इति।

मनुष्यलुपि प्रतिषेधो वक्तव्यः (म. भा. १.२.५२ वा० ५) चञ्चा अभिरूपः (म. भा. १.२.५२) । वध्रिका दर्शनीयः (५.३.९६.९८) ॥

१२८. तदशिष्यं संज्ञाप्रमाणत्वात् ॥ ५३ ॥ (१२९५)

तदिति प्रकृतं युक्तवद्भावलक्षणं निर्दिश्यते । तदशिष्यं = न वक्तव्यम्, कस्मात्? संज्ञाप्रमाणत्वात् । संज्ञाशब्दा हि नानालिङ्गसंख्याःप्रमाणम् । पञ्चाला वरणा इति च नैते योगशब्दाः, किं तर्हि? जनपदादीनां संज्ञा एताः।

तत्र लिङ्गं वचनं च स्वभावसिद्धमेव, न यत्नप्रतिपाद्यम्; यथा - आपः, दाराः गृहाः, सिकताः, वर्षा इति ॥

१२९. लुब्योगाप्रख्यानात् ॥ ५४ ॥ (१२९६)

लुबप्यशिष्यः । योऽयम् 'जनपदे लुप्' (४.२.८१) । 'वरणादिभ्यश्च' (४.२.८२) इति लुबुच्यते, अयं न वक्तव्यः, कि कारणम् ? योगाप्रख्यानात् । न हि पञ्चाला वरणा इति योगः = संबन्धः प्रख्यायते । नैतदुपलभामहे - वृक्षयोगान्नगरे वरणा इति, किं तर्हि? संज्ञा एताः । तस्मादत्र ' तस्य निवासः ' (४.२.६९),' अदूरभवश्च' (४.२.७०) इति तद्धितो नैवोत्पद्यते, किं लुपो विधानेन ॥

१३०. योगप्रमाणे च तदभावेऽदर्शनं स्यात् ॥ ५५ ॥ १२९७)

' पञ्चालादयः संज्ञाशब्दाः, न योगनिमित्ताः ' इत्युक्तम्। तच्चावश्यमेवाभ्युपगन्तव्यम्, योगप्रमाणे हि तदभावेऽदर्शनं स्यात् । यदि पञ्चालादिशब्दो योगस्य प्रमाणं = योगस्य वाचकः स्यात्, ततस्तदभावेऽदर्शनम् = अप्रयोगः स्यात् । दृश्यते च संप्रति विनैव क्षत्रियसम्बन्धेन जनपदेषु पञ्चालादिशब्दः, ततोऽवसीयते - नायं योगनिमित्तकः, किं तर्हि? रूढिरूपेणैव तत्र प्रवृत्त इति ॥

१३१. प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् ॥ ५६ ॥ (१२९८)

' अशिष्यम् ' इति वर्त्तते । प्रधानं समासे किञ्चित्पदम्, प्रत्ययः तव्यदादिः, ताभ्यामर्थवचनम् = अर्थाभिधानमनेन प्रकारेण भवतीति पूर्वाचार्यैः परिभाषितम्। प्रधानोपसर्जने प्रधानार्थं सह ब्रूतः, ' प्रकृति - प्रत्ययौ सहार्थं ब्रूतः' इति । तत्पाणिनिराचार्यः प्रत्याचष्टे - अशिष्यमेतत्, अर्थस्यान्यप्रमाणत्वादिति । अन्य इति शास्त्रापेक्षया लोको व्यपदिश्यते । शब्दैरर्थाभिधानं स्वाभाविकम्, न पारिभाषिकम्; अशक्यत्वात्, लोकत एवार्थावगतेः।

यैरपि व्याकरणं न श्रुतम् तेऽपि ' राजपुरुषमानय ' इत्युक्ते राजविशिष्टं पुरुषमानयन्ति; न राजानम्, नापि पुरुषमात्रम् । ' औपगवमानय ' इत्युक्ते उपगुविशिष्टमपत्यमानयन्ति, नोपगुम्, नाप्यपत्यमात्रम्, नोभौ । यश्च लोकतोऽर्थः सिद्धः, किं तत्र यत्नेन ! ॥

१३२. कालोपसर्जने च तुल्यम् ॥ ५७ ॥ (१२९९)

'अशिष्यम्' इति वर्तते । कालोपसर्जने चाशिष्ये । कस्मात्? अर्थस्यान्यप्रमाणत्वात्। तुल्यशब्दो हेत्वनुकर्षणार्थः । अशिष्यविशेषणं चैतत् । कालोपसर्जने च तुल्यमशिष्ये भवतः ।

इहान्ये वैयाकरणाः कालोपसर्जनयोः परिभाषां कुर्वन्ति । आन्याय्यादुत्थानादान्यायाच्च संवेशनात् - एषोऽद्यतनः कालः । अपरे पुनराहुः - अहरुभयतोर्द्धरात्रम् - एषोऽद्यतनः काल इति। तथोपसर्जनपरिभाषां कुर्वन्ति - अप्रधानमुपसर्जनमिति ।

तत्पाणिनिराचार्यः प्रत्याचष्टे - लोकतोऽर्थावगतेः । यैरपि व्याकरणं न श्रुतं तेऽप्याहुः- इदमस्माभिरद्य कर्तव्यम्, इदं श्वः कर्तव्यम्, इदम् ह्यः कृतमिति; नैवं व्युत्पाद्यन्ते ! तथोपसर्जनम् - वयमत्र गृहे ग्रामे वा उपसर्जनप्रधानमिति गम्यते । यश्च लोकतोऽर्थः सिद्धः किं तत्र यत्नेन !

यद्येवम्, पूर्वसूत्र एव कालोपसर्जनग्रहणं कस्मान्न क्रियते, किमर्थो योगविभागः? प्रदर्शनार्थः ।

अन्यदप्येवञ्जातीयकमशिष्यमिति । तथा च पूर्वाचार्याः परिभाषन्ते - 'मत्त्वर्थे बहुव्रीहिः', 'पूर्वपदार्थप्रधानोऽव्ययीभावः', उभयपदार्थप्रधानो द्वन्द्वः इत्येवमादि तदशिष्यमिति ॥

१३३. जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् ॥ ५८ ॥ (८१७)

' अशिष्यम् ' इति निवृत्तम् । जातिर्नामायमेकोऽर्थः, तदभिधाने एकवचनमेव प्राप्तम्, अत इदमुच्यते । जातेराख्या जात्याख्या, जात्याख्यायामेकस्मिन्नर्थे बहुवचनमन्यतरस्यां भवति। जात्यर्थो बहुवद् भवतीति यावत् । तेन तद्विशेषणानामजातिशब्दानामपि संपन्नादीनां बहुवचनमुपपद्यते । संपन्नो यवः, संपन्ना
यवाः । संपन्नो व्रीहिः, संपन्ना व्रीहयः । पूर्ववया ब्राह्मणः प्रत्युत्थेयः, पूर्ववयसो ब्राह्मणाः प्रत्युत्थेयाः ।

जातिग्रहणं किम्? देवदत्तः, यज्ञदत्तः। आख्यायामिति किम्? काश्यपप्रतिकृतिः काश्यपः। भवत्ययं जातिशब्दः, न त्वनेन जातिराख्यायते, किं तर्हि ? प्रतिकृतिः । एकस्मिन्निति किम्? व्रीर्हियवौ ।

संख्याप्रयोगे प्रतिषेधो वक्तव्यः (म. भा. १ २.५८ वा. ४) ॥ एको व्रीहिः संपन्नः सुभिक्षं करोति ॥

१३४. अस्मदो द्वयोश्च ॥ ५९ ॥ (८१८)

अस्मदो योऽर्थस्तस्यैकत्वे द्वित्वे च बहुवचनमन्यतरस्यां भवति । अहं ब्रवीमि, वयं ब्रूमः। आवां ब्रूवः , वयं ब्रूमः ॥

सविशेषणस्य प्रतिषेधो वक्तव्यः (म. भा. वा. ५) । अहं देवदत्तो ब्रवीमि। अहं गार्ग्यो ब्रवीमि । अहं पटुर्ब्रवीमि (म. भा. १.२.५८) ।

१३५. फल्गुनीप्रोष्ठपदानां च नक्षत्रे ॥ ६० ॥ (८१९)

चकारः द्वयोः इत्यनुकर्षणार्थः । फल्गुन्योर्द्वयोः प्रोष्ठपदयोश्च द्वयोर्नक्षत्रयोर्बहुवचनमन्यतरस्यां भवति । कदा पूर्वे फल्गुन्यौ, कदा पूर्वाः फल्गुन्यः।
कदा पूर्वे प्रोष्ठपदे, कदा पूर्वाः प्रोष्ठपदाः ।

नक्षत्र इति किम्? फल्गुन्यौ माणविके ॥

१३६. छन्दसि पुनर्वस्वोरेकवचनम् ॥ ६१ ॥ (३३८७)

' अन्यतरस्याम् ' इत्यनुवर्त्तते । द्वयोर्द्विवचने प्राप्ते पुनर्वस्वोश्छन्दसि विषये एकवचनमन्यतरस्यां भवति । ' पुनर्वसूर्नक्षत्रमदितिर्देवता ' (मै. सं. २.१३.२) । पुनर्वसू - नक्षत्रमदितिर्देवता (तै. सं. ४.४.१०) । नक्षत्र इत्येव - पुनर्वसू माणवकौ ।

छन्दसीति किम् ? पुनर्वसू इति ॥

१३७. विशाखयोश्च ॥ ६२ ॥ (६६८८)

' छन्दसि ' इति वर्तते । द्विवचने प्राप्ते छन्दसि विषय विशाखयोरेकवचनमन्यरतस्यां भवति । विशाखा नक्षत्रमिन्द्राग्नी देवता (मै. सं. २.१३.२०) । विशाखे नक्षत्रमिद्राग्नी देवता (तै. सं. ४.४.१०.२) ।

१३८. तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ॥ ६३ ॥ (८२०)

' छन्दसि ' इति निवृत्तम् । तिष्य एकः पुनर्वसू द्वौ तेषां द्वन्द्वो बहवर्थः । तत्र बहुवचने प्राप्ते द्विवचनं विधीयते । तिष्यपुनर्वस्वोर्नक्षत्रविषये द्वन्द्वे बहुवचनप्रसङ्गे नित्यं द्विवचनं भवति। उदितौ तिष्यपुनर्वसू दृश्येते ।

तिष्यपुनर्वस्वोरिति किम्? विशाखानुराधाः ।

नक्षत्रेति किम्? तिष्यश्च माणवकः पुनर्वसू माणवकौ = तिष्यपुनर्वसवो माणवकाः। ननु च प्रकृतमेव नक्षत्रग्रहणं किमर्थं पुनरुच्यते ? पर्यायाणामपि यथा स्यात् - तिष्यपुनर्वसू, सिद्ध्यपुनर्वसू ।

द्वन्द्व इति किम् ? यस्तिष्यस्तौ पुनर्वसू येषां त इमे 'तिष्यपुनर्वसवः' (वाज० सं० २.६९) उन्मुग्धाः तिष्यादय एव विपर्ययेण दृश्यमाना बहुव्रीहिणोच्यन्ते । तेन नक्षत्रसमास एवायम् । बहुवचनस्येति किम्? एकवचनस्य मा भूत् - तिष्यपुनर्वसु इदमिति ।

' सर्वो द्वन्द्वो विभाषा एकवद्भवति ' (व्या. प. ९१) इत्यस्यैतदेव ज्ञापकम् (म. भा. १.२.६३) । नित्यग्रहणं विकल्पनिवृत्त्यर्थम् ॥

१३९. सरूपाणामेकशेष एकविभक्तौ ॥ ६४ ॥ (१८८)

समानं रूपमेषामिति सरूपाः । सरूपाणां शब्दानाम् एकविभक्तौ परत एकशेषो भवति । एकः शिष्यते, इतरे निवर्तन्ते । वृक्षश्च वृक्षश्च - वृक्षौ । वृक्षश्च वृक्षश्च वृक्षश्च - वृक्षाः ।

प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानम् । तत्रानेकार्थाभिधानेऽनेकशब्दत्वं प्राप्तम्, तस्मादेकशेषः (म. भा. १.२.६४ वा. ३१) ।

सरूपाणामिति किम् ? प्लक्षन्यग्रोधाः । रूपग्रहणं किम् ? भिन्नेऽप्यर्थे यथा स्यात् - अक्षाः, पादाः, माषाः। एकग्रहणं किम्? द्विबहवोः शेषो मा भूत् । शेषग्रहणं किम्? आदेशो मा भूत् ।

एकविभक्ताविति किम्? पयः पयो जरयति । ब्रह्मणाभ्यां च कृतं ब्राह्मणाभ्यां च देहि (म. भा. १.२.६४) ॥

१४०. वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ॥ ६५ ॥ (९३१)

' शेष ' इति वर्त्तते । ' यूना ' इति सहयोगे तृतीया । वृद्धो यूना सहवचने शिष्यते, युवा निवर्त्तते । वृद्वशब्दः पूर्वाचार्यसंज्ञा गोत्रस्य । अपत्यमन्तर्हितं वृद्धमिति। वृद्धयूनोः सहवचने वृद्धः शिष्यते तल्लक्षणश्चेदेव विशेषः। तदिति वृद्धयूनोर्निर्देशः, लक्षणशब्दो निमित्तपर्यायः, चेच्छब्दो यद्यर्थे, एवकारोऽवधारणे, विशेषो वैरूप्यम् । वृद्धयुवनिमित्तकमेव यदि वैरूप्यं भवति ततो वृद्धः शिष्यते, युवा निवर्त्तते । समानायामाकृतौ वृद्धयुवप्रत्ययौ भिद्येते । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। वात्स्यश्च वात्स्यायनश्च वात्स्यौ ।

वृद्ध इति किम्? गर्गश्च गार्ग्ययणश्च - गर्गगार्ग्यायणौ । यूनेति किम्? गार्ग्यश्च गर्गश्च - गार्ग्यगर्गौ । तल्लक्षण इति किम् ? गार्ग्यवात्स्यायनौ । एवकारः किमर्थः? भगवित्तिश्च भागवित्तिकश्च भागवित्तिभागवित्तिकौ । कुत्सा सौवीरत्वं च भागवित्तिकस्यापरो विशेषो विद्यते ॥

१४१. स्त्री पुंवच्च ॥ ६६ ॥ (९३२)

' शेष ' इति वर्त्तते, ' वृद्धो यूना ' इति च सर्वम् । स्त्री वृद्धा यूना सहवचने शिष्यते तल्लक्षणश्चेदेव विशेषो भवति । पुंस इवास्याः कार्यं भवति । स्त्र्यर्थः पुमर्थवद् भवति । गार्गी च गार्ग्यायणश्च - गार्ग्यौ । वात्सी च वात्स्यायनश्च - वात्स्यौ । दाक्षी च दाक्षायणश्च - दाक्षी॥

१४२. पुमान् स्त्रिया ॥ ६७ ॥ (९३३)

'तल्लक्षणश्चेदेव विशेषः ' इति वर्त्तते । ' वृद्धो यूना ' इति निवृत्तम् । स्त्रिया सहवचने पुमान् शिष्यते, स्त्री निवर्त्तते । स्त्रीपुंसलक्षणश्चेदेव विशेषो भवति । ब्राह्मणश्च ब्राह्मणी च - ब्राह्मणौ । कुक्कुटश्च कुक्कुटी च - कुक्कुटौ । तल्लक्षणश्चेदेव विशेष इत्येव-कुक्कुटश्च मयूरी च कुक्कुटमयूर्यौ ।

एवकारः किमर्थः? इन्द्रश्च इन्द्राणी चेन्द्रेन्द्राण्यौ । 'पुंयोगादाख्यायाम्' (४.१.४८) इत्यपरो विशेषः । पुमानिति किम्? प्राक्च प्राची च प्राक्प्राच्यौ । 'प्राक्' इत्यव्ययमलिङ्गम् ॥

१४३. भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ॥ ६८ ॥ (९३४)

यथासंख्यं भ्रातृपुत्रशब्दौ शिष्येते सहवचने स्वसृदुहितृभ्याम् । स्वस्रा सहवचने भ्रातृशब्दः शिष्यते - भ्राता च स्वसा च - भ्रातरौ । दुहित्रा सहवचने पुत्रशब्दः शिष्यते - पुत्रश्च दुहिता च - पुत्रौ ॥

१४४.नपुंसकमनपुंसकेनैकuच्चाxयान्यतरस्याम् ॥ ६९ ॥ (९३५)

' तल्लक्षणश्चेदेव विशेषः ' इति वर्त्तते । नपुंसकानपुंसकमात्रकृते विशेषेऽनपुंसकेन सहवचने नपुंसकं शिष्यते, एकवच्चास्य कार्यं भवति अन्यतरस्याम्। शुक्लश्च कम्बलः, शुक्ला च बृहतिका, शुक्लं च वस्त्रं, तदिदं शुक्लम्, तानीमानि शुक्लानि (म. भा. १.२.६९) ।

अनपुंसकेनेति किम् ? शुक्लं च शुक्लं च शुक्लं च शुक्लानि । 'एकवच्च ' इति न भवति ॥

१४५. पिता मात्रा ॥ ८० ॥ (९३६)

' अन्यतरस्याम् ' इति वर्त्तते, न एकवत् इति । मात्रा सहवचने पितृशब्दः शिष्यते अन्यतरस्याम् । माता च पिता च पितरौ । मातापितराविति वा ॥

१४६. श्वशुरः श्वश्रूवा ॥ ७१ ॥ (९३७)

'अन्यतरस्याम् ' इति वर्तते । श्वश्रूवा सहवचने श्वशुरशब्दः शिष्यते अन्यतरस्याम्। श्वशुरश्च श्वश्रूश्च - श्वशुरौ । श्वश्रूश्वशुराविति वा ॥

१४७. त्यदादीनि सर्वैर्नित्यम् ॥ ७२ ॥ (९३८)

त्यदादीनि शब्दरूपाणि सर्वैः सहवचने नित्यं शिष्यन्ते त्यदादिभिरन्यैश्च । सर्वग्रहणं साकल्यार्थम् । नित्यग्रहणं विकल्पनिवृत्त्यर्थम् । स च देवदत्तश्च - तौ । यश्च देवदत्तश्च - यौ ।

त्यदादीनां मिथो यद्यत्परं तत्तच्छिष्यते । स च यश्च - यौ । यश्च कश्च - कौ॥

१४८. ग्रम्यपशुसंघेष्वतरुणेषु स्त्री ॥ ७३ ॥ (९३९)

ग्रम्याणां पशूनां संघाः ग्राम्यपशुसंघाः, एतेषु सहविवक्षायां स्त्री शिष्यते । पुमान् स्त्रिया इति पुंसः शेषे प्राप्ते स्त्रीशेषो विधीयते । अतरुणग्रहणं सामर्थ्यात्पशुविशेषणम् । गाव इमाः । अजा इमाः ।

ग्राम्यग्रहणं किम्? रुरव इमे । पृषता इमे । पशुष्विति किम्? ब्राह्मणः, क्षत्रियाः। संघेष्विति किम्? एतौ गावौ चरतः। अतरुणेष्विति किम्? वत्सा इमे । बर्करा इमे ।

अनेकशफेष्विति वक्तव्यम् । इह मा भूत् - अश्वा इमे ॥

॥ इति श्रीजयादित्यविरचितायां काशिकावृत्तौ प्रथमाध्यायस्य द्वितीयः पादः ॥

अथ प्रथमाध्योये

तृतीयः पादः

१४९. भूवादयो धातवः ॥ १ ॥ (१८)

'भू ' इत्येवमादयः शब्दाः क्रियावचना धातुसंज्ञा भवन्ति । 'भू ' (धा. पा. १) - भवति। 'एध ' (धा. पा. २) - एधते । 'स्पर्द्ध ' (धा. पा. ३) - स्पर्द्धते। 'धातु ' शब्दः पूर्वाचार्यसंज्ञा। ते च क्रियावचनानां संज्ञां कृतवन्तः। तदिहापि पूर्वाचार्यसंज्ञाश्रयणात् क्रियावाचिनामेव भूवादीनां धातुसंज्ञा विधीयते॥

भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते ।

भूवो वार्थं वदन्तीति भ्वर्था वा वादयः स्मृताः ॥ (म. भा. १.३.१)

धातुप्रदेशाः - 'धातोः' (३.१.१९) इत्येवमादयः ॥

१५०. उपदेशेऽजनुनासिक इत् ॥ २ ॥ (३)

उपदिश्यतेऽनेनेत्युपदेशः = शास्त्रवाक्यानि - सूत्रपाठः, खिलपाठश्च । तत्र योऽनुनासिकः स इत्संज्ञो भवति । एध । स्पर्द्ध । ' प्रतिज्ञानुनासिक्याः पाणिनीयाः' (व्या. परि. १२१) ।

उपदेश इति किम्? अभ्र आँ अपः (ऋ. ५.४८.१) । अजिति किम्?

'आतो मनिन्क्वनिब्वनिपश्च' (३.२.७४) । अनुनासिक इति किम् ? सर्वस्याचो मा भूत्।

इत्प्रदेशाः - आदितश्च (७.२.१६) इत्येवमादयः ॥

१५१. हलन्त्यम् ॥ ३ ॥ (१)

' उपदेशे' इति वर्त्तते । अन्ते भवमन्त्यम् । धात्वादेः समुदायस्य यदन्त्यं हल् तदित्संज्ञं भवति । अ इ उ ण् - णकारः । ऋ लृ क् - ककारः । ए ओ ङ् - ङकारः। ऐ औ च् - चकारः।

उपदेश इत्येव - अग्निचित् । सोमसुत् ।

हस्य ल् - हलिति द्वितीयमत्र हल्ग्रहणं तन्त्रेणोपात्तं द्रष्टव्यम्, तेन प्रत्याहारपाठे हल् इत्यत्र लकारस्य इत्संज्ञा क्रियते । तथा च सति, ' हलन्त्यम्' (१.३.३) इत्यत्र प्रत्याहारे नेतरेतराश्रयदोषो भवति ॥

१५२. न विभक्तौ तुस्माः ॥ ४ ॥ (१९०)

पूर्वेण प्राप्तायामित्संज्ञायां विभक्तौ वर्तमानानां तवर्गसकारमकाराणां प्रतिषेध उच्यते । तवर्गः, ' टाङसिङसामिनात्स्याः ' (७.१.१२) - वृक्षात् , प्लक्षात् । सकारः, जस् (४.१.२) - ब्राह्मणाः । तस्, थस् (३.४.७८), - पचतः, पचथः। मकारः - अपचताम्, अपचतम् (३.४.१०१)।

विभक्ताविति किम्? ' अचो यत् ' (३.१९.७), ' ऊर्णाया युस् ' (५.२.१२३) 'रुधादिभ्यः श्नम्' (३.१.७८) ।

' किमोऽत् ' (५.३.१२), ' इटोऽत् ' (३.४.१०६) इत्यत्र प्रतिषेधो न भवति, अनित्यत्वादस्य प्रतिषेधस्य । 'इदमस्थमुः' (५.३.२४) इत्युकारानुबन्ध-निर्देशादनित्यत्वमुपलक्ष्यते ॥

१५३. आदिर्ञिटुडवः ॥ ५ ॥ (२२८९)

‘ इत् ’ इति वर्तते । आदिशब्दः प्रत्येकमभिसंबध्यते । ‘ ञि, टु, डु’ इत्येतेषां समुदायानामादितो वर्तमानानामित्संज्ञा भवति । ‘ ञिमिदा ’ (धा. पा. ७४३) - मिन्नः (३.२.१८)। ‘ ञिधृषा ’ (धा. पा. १२७०) - धृष्टः। ‘ञिक्ष्विदा (धा. पा. ७४०) - क्ष्विण्णः । ‘ ञिइन्धी ’ (धा. पा. १४४९) - इद्धः । ‘ टुवेपृ’ (धा. पा. ३६७) - वेपथुः (३.३.८९) । ‘ टुओश्वि ’ (धा. पा. १०१०) - श्वयथुः। ‘ डुपचष् ’ (धा. पा. ९९६) - पक्त्रिमम् (३.३.८८)। ‘ डुवप् ’ (धा. पा. १००३) - उप्त्रिमम् । ‘ डुकृञ् ’ (धा. पा. १४७३) - कृत्रिमम् ।

आदिरिति किम्? पटूयति, (५.१.५२२) कण्डूयति (३.१.२७) । उपदेशे इत्येव - ञिकारीयति ॥

१५४. षः प्रत्ययस्य ॥ ६ ॥ (४६४)

षकारः प्रत्ययस्यादिरित्संज्ञो भवति । ‘ शिल्पिनि ष्वुन् ’ (३.१.१४५) - नर्त्तकी, रजकी ।

प्रत्ययस्येति किम्? षोडः । षण्डः । षडिकः । आदिरित्येव - ‘अविमहयोष्टिषच् ’ (उणादि. १.४५) - अविषः, महिषः ॥

१५५. चुटू ॥ ७ ॥ (१८९)

चवर्गटवर्गौ प्रत्ययस्यादी इत्संज्ञौ भवतः । गोत्रे कुञ्जादिभ्यश्चफञ् (४.१.९८) - कौञ्जायन्यः । छस्य ईयादेशं वक्ष्यति (७.१.२) । जस् - ब्राह्मणाः (४.१.२) । झस्यान्तादेशं वक्ष्यति (७.१.३) । ‘ शण्डिकादिभ्यो ञ्यः’ (४.३.९२) - शाण्डिक्यः। टवर्गः, ‘चरेष्टः’ (३.२.१६) - कुरुचरी, मद्रचरी । ठस्य इकादेशं वक्ष्यति (७.३.५०) । ‘ सप्तम्यां जनेर्डः’ (३.२.९७) - उपसरजः, मन्दुरजः । ढस्य एयादेशं वक्ष्यति (७.१.२) । ‘अन्नाण्णः’ (४.४.८५) - आन्नः ।

पृथग्योगकरणमस्य विधेरनित्यत्वज्ञापनार्थम् । ‘ तेन वित्तश्चुञ्चुप्चणपौ ’ (५.२.२६) - केशचुञ्चुः, केशचणः । ‘ अवात्कुटारच्च’ (५.२.३०) । नते नासिकायाः संज्ञायां टीटञ्नाटञ्भ्रटचः (५.२.३१) - अवटीटः । आदिरित्येव - ‘ कर्मणि घटोऽठच् ’ (५.२.३५) - कर्मठः ॥

१५६. लशक्वतद्धिते ॥ ८ ॥ (१९५)

तद्धितवर्जितस्य प्रत्ययस्यादितो वर्तमाना लकारशकारकवर्गा इत्संज्ञा भवन्ति । लकारः, ‘ ल्युट् च ’ (३.३.११५) - चयनम्, जयनम्, । शकारः, ‘कर्त्तरि शप्’ (३.१.६८) - भवति, पचति। कवर्गः, ‘क्तक्तवतू निष्ठा’ (१.१.२६) - भुक्तः, भुक्तवान् । ‘प्रियवशे वदः खच्’ (३.२.३८) - प्रियंवदः, वशंवदः । ‘ग्लाजिस्थश्च ग्स्नुः’ (३.२.१३९) - ग्लास्नुः, जिष्णुः, भूष्णुः ।

'भञ्जभासमिदो घुरच्' (३.२.१६१) - भङ्गुरम् । 'टाङसिङसामिनात्स्याः' (५.२.१६) - वृक्षात् । वृक्षस्य ।

अतद्धित इति किम्? चूडालः (५.२.९६) । लोमशः (५.२.१००) । कर्णिका (४.३.६५) ॥

१५७. तस्य लोपः ॥ ९ ॥ (६२)

तस्य इत्संज्ञकस्य लोपो भवति । तथा चैवाहृतम् । ' तस्य ' ग्रहणं सर्वलोपार्थम् । ' अलोऽन्त्यस्य ' (१.१.५२) मा भूत् - ' आदिर्ञिटुडवः ' (१.३.५) इति ॥

१५८. यथासंख्यमनुदेशः समानाम् ॥ १० ॥ (१२८)

संख्याशब्देनात्र क्रमो लक्ष्यते । यथासंख्यं = यथाक्रममनुदेशो भवति । अनुदिश्यत इत्यनुदेशः = पश्चा दुच्चार्यत इत्यर्थः । समानाम् = समसंख्यानां समं परिपठितानामुद्देशिनामनुदेशिनां च यथाक्रममुद्देशिभिरनुदेशिनः संबध्यन्ते। 'तुदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः' (४.३.९४) । प्रथमात् प्रथमः, द्वितीयाद् द्वितीय इत्यादि । तौदेयः । शालातुरीयः । वार्मतेयः । कौचवार्यः ।

समानामिति किम्? ' लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः ' (१.४.९०)। लक्षणादय श्चत्वारोऽर्थाः, प्रत्यादयस्त्रयः, सर्वेषां सर्वत्र कर्मप्रवचनीयसंज्ञा भवति ।

इह कस्मान्न भवति - ' वेशोयशआदेर्भगाद्यल् ' (४.४.१३१) ' ख च' (४.४.१३२) इति? स्वरितेन लिङ्गेन यथासंख्यम् । यत्र नेष्यते, तत्र स्वरितत्वं न प्रतिज्ञायते । ' स्वरितेनाधिकारः' (१.३.११) इति स्वरितग्रहणं पूर्वेणापि संबध्यते ॥

१५९. स्वरितेनाधिकारः ॥ ११ ॥ (४६)

'स्वरितेन' इति 'इत्थम्भूतलक्षणे' (२.३.२१) तृतीया । स्वरितो नाम स्वरविशेषो वर्णधर्मः, तेन चिह्नेनाधिकारो वेदितव्यः । अधिकारः = विनियोगः। स्वरितगुणयुक्तं शब्दरूपमधिकृतत्वादुत्तरत्रोपतिष्ठते ।

'प्रतिज्ञास्वरिताः पाणिनीयाः' (व्या. प. १२२) - 'प्रत्ययः' (३.१.१), 'धातोः' (३.१.९१), 'ङ्याप्प्रातिपदिकात्' (४.१.१), 'अङ्गस्य' (६.४.१), 'भस्य' (६.१.१२९), 'पदस्य' (८.१.१६) ॥

१६०. अनुदात्तङित आत्मनेपदम् ॥ १२ ॥ (२१५७)

अविशेषेण धातोरात्मनेपदं परस्मैपदं च विधास्यते, तत्रायं नियमः क्रियते - अनुदात्तेतो ये धातवो ङितश्च तेम्य एव आत्मनेपदं भवति, नान्येभ्यः । अनुदात्तेद्भ्यः - 'आस्' (धा. पा. १०२२) आस्ते । 'वस्' (धा. पा. १०२४) वस्ते । ङिद्भ्यः खल्वपि - ' षूङ् ' (धा. पा. १०३२) सूते । 'शीङ्' (धा. पा. १०३३) शेते ।

१६१. भावकर्मणोः ॥ १३ ॥ (२६७९)

'लः कर्मणि च भावे चाकर्मकेभ्यः' (३.४.६९) इति भावकर्मणोर्विहितस्य लस्य तिबादयः सामान्येन वक्ष्यन्ते, तत्रेदमुच्यते - भावे कर्मणि चात्मनेपदं भवति । भावे - ग्लायते भवता, सुप्यते भवता, आस्यते भवता । कर्मणि - क्रियते कटः, ह्रियते भारः । कर्मकर्त्तरि - लूयते केदारः स्वयमेवेति, परस्मैपदं न भवति । तस्य (१.३.७८) विधाने द्वितीयं कर्तृग्रहणमनुवर्तते, (१.३.१४) तेन कर्त्तैव यः कर्त्ता तत्र परस्मैपदं भवति ॥

१६२. कर्त्तरि कर्मव्यतीहारे ॥ १४ ॥ (२६८०)

कर्मशब्दः क्रियावाची, व्यतीहारो = विनिमयः । यत्रान्यसम्बन्धिनीं क्रियामन्यः करोति इतरसम्बन्धिनीं चेतरः, स कर्मव्यतीहारः । तद्विशिष्टक्रियावचनाद्धातोरात्मनेपदं भवति । व्यतिलुनते, व्यतिपुनते ।

कर्मव्यतीहारे इति किम् ? लुनन्ति ।

कर्तृग्रहणमुत्तरार्थम् - ' शेषात्कर्त्तरि परस्मैपदम् ' (१.३.७८) इति ।

१६३. न गतिहिंसार्थेभ्यः ॥ १५ ॥ (२६८१)

पूर्वेणात्मनेपदं प्राप्तं प्रतिषिध्यते । गत्यर्थेभ्यो हिंसार्थेभ्यश्च धातुभ्यः कर्मव्यतीहारे आत्मनेपदं न भवति । व्यतिगच्छन्ति, व्यतिसर्पन्ति । हिंसार्थेभ्यः - व्यतिहिंसन्ति, व्यतिघ्नन्ति।

प्रतिषेधे हसादीनामुपसंख्यानम् (म. भा. १.३.१५ वा. १) । व्यतिहसन्ति, व्यतिजल्पन्ति, व्यतिपठन्ति ।

हरतेरप्रतिषेधः (म. भा. १.३.१५ वा. २) । सम्प्रहरन्ते राजानः । [संविवहन्ते गर्गैरिति]।

१६४. इतरेतरान्योऽन्योपपदाच्च ॥ १३ ॥ (२६८२)

इतरेतरः, अन्योऽन्यः - इत्येवमुपपदाद्धातोः कर्मव्यतीहारे आत्मनेपदं न भवति । इतरेतरस्य व्यतिलुनन्ति, अन्योऽन्यस्य व्यतिलुनन्ति ।

परस्परोपपदाच्चेति वक्तव्यम् (म.भा. १.३.१६ वा. १) । परस्परस्य व्यतिलुनन्ति ॥

१६५. नेर्विशः ॥ १८ ॥ (२६८३)

' शेषात्कर्तरि परस्मैपदम् ' (१.३.७८) इति परस्मैपदे प्राप्ते, निपूर्वाद्विश आत्मनेपदं विधीयते । नेः परस्माद्विश आत्मनेपदं भवति । निविशते, निविशन्ते।

नेरिति किम्? प्रविशति । ' यदागमास्तद्ग्रहणेन गृह्यन्ते ' (प. ११), तेनाटा नास्ति व्यवधानम् । न्यविशत । नेरुपसर्गस्य ग्रहणम् - ' अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् ' (व्या. प. १) इति, तस्मादिह न भवति । मधुनि विशन्ति भ्रमराः ॥

१६६. परिव्यवेभ्यः क्रियः ॥ १८ ॥ (२६८४)

'डुक्रीञ् द्व्व्यविनिमये' (धा. पा. १४७४) ञित्त्वात्कर्त्रभिप्राये क्रियाफले सिद्धमात्मनेपदम्। अकर्त्रभिप्रायार्थोऽयमारम्भः । परिव्यवेभ्य उत्तरस्मात् क्रीणातेरात्मनेपदं भवति । परिक्रीणीते, विक्रीणीते, अवक्रीणीते ।

पर्यादय उपसर्गा गृह्यन्ते, तेनेह न भवति - बह विक्रीणाति वनम् ॥

१६७. विपराभ्यां जेः ॥ १९ ॥ (२६८५)

'शेषात्कर्त्तरि परस्मैपदम्' (१.३.७८) इत्यस्यापवादः । विपरापूर्वाज्जयतेर्धातोरात्मनेपदं भवति । विजयते, पराजयते । विपराशब्दावुपसर्गौ गृह्येते, साहचर्यात् । तेनेह न भवति - बहु वि जयति वनम् । परा जयति सेनेति (म. भा. १.३.१९) ॥

१६८. आङो दोऽनास्यविहरणे ॥ २० ॥ (२६८६)

अकर्त्रभिप्रायार्थोऽयमारम्भः । आङ्पूर्वाद्दादतेरनास्यविहरणे वर्तमानादात्मनेपदं भवति । विद्यामादत्ते ।

अनास्यविहरण इति किम्? आस्यं व्याददाति ।

आस्यविहरणसमानक्रियादपि प्रतिषेधो वक्तव्यः (म. भा. १.३.२०) । विपादिकां व्याददाति । कूलं व्याददाति (म. भा. १.३.२०) ।

स्वाङ्गकर्मकाच्चेति (म. भा. १.३.२० वा. २) । इह मा भूत् - व्याददते पिपीलिकाः पतङ्गस्य मुखम् (म.भा. १.३.२०) ॥

१६९. क्रीडोऽनुसंपरिभ्यश्च ॥ २१ ॥ (२६८७)

' क्रीङृ विहारे ' (धा. पा. ३५०) - एतस्माद् अनु, सम्, परि - इत्येवंपूर्वाद् आङ्पूर्वाच्च आत्मनेपदं भवति । अनुक्रीडते, संक्रीडते, परिक्रीडते। आङः खल्वपि - आक्रीडते ।

समासाहचर्यादन्वादिरुपसर्गो गृह्यते, तेनेह कर्मप्रवचनीयप्रयोगे न भवति - माणवकमनु कीडति (म. भा. १.३.२१) ।

समोऽकूजने इति वक्तव्यम् (म. भा. १.३.२१ वा. २) । इह मा भूत् - संक्रीडन्ति शकटानि ।

आगमेः क्षमायामात्मनेपदं वक्तव्यम् (म. भा. १.३.२१ वा. ३) । क्षमा = उपेक्षा, कालहरणमिति यावत् । आगमयस्व तावन्माणवकम् ।

शिक्षेर्जिज्ञासायाम् (म. भा. १.३.२१ वा. ४) । विद्यासु शिक्षते (म. भा. १.३.२१)।

आशिषि नाथः (म. भा. १.३.२१ वा. ७) । सपिषो नाथते । मधुनो नाथते (म. भा. १.३.२१) । आशिषीति किम्? माणवकमनु नाथति।

हरतेर्गततायाच्छील्ये (म. भा. १.३.२१ वा. ६) । पैतृकमश्वा अनुहरन्ते, मातृकं गावोऽनुहरन्ते (म. भा. १.३.२१ वा. ६) । गतताच्छील्य इति किम्? मातुरनुहरति । [पितुरनुहरति ।]

किरतेर्हर्षजीविकाकुलायकरणेष्विति वक्तव्यम् (म. भा. १.३.२१ वा. ५) । अपस्किरते वृषभो हृष्टः । जीविकायाम् - अपस्किरते कुक्कुटो भक्षार्थी। कुलायकरणे - अपस्किरते श्वाऽऽश्रयार्थी (म. भा. १.३.२१ वा. ५) । हर्षादिष्विति किम् ? अपकिरति कुसुमम् ।

आशिषि नाथः । सर्पिषो नाथते । आङि नुप्रच्छ्रयोरुपसंख्यानम् (म. भा. १.३.२१ वा. ८)। आनुते श्रृगालः, आपृच्छते गुरुम् ।

शप उपलम्भन इति वक्तव्यम् (म. भा. १.३.२१ वा. ९) । वाचा शरीरस्पर्शनम् = उपलम्भनम् । देवदत्ताय शपते, यज्ञदत्ताय शपते (म. भा. १.३.२१) । उपलम्भने इति किम् ? शपति ॥

१७०. समवप्रविभ्यः स्थः ॥ २२ ॥ (२६८९)

सम्, अव, प्र, वि - इत्येवंपूर्वात् तिष्ठतेरात्मनेपदं भवति । सन्तिष्ठते, प्रतिष्ठते, वितिष्ठते॥

आङः स्थः प्रतिज्ञाने इति वक्तव्यम् (म. भा. १.३.२२ वा. १) । अस्तिं सकारमात्रमातिष्ठते आगमौ गुणवृद्धी आतिष्ठते (म. भा.) ॥

१७१. प्रकाशनस्थेयाख्ययोश्च ॥ २३ ॥ (२६९०)

स्वाभिप्रायकथनं प्रकाशनम् । स्थेयस्याख्या स्थेयाख्या । तिष्ठन्त्यस्मिन्निति स्थेयः, विवादपदनीर्णेता लोके स्थेय इति प्रसिद्धः, तस्य प्रतिपत्त्यर्थमाख्या-ग्रहणम् । प्रकाशने स्थेयाख्यायां च तिष्ठतेरात्मनेपदं भवति । प्रकाशने तावत् - तिष्ठते कन्या छात्रेभ्यः । तिष्ठते वृषली ग्रामपुत्रेभ्यः । प्रकाशयत्यात्मानमित्यर्थः। स्थेयाख्यायाम् - त्वयि तिष्ठते, मयि तिष्ठते 'संशय्य कर्णादिषु तिष्ठते यः' (कि. ३.१४) ॥

१७२. उदोऽनूर्ध्वकर्मणि ॥ २४ ॥ (२६९१)

उत्पूर्वात्तिष्ठतेरनूर्ध्वकर्मणि वर्त्तमानादात्मनेपदं भवति । कर्मशब्दः क्रियावाची । अनूर्ध्वकर्मविशिष्टात् क्रियावचनात्तिष्ठतेरात्मनेपदं भवति । गेहे उत्तिष्ठते । कुटुम्बे उत्तिष्ठते। तदर्थं यतते इत्यर्थः ।

उद ईहायामिति वक्तव्यम् (म. भा. १.३.२४ वा. १) इह मा भूत् - अस्माद् ग्रामात् शतमुत्तिष्ठति । शतमुत्पद्यते इत्यर्थः । ईहाग्रहणमनूर्ध्वकर्मण एव विशेषणम्, नापवादः ।

अनूर्ध्वकर्मणीति किम्? आसनादुत्तिष्ठति ॥

१७३. उपान्मन्त्रकरणे ॥ २५ ॥ (२६९२)

उपपूर्वात्तिष्ठतेर्मन्त्रकरणेऽर्थे वर्त्तमानादात्मनेपदं भवति । ऐन्द्र्या गार्हपत्यमुपतिष्ठते। आग्नेय्याऽऽग्नीध्रमुपतिष्ठते ।

मन्त्रकरण इति किम्? भर्तारमुपतिष्ठति यौवनेन ।

उपाद्देवपूजासंगतिकरणमित्रकरणपथिष्विति वाच्यम् (म. भा. १.३.२५ वा. १) । देवपूजायाम् आदित्यमुपतिष्ठते । सङ्गतिकरणे - रथिकानुपतिष्ठते । मित्रकरणे - महामात्रानुपतिष्ठते । मित्रकरणसंगतिकरणयोः को विशेषः ? संगतिकरणमुपश्लेषः, तद्यथा - गङ्गा यमुनामुपतिष्ठते; मित्रकरणं तु विनाप्युपश्लेषेण मैत्रीसम्बन्धः । पथि - अयं पन्थाः सुघ्नमुपतिष्ठते ।

वा लिप्सायामिति वक्तव्यम् (म. भा. १.३.२५ वा. २) । भिक्षुको ब्राह्मणकुलमुपतिष्ठते, उपतिष्ठतीति वा (म. भा. १.३.२५) ॥

१७५. अकर्मकाच्च ॥ २६ ॥ (२६९३)

'उपात्' इति वर्त्तते । उपपूर्वात् तिष्ठतेरकर्मकात् = अकर्मकक्रियावचनादात्मनेपदं भवति। यावद्भुक्तमुपतिष्ठते । यावदोदनमुपतिष्ठते। भुक्तम् इति भावे क्तप्रत्ययः । भोजने भोजने सन्निधीयते इत्यर्थः ।

अकर्मकादिति किम् ? राजानमुपतिष्ठति ॥

१७५. उद्विभ्यां तपः ॥ २७ ॥ (२६९४)

' अकर्मकात् ' इति वर्त्तते । उत् वि - इत्येवं पूर्वात् तपतेरकर्मकक्रियावचनादात्मनेपदं भवति । उत्तपते, वितपते । दीप्यत इत्यर्थः। अकर्मकादित्येव । [इह मा भूत्] उत्तपति सुवर्णं सुवर्णकारः । वितपति पृष्ठं सविता ।

स्वाङ्गकर्मकाच्चेति वक्तव्यम् (म. भा. १.३.२७ वा. १) । उत्तपते पाणिम्, उत्तपते पृष्ठम्; वितपते पाणिम्, वितपते पृष्ठम् । स्वाङ्गं चेह न पारिभाषिकं गृह्यते - अद्रवं मूर्त्तिमत् स्वाङ्गम् इति; किं तर्हि ? स्वमङ्गं स्वाङ्गम् । तेनेह न भवति - देवदत्तो यज्ञदत्तस्य पृष्ठमुत्तपतीति ।

उद्विभ्यामिति किम् ? निष्टपति ॥

१७६. आङो यमहनः ॥ २८ ॥ (२६९५)

' अकर्मकात् ' इति वर्त्तते । यम उपरमे (धा. पा. ९८४), ' हन हिंसागत्योः' (धा. पा. १०९२) इति परस्मैपदिनौ । ताभ्यामकर्मकक्रियावचना-भ्यामाङ्पूर्वाभ्यामात्मनेपदं भवति । आयच्छते, आयच्छेते, आयच्छन्ते । हनः खल्वपि - आहते, आघ्नाते, आघ्नते । अकर्मकादित्येव - आयच्छति कूपाद् रज्जुम्, आहन्ति वृषलं पादेन (म. भा. १.३.२८ वा. १) ।

स्वाङ्गकर्मकाच्चेति वक्तव्यम् (म. भा. १.३.२८ वा. २) । आयच्छते पाणिम्। आहते शिरः (म. भा. १.३.२८) । स्वाङ्गं चेह न पारिभाषिकं गृह्यते, किं तर्हि? स्वमङ्गं स्वाङ्गम्, तेनेह न भवति - आहन्ति शिरः परकीयमिति॥

१७७. समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः ॥ २९ ॥ (२६९९)

' अकर्मकात् ' इति वर्त्तते । ' शेषात् कर्त्तरि परस्मैपदम् ' (१.३.७८) इति प्राप्ते, संपूर्वेभ्यो गमि - ऋच्छि-प्रच्छि - स्वरति - अर्ति - श्रु - विदि - इत्येतेभ्योऽकर्मकेभ्यो धातुभ्य आत्मनेपदं भवति । संगच्छते । समृच्छते। संपृच्छते। संस्वरते । संकल्पा अस्य समरन्त ।

अर्तेर्लुङि च्लेः ' सर्तिशास्त्यर्तिभ्यश्च ' (३.१.५६) इत्यङादेशः । तत्र ' परस्मैपदेषु ' (३.१.५५) इत्येतन्नाश्रीयते, ' बहुलं छन्दस्यमाङ्योगेऽपि ' (६.४.७५) इत्याट् प्रतिषिध्यते । ' ऋदृशोऽङि गुणः ' (७.४.१६) इति गुणः। समरन्त । संशृणुते । संवित्ते ।

ऋच्छेरनादेशस्य ग्रहणम् - समृच्छिष्यते । अर्त्यादेशस्य त्वर्त्तीत्येवं सिद्धमात्मनेपदम् । अर्तिरुभयत्र पठ्यते - ' ऋ गतिप्रापणयोः ' (धा. पा. ९३६) इति भ्वादौ, ' ऋ सृ गतौ ' (धा. पा. १०९८ - १०९९) इति जुहोत्यादौ; विशेषाभावाद् द्वयोरपि ग्रहणम् ।

विदेर्ज्ञानार्थस्य ग्रहणम्, (धा. पा. १०६५) परस्मैपदिभिर्गमादिभिः साहचर्यान्न लाभार्थस्य। स्वरितेतत्वादुभयतोभाषस्य (धा. पा. १४३३) ।

दृशेश्चेति वक्तव्यम् (म. भा. १.३.२९ वा. २) । संपश्यते । अकर्मकादित्येव - ग्रामं संपश्यति ।

१७८. निसमुपविभ्यो ह्वः ॥ ३० ॥ (२७०३)

' अकर्मकात् ' इति निवृत्तम् । अतः परं सामान्येनात्मनेपदविधानं प्रतिपत्तव्यम् । नि, सम्, उप, वि-इत्येवम्पूर्वाद् ह्वयतेर्द्धातोरात्मनेपदं भवति । निह्वयते, संह्वयते, उपह्वयते, विह्वयते । अकर्त्रभिप्रायार्थोऽयमारम्भः । अन्यत्र हि ञित्त्वात् सिद्धमेवात्मनेपदम् ॥

उपसर्गादस्यत्यूह्योर्वा वचनम् (मा. भा. १.३.२९ वा. ३) । निरस्यति, निरस्यते । समूहति । समूहते ॥

१७९. स्पर्द्धायामाङः ॥ ३१ ॥ (२७०४)

अकर्त्रभिप्रायार्थोऽयमारम्भः । स्पर्द्धायां विषये आङ्पूर्वाद् ह्वयतेरात्मनेपदं भवति । स्पर्द्धा=संघर्षः, पराभिभवेच्छा, स विषयो धात्वर्थस्य । धातुस्तु शब्दक्रिय एव । मल्लो मल्लमाह्वयते, छात्रश्छात्रमाह्वयते । स्पर्द्धमानस्तस्याह्वानं करोतीत्यर्थः ।

स्पर्द्धायामिति किम् ? गामाह्वयति गोपालः ॥

१८०. गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनो-पयोगेषु कृञः ॥ ३२ ॥ (२७०५)

कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम् । अकर्त्रभिप्रायार्थोऽयमारम्भः। गन्धनादिष्वर्थेषु वर्त्तमानात्करोतेरात्मनेपदं भवति । गन्धनम्=अपकारप्रयुक्तं हिंसात्मकं सूचनम् । तथा हि - ' वस्त गन्ध अर्द्दने ' (धा. पा. १६८४ - १६८५) ' अर्द्द हिंसायाम् ' (धा. पा. १८२९), इति चुरादौ पठ्यते । अवक्षेपणम्=भर्त्सनम् । सेवनम्=अनुवृत्तिः । साहसिक्यम्=साहसिकं कर्म ।

प्रतियत्नः=सतो गुणान्तराधानम्। प्रकथनम् = प्रकर्षेण कथनम् । उपयोगः=धर्मादिप्रयोजनो विनियोगः ।

गन्धने तावत् - उत्कुरुते । उदाकुरुते । सूचयतीत्यर्थः । अवक्षेपणे - श्येनो वर्त्तिकामुदाकुरुते । भर्त्सयतीत्यर्थः । सेवने - गणकानुपकुरुते, महामात्रानुपकुरुते । सेवते इत्यर्थः । साहसिक्ये - परदारान् प्रकुरुते । तेषु सहसा प्रवर्तते इत्यर्थः । प्रतियत्ने - एधो दकस्योपस्कुरुते । काण्डं गुडस्योपस्कुरुते । तस्य सतो गुणान्तराधानं करोतीत्यर्थः ।

षष्ठीसुटौ करोतेः प्रतियत्न एव विधीयेते (२-३.५३); ६.१.१३९) । प्रकथने - गाथाः प्रकुरुते । जनापवादान् प्रकुरुते । प्रकर्षेण कथयतीत्यर्थः। उपयोगे - शतं प्रकुरुते, सहस्रं प्रकुरुते। धर्मार्थं शतं विनियुङ्क्त इत्यर्थः ।

एतेष्विति किम् ? कटं करोति ॥

१८१. अधेः प्रसहने ॥ ३३ ॥ (२७०६)

अकर्त्रभिप्रायार्थोऽयमारम्भः । अधिपूर्वात् करोतेः प्रसहने वर्त्तमानादात्मनेपदं भवति । प्रसहनम् अभिभवः, अपराजयो वा । तमधिचक्रे । तमभिबभूव, न तेन पराजित इति वा ।

प्रसहन इति किम् ? अर्थमधिकरोति । पृथग्योगकरणमुपसर्गविशेषणार्थम् ॥

१८२. वेः शब्दकर्मणः ॥ ३४ ॥ (२७०७)

' कृञः ' इत्यनुवर्तते । विपूर्वात्करोतेरकर्त्रभिप्राये क्रियाफले शब्दकर्मण आत्मनेपदं भवति । कर्मशब्द इह कारकाभिधायी, न क्रियावचनः । ' क्रोष्टा विकुरुते स्वरान् । ध्वाङ्क्षो विकुरुते स्वरान् ।'

शब्दकर्मण इति किम् ? विकरोति पयः ॥

१८३. अकर्मकाच्च ॥ ३५ ॥ (२७०८)

' वेः कृञः ' इत्यनुवर्त्तते । विपूर्वात् करोतेरकर्मकक्रियावचनादात्मनेपदं भवति । विकुर्वते सैन्धवाः । साधुदान्ताः शोभनं वल्गन्तीत्यर्थः । ओदनस्य पूर्णाश्छात्रा विकुर्वते । निष्फलं चेष्टन्त इत्यर्थः ॥

१८४. सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ॥ ३६ ॥ (२७०९)

' णीञ् प्रापणे' (धा. पा. ९०१) - अस्मात् कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम् । अकर्त्रभिप्रायार्थोऽयमारम्भः । 'णीञ् प्रापणे' - इत्येतस्माद्धातोरात्मनेपदं भवति सम्माननादिषु विशेषणेषु सत्सु ।

सम्माननम् = पूजनम् । नयते चार्वी लोकायते । चार्वी = बुद्धिः, तत्सम्बन्धादाचार्योऽपि चार्वी, स लोकायते शास्त्रे पदार्थान् नयते, उपपत्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रापयति, ते युक्तिभिः स्थाप्यमानाः सम्मानिताः पूजिता भवन्ति।

उत्सञ्जनम् = उत्क्षेपणम् । माणवकमुपनयते । उत्क्षिपतीत्यर्थः ।

आचार्यकरणम् = आचार्यक्रिया । माणवकमीदृशेन विधिनाऽऽत्मसमीपं प्रापयति, यथा स उपनेता स्वयमाचार्यः संपद्यते । माणवकमुपनयते । आत्मानमाचार्यीकुर्वन् माणवकमात्मसमीपं प्रापयतीत्यर्थः ।

ज्ञानम् = प्रमेयनिश्चयः । नयते चार्वी लोकायते । तत्र प्रमेयं निश्चिनोतीत्यर्थः।

भृतिः = वेतनम् । कर्मकरानुपनयते । भृतिदानेन समीपं करोतीत्यर्थः ।

विगणनम् = ऋणादेर्निर्यातनम् । मद्राः करं विनयन्ते । निर्यातयन्तीत्यर्थः।

व्ययः = धर्मादिषु विनियोगः । शतं विनयते, सहस्रं विनयते । धर्माद्यर्थं शतं विनियुङ्क्त इत्यर्थः ।

एतेष्विति किम्? अजां नयति ग्रामम् ॥

१८५. कर्तृस्थे चाशरीरे कर्मणि ॥ ३७ ॥ (२७१०)

नयतेः कर्त्ता देवदत्तादिर्लकारवाच्यः । कर्त्तृस्थे कर्मण्यशरीरे सति नयतेरात्मनेपदं भवति। शरीरम् प्राणिकायः , तदेकदेशोऽपि शरीरम् । क्रोधं विनयते, मन्यु विनयते ।

कर्त्तृस्थ इति किम् ? देवदत्तो यज्ञदत्तस्य क्रोधं विनयति । अशरीर इति किम्? गडु विनयति । घाटां विनयति । कर्मणीति किम् ? बुद्ध्या विनयति । प्रज्ञया विनयति ।

१८६. वृत्तिसर्गतायनेषु क्रमः ॥ ३८ ॥ (२७११)

' शेषात्कर्त्तरि परस्मैपदे' प्राप्ते वृत्त्यादिष्वर्थेषु क्रमेर्धातोरात्मनेपदं भवति । वृत्तिः = अप्रतिबन्धः । सर्गः = उत्साहः । तायनम् = स्फीतता । वृत्तौ तावत् - ऋक्ष्वस्य क्रमते बुद्धिः। न प्रतिहन्यत इत्यर्थः । यजुःष्वस्य क्रमते बुद्धिः। सर्गे - व्याकरणाध्ययनाय क्रमते । उत्सहते इत्यर्थः । तायने - अस्मिन् शास्त्राणि क्रमन्ते । स्फीतीभवन्तीत्यर्थः। एतेष्विति किम् ? अपक्रामति ॥

१८७. उपपराभ्याम् ॥ ३९ ॥ (२७१२)

'वृत्तिसर्गतायनेषु ' इति वर्त्तते । उपपरापूर्वात्क्रमतेर्वृत्त्यादिष्वर्थेषु वर्त्तमानादात्मनेपदं भवति । किमर्थं तर्हीदमुच्यते ? उपसर्गनियमार्थम् - सोपसर्गादुपपरापूर्वादेव, नान्यपूर्वादिति । उपक्रमते, पराक्रमते ।

उपपराभ्यामिति किम् ? संक्रामति । वृत्त्यादिष्वित्येव - उपक्रामति, पराक्रामति ॥

१८८. आङ उद्गमने ॥ ४० ॥ (२७१३)

आङ्पूर्वात् क्रमतेरुद्गमने वर्त्तमानादात्मनेपदं भवति । आक्रमते आदित्यः। आक्रमते चन्द्रमाः । आक्रमन्ते ज्योतींषि ।

उद्गमन इति किम् ? आक्रामति माणवकः कुतुपम् ।

ज्योतिरुद्गमने इति वक्तव्यम् (म. भा. १.३.४०, वा. १) । इह मा भूत् - आक्रामति धूमो हर्म्यतलात् (म. भा. १.३.४०) ॥

१८९. वेः पादविहरणे ॥ ४१ ॥ (२७१४)

विपूर्वात् क्रमतेः पादविहरणेऽर्थे वर्त्तमानादात्मनेपदं भवति । विहरणम्= विक्षेपः । सुष्ठु विक्रमते, साधु विक्रमते । अश्वादीनां गतिविशेषो विक्रमणमुच्यते। यद्यपि क्रमिः पादविहरण एव पठ्यते - 'क्रमु पादविक्षेपे ' (धा. पा. ४७३) इति, तथाप्यनेकार्थत्वाद्धातूनामेवमुक्तम् ।

पादविहरणे इति किम् ? विक्रामत्यजिनसन्धिः ।

१९०. प्रोपाभ्यां समर्थाभ्याम् ॥ ४२ ॥ (२७१५)

'प्र उप ' इत्येताभ्यामुपसर्गाभ्यां परस्मात् क्रमतेरात्मनेपदं भवति, तौ चेत् प्रोपौ समर्थौ तुल्यार्थौ भवतः । क्व चानयोस्तुल्यार्थता? आदिकर्मणि। प्रक्रमते भोक्तुम् , उपक्रमते भोक्तुम्।

समर्थाभ्यामिति किम्? पूर्वेद्युः प्रक्रामति । गच्छतीत्यर्थः । अपरेद्युरुपक्रामति। आगच्छतीत्यर्थः । अथ ' उपपराभ्याम् ' (१.३.३९) इत्यनेनात्मनेपदमत्र कस्मान्न भवति ? वृत्त्यादिग्रहणं तत्रानुवर्त्तते ततोऽन्यत्रेदं प्रत्युदाहरणम् ॥

१९१. अनुपसर्गाद्वा ॥ ४३ ॥ (२७१६)

'क्रम ' इति वर्त्तते । अप्राप्तविभाषेयम् । उपसर्गवियुक्तात्क्रमतेरात्मनेपदं वा भवति । क्रमते । क्रमति ।

अनुपसर्गादिति किम्? संक्रामति ॥

१९२. अपह्नवे ज्ञः ॥ ४४ ॥ (२७१७)

शेषात्कर्त्तरि परस्मैपदे (१.३.७८) प्राप्ते जानातेरपह्नवे वर्त्तमानाद् आत्मनेपदं भवति । अपह्नवः अपह्नुतिः, अपलापः । सोपसर्गश्चायमपह्नवे वर्त्तते, न केवलः। शतमपजानीते, सहस्रमपजानीते । अपलपतीत्यर्थः ।

अपह्नव इति किम्? न त्वं किञ्चिदपि जानासि ॥

१९३. अकर्मकाच्च ॥ ४५ ॥ (२७१८)

अकर्त्रभिप्रायार्थमिदम्, कर्त्रभिप्राये हि 'अनुपसर्गाज्ज्ञः' (१.३.७६) इति जानातेरकर्मकादकर्मकक्रियावचनादात्मनेपदं भवति । सर्पिषो जानीते, मधुनो जानीते। कथं चायमकर्मकः? नात्र सर्पिरादि ज्ञेयत्वेन विवक्षितम्, किं तर्हि? ज्ञानपूविकायां प्रवृत्तौ करणत्वेन। तथा च - ' ज्ञोऽविदर्थस्य करणे ' (२.३.४१) इति षष्ठी विधीयते । सर्पिषो जानीते, मधुनो जानीते । सर्पिषा उपायेन प्रवर्त्तत इत्यर्थः ।

अकर्मकादिति किम् ? स्वरेण पुत्रं जानाति ॥

१९४. संप्रतिभ्यामनाध्याने ॥ ४६ ॥ (२७१९)

'ज्ञः' इति वर्त्तते । सकर्मकार्थमिदम् । 'सं प्रति' इत्येवंपूर्वात् जानातेरनाध्याने वर्त्तमानादात्मनेपदं भवति । आध्यानम्=उत्कण्ठास्मरणम् । शतं संजानीते । सहस्रं संजानीते। शतं प्रतिजानीते, सहस्रं प्रतिजानीते ।

अनाध्याने इति किम् ? मातुः संजानाति, पितुः संजानाति । उत्कण्ठते इत्यर्थः (२.३.५२) ।

१९५. भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः ॥ ४७ ॥ (२७२०)

शेषात्कर्त्तरि परस्मैपदे (१.३.७८) प्राप्ते भासनादिषु विशेषणेषु सत्सु वदतेरात्मनेपदं भवति । भासनम्=दीप्तिः । वदते चार्वी लोकायते । भासमानो दीप्यमानस्तत्र पदार्थान् व्यक्तीकरोतीत्यर्थः । उपसंभाषा उपसान्त्वनम् । कर्मकरानुपवदते । उपसान्त्वयतीत्यर्थः । ज्ञानम् सम्यगवबोधः । वदते चार्वी लोकायते । जानाति वदितुमित्यर्थः । यत्नः=उत्साहः। क्षेत्रे वदते, गेहे वदते । तद्विषयमुत्साहमाविष्करोतीत्यर्थः । विमतिः=नानामतिः । क्षेत्रे विवदन्ते,

गेहे विवदन्ते । विमतिपतिता विचित्रं भाषन्त इत्यर्थः । उपमन्त्रणम्=रहस्युपच्छन्दनम्। कुलभार्यामुपवदते । परदारानुवदते । उपच्छन्दयतीत्यर्थः ।

एतेष्विति किम्? यत्किञ्चिद्वदति ॥

१९६. व्यक्तवाचां समुच्चरणे ॥ ४८ ॥ (२७२१)

'वदः' इति वर्त्तते । व्यक्तवाचां समुच्चारणं सहोच्चारणम्, तत्र वर्त्तमानाद्वदतेरात्मनेपदं भवति । ननु 'वद व्यक्तायां वाचि' (धा. पा. १००९) इत्येव पठ्यते, तत्र किं व्यक्तवाचामिति विशेषणेन? प्रसिद्ध्युपसंग्रहार्थमेतत् । व्यक्तवाच इति हि मनुष्याः प्रसिद्धाः, तेषां समुच्चारणे यथा स्यात् । संप्रवदन्ते ब्राह्मणाः । संप्रवदन्ते क्षत्रियाः ।

व्यक्तवाचामिति किम्? (वरतनु) संप्रवदन्ति कुक्कुटाः (म. भा. १.३.४८) समुच्चारणे इति किम्? ब्राह्मणो वदति । क्षत्रियो वदति ॥

१९७. अनोरकर्मकात् ॥ ४९ ॥ (२७२२)

' वदः ' इति ' व्यक्तवाचाम् ' इति च वर्त्तते । अनुपूर्वाद् वदतेरकर्मकाद् व्यक्तवाग्विषयादात्मनेपदं भवति । अनुवदते कठः कलापस्य । अनुवदते मौद्गः पैप्पलादस्य । अनुः सादृश्ये । यथा कलापोऽधीयानो वदति तथा कठ इत्यर्थः ।

अकर्मकादिति किम्? पूर्वमेव यजुरुदितमनुवदति । व्यक्तवाचामित्येव - अनुवदति वीणा॥

१९८. विभाषा विप्रलापे ॥ ५० ॥ (२७२३)

' वद ' इति वर्त्तते, ' व्यक्तवाचां समुच्चारणे ' इति च । विप्रलापात्मके व्यक्तवाचां समुच्चारणे वर्त्तमानाद्वदतेरात्मनेपदं भवति विभाषा । प्राप्तविभाषेयम्। विप्रवदन्ते सांवत्सराः, विप्रवदन्ति सांवत्सराः । विप्रवदन्ते मौहूर्त्ताः , विप्रवदन्ति मौहूर्त्ताः । युगपत्परस्परप्रतिषेधेन विरुद्धं वदन्तीत्यर्थः ।

विप्रलाप इति किम्? संप्रवदन्ते ब्राह्मणाः । व्यक्तवाचामित्येव - विप्रवदन्ति शकुनयः। समुच्चारण इत्येव - क्रमेण मौहूर्त्ता मौहूर्त्तेन सह विप्रवदन्ति ॥

१९९. अवाद् ग्रः ॥ ५१ ॥ (२७२४)

' गृ निगरणे ' (धा. पा. १४१०) इति तुदादौ पठ्यते, तस्येदं ग्रहणम्; न तु ' गृ शब्दे' (धा० पा० १४९८) इति क्र्यादिपठितस्य । तस्य ह्यवपूर्वस्य प्रयोग एव नास्ति (म. भा.

१.३.५१)। ' शेषात् कर्तरि परस्मैपदे ' (१.३.७८) प्राप्ते; अवपूर्वाद् गिरतेरात्मनेपदं भवति । अवगिरते, अवगिरेते, अवगिरन्ते । अवादिति किम् ? गिरति ॥

२००. समः प्रतिज्ञाने ॥ ५२ ॥ (२७२५)

' ग्रः' इति वर्त्तते । सपूर्वाद् गिरतेः प्रतिज्ञाने वर्त्तमानादात्मनेपदं भवति । प्रतिज्ञानम् = अभ्युपगमः। शंत संगिरते, नित्यं शब्दं संगिरते ।

प्रतिज्ञाने इति किम् ? संगिरति ग्रासम् ॥

२०१. उदश्चरः सकर्मकात् ॥ ५३ ॥ (२७२६)

' शेषात्कर्तरि परस्मैपदे ' (१.३.७८) प्राप्ते उत्पूर्वाच्चरतेः सकर्मकक्रियावचनादात्मनेपदं भवति । गेहमुच्चरते, कुटुम्बमुच्चरते, गुरुवचनमुच्चरते । उत्क्रम्य गच्छतीत्यर्थः ।

सकर्मकादिति किम्? बाष्पमुच्चरति ॥

२०२. समस्तृतीयायुक्तात् ॥ ५४ ॥ (२७२७)

सम्पूर्वाच्चरतेस्तृतीयायुक्तादात्मनेपदं भवति । 'तृतीया' इति तृतीयाविभक्तिर्गृह्यते, तया चरतेरर्थद्वारको योगः । अश्वेन संचरते ॥

तृतीयायुक्तादिति किम्? ' उभौ लोकौ संचरसि इमं चामुं च देवल' । (म. भा. १.३.५४) यद्यप्यत्र तदर्थयोगः संभवति, तृतीया तु न श्रूयत इति प्रत्युदाहरणं भवति ॥

२०३. दाणश्च सा चेच्चतुर्थ्यर्थे ॥ ५५ ॥ (२७२८)

' दाण् दाने ' (धा. पा. ९३०) परस्मैपदी । ततः संपूर्वात्तृतीयायुक्तादात्मनेपदं भवति, सा चेत्तृतीया चतुर्थ्यर्थे भवति ।

कथं पुनस्तृतीया चतुर्थ्यर्थे स्यात् ? वक्तव्यमेवैतत् - अशिष्टव्यवहारे तृतीया चतुर्थ्यर्थे भवतीति वक्तव्यम् । दास्या [मालां] संप्रयच्छते । वृषल्या संप्रयच्छते । (म. भा. १.३.४४ वा. १) कामुकः सन् दास्यै ददातीत्यर्थः।

चतुर्थ्यर्थे इति किम्? पाणिना संप्रयच्छति । समः प्रशब्देन व्यवधाने कथमात्मनेपदं भवति? 'समः' इति विशेषणे षष्ठी, न पञ्चमी ॥

२०४. उपाद्यमः स्वकरणे ॥ ५६ ॥ (२७२९)

शेषात्कर्त्तरि परस्मैपदे (१.३.७८) प्राप्ते उपपूर्वाद् यमः स्वकरणे वर्तमानादात्मनेपदं भवति । पाणिग्रहणविशिष्टमिह स्वकरणं गृह्यते, न स्वकरणमात्रम् । भार्यामुपयच्छते ।

स्वकरण इति किम्? देवदत्तो यज्ञदत्तस्य भार्यामुपयच्छति ॥

२०५. ज्ञाश्रुस्मृदृशां सनः ॥ ५७ ॥ (२७३१)

ज्ञा, श्रु, स्मृ, दृश् - इत्येतेषां सन्नन्तानामात्मनेपदं भवति । तत्र जानातेः ' अपह्नवे ज्ञः ' (१.३.४४) इति त्रिभिः सूत्रैरात्मनेपदं विहितम्, श्रुदृशोरपि 'समो गम्यृच्छि ' (१.३.२९) इत्यत्र विहितम्; तस्मिन्विषये ' पूर्ववत्सनः ' (१.३.६२) इत्येव सिद्धमात्मनेपदं ततोऽन्यत्रानेन विधीयते। स्मरतेः पुनरप्राप्त एव विधानम् । धर्मं जिज्ञासते । गुरुं शुश्रूषते । नष्टं सुस्मूर्षते । नृपं दिदृक्षते।

' सनः ' इति किम्? जानाति, शृणोति, स्मरति, पश्यति ।

२०६. नानोर्ज्ञः ॥ ५८ ॥ (२७३२)

पूर्वेण योगेन प्राप्तमात्मनेपदं प्रतिषिध्यते । अनुपूर्वाज्जानातेः सन्नन्तादात्मनेपदं न भवति । तथा च सति सकर्मकस्यैवायं प्रतिषेधः संपद्यते । पुत्रमनुजिज्ञासति ।

अनोरिति किम्? धर्मं जिज्ञासते ॥

२०७. प्रत्याङ्भ्यां श्रुवः ॥ ५९ ॥ (२७३३)

' प्रति, आङ् ' इत्येवम्पूर्वाच्छृणोतेः सन्नन्तादात्मनेपदं न भवति । प्रतिशुश्रूषति । आशुश्रूषति । उपसर्गग्रहणं चेदम्, तस्मादिह प्रतिषेधो न भवति - देवदत्तं प्रति शुश्रूषते ॥

२०८. शदेः शितः ॥ ६० ॥ (२३६२)

' शद्लृ शातने ' (धा. पा. १७५५) परस्मैपदी, तस्मादात्मनेपदं विधीयते । शदिर्यः शित्, शिद्भावी शितो वा सम्बन्धी तस्मादात्मनेपदं भवति। शीयते, शीयेते, शीयन्ते ।

शित इति किम्? अशत्स्यति । शत्स्यति । शिशत्सति ॥

२०९. म्रियतेर्लङ्लिङोश्च ॥ ६१ ॥ (२५६८)

‘ मृङ् प्राणत्यागे ’ , (धा. पा. १४०४) ङित्त्वादात्मनेपदमत्र सिद्धमेवेति नियमार्थमिदं वचनम् - म्रियतेर्लुङ्लिङोः शितश्चात्मनेपदं भवति, अन्यत्र न भवति । अमृत । मृषीष्ट । शितः खल्वपि - म्रियते, म्रियेते, म्रियन्ते ।

नियमः किमर्थः ? मरिष्यति । अमरिष्यत् ॥

२१०. पूर्ववत् सनः ॥ ६२ ॥ (२७३४)

सनः पूर्वो यो धातुः आत्मनेपदी तद्वत्सन्नन्तादात्मनेपदं भवति । येन निमित्तेन पूर्वस्मादात्मनेपदं विधीयते तेनैव सन्नन्तादपि भवति । ‘ अनुदात्तङित आत्मनेपदम्’ (१.३.१२) आस्ते, शेते । सन्नन्तादपि तदेव निमित्तम् - आसिसिषते, शिशयिषते (म. भा. १.३.६२) । ‘नेर्विशः’ (१.३.१७) । - निविशते, निविविक्षते । ‘आङ उद्गमने’ (१.३.४०) - आक्रमते, आचिक्रंसते ।

इह न भवति - शिशत्सति । मुमूर्षति । न हि शदिम्रियतिमात्रमात्मनेपदनिमित्तम् । किं तर्हि? शिदाद्यपि, तच्चेह नास्ति ।

यस्य च पूर्वत्रैव निमित्तभावः प्रतिषिध्यते, तत्सन्नन्तेऽप्यनिमित्तम् - अनुचिकीर्षति । पराचिकीर्षति ।

इह जुगुप्सते, मीमांसते इति ? ‘अनुदात्तेतः’ (१.३.१२) इत्येव सिद्धमात्मनेपदम् अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति (म. भा. १.३.६२, पृ. १७५) इति ॥

२११. आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य ॥ ६३ ॥ (२२४०)

अकर्त्रभिप्रायार्थोऽयमारम्भः । आम् प्रत्ययो यस्मात् सोऽयमाम्प्रत्ययः । आम्प्रत्ययस्येव धातोः कृञोऽनुप्रयोगस्यात्मनेपदं भवति । ईक्षाञ्चक्रे [ईहाञ्चक्रे]। यदि विध्यर्थमेतत्, तर्हि उदुब्जाञ्चकार, उदुम्भाञ्चकारेति कर्त्रभिप्राये क्रियाफले आत्मनेपदं प्राप्नोति? नैष दोषः; उभयमनेन क्रियते - विधिः, नियमश्च । कथम्? पूर्ववदिति वर्त्तते । स द्वितीयो यत्नो नियमार्थो भविष्यति ।

कृञ इति किम्? ईक्षामास, ईक्षाम्बभूव । कथं पुनरस्यानुप्रयोगः, यावता ‘ कृञ्चानुप्रयुज्यते लिटि ’ (३.१.४०) इत्युच्यते? ‘ कृञ् ’ इति प्रत्याहारग्रहणं तत्र विज्ञायते । क्व संनिविष्टानां प्रत्याहारः? ‘ अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विः’ (५.४.४०) इति कृशब्दादारभ्य यावत् ‘ कृञो द्वितीयतृतीयशम्बबीजात् कृषौ ’ (५.४.५८) इति ञकारम् ॥

२१२. प्रोपाभ्यां युजेरयज्ञपात्रेषु ॥ ६४ ॥ (७२५३)

'युजिर् योगे' (धा. पा. १४४५) स्वरितेत् । तस्य कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम्। अकर्त्रभिप्रायार्थोऽयमारम्भः । प्र, उप-इत्येवं पूर्वाद् युजेरयज्ञपात्रप्रयोगविषयादात्मनेपदं भवति । प्रयुङ्क्ते । उपयुङ्क्ते ।

अयज्ञपात्रेष्विति किम्? 'द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति ।' (देवसंयुक्तानि) (आ. गृ. १.१.१६)

स्वराद्यन्तोपसृष्टादिति वक्तव्यम् । उद्युङ्क्ते, नियुङ्क्ते ।

स्वराद्यन्तोपसृष्टादिति किम् ? संयुनक्ति ॥

२१३. समः क्ष्णुवः ॥ ६५ ॥ (२७३६)

' क्ष्णु तेजने ' (धा. पा. १०३७) परस्मैपदी । ततः सम्पूर्वादात्मनेपदं भवति । ' समो गम्यृच्छि ' (१.३.२९) इत्यत्रैव कस्मान्न पठितः ? अकर्मकादिति तत्र वर्त्तते । संक्ष्णुते शस्त्रम्, संक्ष्णुवाते, संक्ष्णुवते ।

२१४. भुजोऽनवने ॥ ६६ ॥ (२७३७)

'भुज पालनाभ्यवहारयोः' (धा. पा. १४५५) इति रुधादौ पठ्यते । तस्मादनवने= अपालने वर्तमानादात्मनेपदं भवति । भुङ्क्ते, भुञ्जाते, भुञ्जते।

अनवने इति किम्? भुनक्त्येनमग्निराहितः अनवन इति प्रतिषेधेन रौधादिकस्यैव ग्रहणं विज्ञायते, न तौदादिकस्य - ' भुजो कौटिल्ये ' (धा. पा. १४१८) इत्यस्य । तेनेह न भवति - विभुजति पाणिम् ॥

२१५. णेरणौ यत्कर्म णौ चेत् स कर्त्ताऽनाध्याने ॥ ६७ ॥ (२७६८)

'णिचश्च' (१.३.७६) इति कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम्। अकर्त्रभिप्रायार्थोऽयमारम्भः । ण्यन्तादात्मनेपदं भवति, कथम्? अणौ यत्कर्म णौ चेत्तदेव कर्म, स एव कर्त्ता भवति, अनाध्याने आध्यानं वर्जयित्वा । आरोहन्ति हस्तिनं हस्तिपकाः (म. भा. १.३.६७) । आरोहयते हस्ती स्वयमेव। उपसिञ्चन्ति हस्तिनं हस्तिपकाः । उपसेचयते हस्ती स्वयमेव । पश्यन्ति भृत्या राजानम् (म. मा. १.३.६७) । दर्शयते राजा स्वयमेव ।

णेरिति किम्? आरोहन्ति हस्तिनं हस्तिपकाः, आरोहयमाणो हस्ती साध्वारोहति ।

अणाविति किम्? गणयति गोगणं गोपालकः, गणयति गोगणः स्वयमेव (म. भा. १.३.६७ वा. ६) । कर्मग्रहणं किम्? लुनाति दात्रेण, लावयति दात्रं स्वयमेव ।

'णौ चेद्' ग्रहणं समानक्रियार्थम् । आरोहन्ति हस्तिनं हस्तिपकाः, आरोहयमाणो हस्ती भीतान् सेचयति मूत्रेण ।

यत्सग्रहणमनन्यकर्मार्थम् । आरोहन्ति हस्तिनं हस्तिपकाः । आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यान् ।

कर्त्तेति किम्? आरोहन्ति हस्तिनं हस्तिपकाः, तानारोहयति महामात्रः । अनाध्याने इति किम्? स्मरति वनगुल्मस्य कोकिलः, स्मरयत्येनं वनगुल्मः स्वयमेव (म. भा. १.३.६७ वा. ७)।

ननु चात्र कर्मकर्त्तरि मूलोदाहरणानि, तत्र कर्मवद्भावेनैव सिद्धमात्मनेपदम्, किमर्थमिदमुच्यते? कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्मवदतिदेशो विज्ञायते। कर्तृस्थार्थोऽयमारम्भः ।

तथा च रुहिः कर्तृस्थक्रियः, दृशिः कर्तृस्थभावकः उदाहृतः ।

२१६. भीस्म्योर्हेतुभये ॥ ६८ ॥ (२५९४)

'णेः ' इति वर्त्तते । अकर्त्रभिप्रायार्थोऽयमारम्भः । बिभेतेः स्मयतेश्च ण्यन्तादात्मनेपदं भवति हेतुभये । हेतुः= प्रयोजकः कर्त्ता लकारवाच्यः, ततश्चेद्भयं भवति । भयग्रहणमुपलक्षणार्थम्, विस्मयोऽपि तत एव । जटिलो भीषयते । जटिलो विस्मापयते ।

हेतुभय इति किम् ? कुञ्चिकयैनं भाययति । रूपेण विस्माययति । अत्र कुञ्चिका भयस्य करणम्, न हेतुः ॥

२१७. गृधिवञ्च्योः प्रलम्भने ॥ ६९ ॥ (२७३९)

'णेः ' इति वर्त्तते । अकर्त्रभिप्रायार्थोऽयमारम्भः । 'गृधु अभिकाङ्क्षायाम्' (धा. पा. - १२४७) वञ्चु गतौ (धा. पा. १८९) इत्येतयोर्ण्यन्तयोः प्रलम्भने वर्त्तमानयोरात्मनेपदं भवति । प्रलम्भनम्=विसंवादनम्, मिथ्याफलाख्यानम् । माणवकं गर्धयते । माणवकं वञ्चयते ।

प्रलम्भन इति किम्? श्वानं गर्धयति । गर्धनमस्योत्पादयतीत्यर्थः । अहिं वञ्चयति । परिहरतीत्यर्थः ॥

२१८. लियः सम्माननशालीनीकरणयोश्च ॥ ७० ॥ (२५९२)

'णेः ' इति वर्त्तते । अकर्त्रभिप्रायार्थोऽयमारम्भः । 'लीङ् श्लेषणे ' (धा. पा. ११३९) इति दिवादौ पठ्यते, 'ली श्लेषणे ' (धा० पा० १५०१) इति च क्र्यादौ; विशेषाभावाद् द्वयोरपि ग्रहणम्। लियो ण्यान्तात्सम्मानने शालीनीकरणे च वर्त्तमानादात्मनेपदं भवति, चशब्दात्

प्रलम्भने च । सम्माननम्=पूजनम् । शालीनीकरणम्=न्यग्भावनम् । जटाभिरालापयते । पूजां समधिगच्छतीत्यर्थः । स्येनो वर्त्तिकामुल्लापयते । न्यक्करोतीत्यर्थः । प्रलम्भने - कस्त्वामुल्लापयते । विसंवादयतीत्यर्थः । ' विभाषा लीयतेः ' (६.१.५१) इति वाऽऽत्वं विधीयते। तदस्मिन् विषये नित्यमन्यत्र विकल्पः । व्यवस्थितविभाषा हि सा ।

सम्माननादिष्विति किम्? बालकमुल्लापयति ॥

२१९. मिथ्योपपदात् कृञोऽभ्यासे ॥ ७१ ॥ (२७४०)

' णेः' इति वर्त्तते । अकर्त्रभिप्रायार्थोऽयमारम्भः। ण्यन्तात्करोतेर्मि-थ्योपपदादात्मनेपदं भवति अभ्यासे । अभ्यासः=पुनः पुनः करणम्, आवृत्तिः । पदं मिथ्या कारयते । सापचारं स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः ।

मिथ्योपपदादिति किम्? पदं सुष्ठु कारयति । कृञ इति किम्? पदं मिथ्या वाचयति । अभ्यास इति किम्? पदं मिथ्या कारयति । सकृदुच्चारयति॥

२२०. स्वरितञितः कर्त्रभिप्राये क्रियाफले ॥ ७२ ॥ (२५५१)

'णेः' इति निवृत्तम् । शेषात्कर्त्तरि परस्मैपदे (१.३.७८) प्राप्ते स्वरितेतो ये धातवो ञितश्च तेभ्य आत्मनेपदं भवति, कर्त्तारं चेत्क्रियाफलमभिप्रैति । क्रियायाः फलं=क्रियाफलं प्रधानभूतं यदर्थमसौ क्रिया आरभ्यते तच्चेत् कर्तुर्लकारवाच्यस्य भवति । यजते । पचते । ञितः खल्वपि - सुनुते । कुरुते । स्वर्गादि प्रधानफलमिह कर्त्तारमभिप्रैति ।

'कर्त्रभिप्राये' इति किम्? यजन्ति याजकाः । पचन्ति पाचकाः । कुर्वन्ति कर्मकराः। यद्यपि दक्षिणा भृतिश्च कर्तुः फलमिहास्ति, तथापि न तदर्थः क्रियारम्भः॥

२२१. अपाद् वदः ॥ ७३ ॥ (२७४१)

' कर्त्रभिप्राये ' इति वर्त्तते । अपपूर्वाद्वदतेः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति । धनकामो न्यायमपवदते । 'न्यायापवादेन' धनमर्जयिष्यामि इति मन्यते ।

' कर्त्रभिप्राये क्रियाफले ' इत्येव - अपवदति ॥

२२२. णिचश्च ॥ ७४ ॥ (२५६४)

' कर्त्रभिप्राये क्रियाफले ' इति वर्त्तते । णिजन्तादात्मनेपदं भवति, कर्त्रभिप्राये क्रियाफले। कटं कारयते । ओदनं पाचयते ।

कर्त्रभिप्राय इत्येव - कटं कारयति परस्य ॥

२२३. समुदाङ्भ्यो यमोऽग्रन्थे ॥ ७५ ॥ (२७४२)

' कर्त्रभिप्राये ' इति वर्त्तते । सम्, उद्, आङ् - इत्येवम्पूर्वाद् यमेः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति, ग्रन्थविषयश्चेत्प्रयोगो न भवति । व्रीहीन् संयच्छते । भारमुद्यच्छते । वस्त्रमायच्छते । आङ्पूर्वादकर्मकाद् 'आङो यमहनः' (१.३.२८) इति सिद्धमेवात्मनेपदम् । सकर्मकार्थमिदं पुनर्ग्रहणम् ।

अग्रन्थ इति किम्? उद्यच्छति चिकित्सां वैद्यः ।

'कर्त्रभिप्राय' इत्येव - संयच्छति , उद्यच्छति, आयच्छति ॥

२२४. अनुपसर्गाज् ज्ञः ॥ ७६ ॥ (२७४३)

' कर्त्रभिप्राय ' इति वर्त्तते । अनुपसर्गाज्ज्ञातेः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति। गां जानीते, अश्वं जानीते ।

अनुपसर्गादिति किम्? स्वर्गलोकं न प्रजानाति मूढः ।

कर्त्रभिप्राय इत्येव - देवदत्तस्य गां जानाति ॥

२२५. विभाषोपपदेन प्रतीयमाने ॥ ७७ ॥ (२७४४)

' स्वरितञितः' (१.३.७२) इति पञ्चभिः सूत्रैरात्मनेपदं कर्त्रभिप्राये क्रियाफले द्योतिते विहितम्, तदुपपदेन द्योतिते न प्राप्नोतीति वचनमारभ्यते । समीपे श्रूयमाणं शब्दान्तरम्=उपपदम्, तेन प्रतीयमाने कर्त्रभिप्राये क्रियाफले विभाषाऽऽत्मनेपदं भवति । स्वं यज्ञं यजति, स्वं यज्ञं यजते । स्वं कटं करोति, स्वं कटं कुरुते । स्वं पुत्रमपवदति, स्वं पुत्रमपवदते । एवं पञ्चसूत्र्यामुदाहार्यम्॥

२२६. शेषात् कर्त्तरि परस्मैपदम् ॥ ७८ ॥ (२१५९)

पूर्वेण प्रकरणेनात्मनेपदनियमः कृतः, न परस्मैपदनियमः तत् सर्वतः प्राप्नोति, तदर्थमिदमुच्यते । येभ्यो धातुभ्यो येन विशेषणेनात्मनेपदमुक्तं ततो यदन्यत्स शेषः। शेषात्कर्तरि परस्मैपदं भवति शेषादेव नान्यस्मात् । 'अनुदात्तङित आत्मनेपदम्' (१.३.१२) उक्तम् - आस्ते, शेते । ततोऽन्यत्र परस्मैपदं भवति-याति, वाति । ' नेर्विशः ' (१.३.१७) आत्मनेपदमुक्तम् - निविशते । ततोऽन्यत्र परस्मैपदम् - आविशति, प्रविशति ।

कर्तरीति किम्? पच्यते, गम्यते ।

कर्मकर्तरि कस्मात्परस्मैपदं न भवति - पच्यते ओदनः स्वयमेव ? 'कर्त्तरि कर्मव्यतिहारे' (१.३.१४) इति द्वितीयं कर्तृग्रहणमनुवर्त्तते; तेन कर्त्तैव यः कर्त्ता (म. भा. १.३.३८), तत्र परस्मैपदं भवति, कर्मकर्त्तरि न भवति ॥

२२७. अनुपराभ्यां कृञः ॥ ७९ ॥ (२७४५)

कर्त्रभिप्राये क्रियाफले गन्धनादिषु च करोतेरात्मनेपदं विहितम्, तदपवादः परस्मैपदं विधीयते । अनु, परा - इत्येवम्पूर्वात्करोतेः परस्मैपदं भवति । अनुकरोति, पराकरोति ॥

२२८. अभिप्रत्यतिभ्यः क्षिपः ॥ ८० ॥ (२७४६)

क्षिप प्रेरणे(धा.पा.१२८६)स्वरितेत्, ततः कर्त्रभिप्रायक्रियाफल-विवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते । अभि, प्रति, अति - इत्येवंपूर्वात् क्षिपः परस्मैपदं भवति । अभिक्षिपति, प्रतिक्षिपति, अतिक्षिपति ।

अभिप्रत्यतिभ्य इति किम् ? आक्षिपते ।

द्वितीयमपि कर्तृग्रहणमनुवर्त्तते, तेनेह न भवति - अभिक्षिप्यते स्वयमेव॥

२२९. प्राद्वहः ॥ ८१ ॥ (२७४७)

'वह प्रापणे'(धा.पा.१००४)स्वरितेत्, तत्र कर्त्रभिप्रायक्रियाफल-विवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते । प्रपूर्वाद्वहतेः परस्मैपदं भवति। प्रवहति, प्रवहतः, प्रवहन्ति ।

प्रादिति किम्? आवहते ॥

२३०. परेर्मृषः ॥ ८२ ॥ (२७४८)

' मृष तितिक्षायाम् ' (धा. पा. ११६५) स्वरितेत्, ततस्तथैवात्मनेपदे प्राप्ते परस्मैपदं विधीयते । परिपूर्वाद् मृष्यतेः परस्मैपदं भवति । परिमृष्यति, परिमृष्यतः, परिमृष्यन्ति ।

परेरिति किम्? आमृष्यते ।

वहतिमपि केचिदत्रानुवर्त्तयन्ति - परिवहति ॥

२३१. व्याङ्परिभ्यो रमः ॥ ८३ ॥ (२७४९)

' रमु क्रीडायाम् ' (धा. पा. ८५४), अनुदात्तेत्त्वादात्मनेपदे प्राप्ते परस्मैपदं विधीयते । वि, आङ्, परि - इत्येवंपूर्वात् रमतेः परस्मैपदं भवति । विरमति, आरमति, परिरमति ।

एतेभ्य इति किम् ? अभिरमते ॥

२३२. उपाच्च ॥ ८४ ॥ (२७५०)

' रमः' इत्येव उपपूर्वात् रमतेः परस्मैपदं भवति । देवदत्तमुपरमति । यज्ञदत्तमुपरमति। उपरमयतीति यावत् । अन्तर्भावितण्यर्थोऽत्र रमिः।

पृथग्योगकरणमुत्तरार्थम् । अकर्मकाद् विभाषां वक्ष्यति, सा उपपूर्वादेव यथा स्यात् ॥

२३३. विभाषाऽकर्मकात् ॥ ८५ ॥ (२७५१)

' रम' ' उपात्' इति च वर्त्तते । पूर्वेण नित्ये परस्मैपदे प्राप्ते विकल्प आरभ्यते । उपपूर्वाद्रमतेरकर्मकाद्विभाषा परस्मैपदं भवति । यावद्भुक्तमुपरमति, यावद्भुक्तमुपरमते । निवर्तत इत्यर्थः ॥

२३४. बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः ॥ ८६ ॥ (२७५२)

' णिचश्च ' (१.३.७४) इति कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते । बुध, युध, नश, जन, इङ्, प्रु, द्रु, स्रु - इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं भवति । बोधयति । योधयति । नाशयति । जनयति । अध्यापयति। प्रावयति । द्रावयति । स्रावयति ।

येऽत्राकर्मकास्तेषाम् ' अणावकर्मकाच्चित्तवत्कर्तृकात् ' (१.३.८८) इत्येवं सिद्धे वचनमिदमचित्तवत्कर्तृकार्थम् । बोधयति पद्मम् । योधयन्ति काष्ठानि । नाशयति दुःखम् । जनयति सुखम् ।

येऽत्र चलनार्था अपि तेषां ' निगरणचलनार्थेभ्यश्च ' (१.३.८७) इति सिद्धे यदा न चलनार्थास्तदर्थं वचनम् - प्रवते । प्राप्नोतीति गम्यते । अयो द्रवति । विलीयत इत्यर्थः । कुण्डिका स्रवति । स्यन्दत इत्यर्थः । तद्विषयाण्युदाहरणानि [प्रावयति, द्रावयति, स्रावयति]।

२३५. निगरणचलनार्थेभ्यश्च ॥ ८७ ॥ (२७५३)

' णेः ' इति वर्त्तते । कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं विधीयते। निगरणम् अभ्यवहारः। चलनम् कम्पनम् । निगरणार्थेभ्यश्च धातुभ्यो ण्यन्तेभ्यः परस्मैपदं भवति । निगारयति । आशयति । भोजयति । चलनार्थेभ्यः - चलयति, चोपयति, कम्पयति ।

अयमपि योगः सकर्मकार्थः, अचित्तवत्कर्तृकार्थश्च ।

अदेः प्रतिषेधो वक्तव्यः । अत्ति देवदत्तः । आदयते देवदत्तेन ॥

२३६. अणावकर्मकाच्चित्तवत्कर्तृकात् ॥ ८८ ॥ (२७५४)

' णेः ' इति वर्तते । कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं विधीयते। अण्यन्तो यो धातुरकर्मकश्चित्तवत्कर्तृकश्च तस्माद् ण्यन्तात्परस्मैपदं भवति । आस्ते देवदत्तः, आसयति देवदत्तम् । शेते देवदत्तः, शाययति देवदत्तम्।

अणाविति किम्? चेतयमानं प्रयोजयति चेतयते इति केचित् प्रत्युदाहरन्ति, तदयुक्तम्; हेतुमण्णिचो विधिः, प्रतिषेधोऽपि प्रत्यासत्तेस्तस्यैव न्याय्यः । तस्मादिह चेतयतीति परस्मैपदेनैव भवितव्यम् । इदं तु प्रत्युदाहरणम् - आरोहयमाणं प्रयुङ्क्ते, आरोहयते ।

अकर्मकादिति किम्? कटं कुर्वाणं प्रयोजयति, [प्रयुङ्क्ते] कारयते । चित्तवत्कर्तृकादिति किम्? शुष्यन्ति व्रीहयः, शोषयते व्रीहीनातपः ॥

२३७. न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः॥ ८९ ॥ (२७५५)

पूर्वेण योगद्वयेन कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं विहितम्, तस्य प्रतिषेधोऽयमुच्यते । यत्कर्त्रभिप्रायविषयमात्मनेपदं तदवस्थितमेव न प्रतिषिध्यते । पा, दमि, आङ्यम, आङ्यस, परिमुह, रुचि, नृति, वद, वस - इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं न भवति । ' णिचश्च ' (१.३.७४) इत्यात्मनेपदं भवति । तत्र पिबतिर्निगरणार्थः। दमिप्रभृतयश्चित्तवत्कर्तृकाः । नृतिश्चलनार्थोऽपि। एषां पस्मैपदं न भवति । पा - पाययते । दमि - दमयते । आङ्यम - आयामयते । ' यमोऽपरिवेषणे' (ग. सू. १९३) इति मित्संज्ञा प्रतिषिध्यते। आङ्यस - आयासयते । परिमुह - परिमोहयते । रुचि - रोचयते । नृति - नर्त्तयते । वद - वादयते । वस - वासयते ।

पादिषु धेट उपसंख्यानम् (म. भा. १.३.८९ वा. १) । धापयेते शिशुमेकं समीची (ऋ. १.१९६.५) ॥

२३८. वा क्यषः ॥ ९० ॥ (२६६९)

' लोहितादिडाज्भ्यः क्यष् ' (३.१.१३) इति वक्ष्यति, तदन्ताद्धातोर्वा परस्मैपदं भवति । लोहितायति, लोहितायते । पटपटायति, पटपटायते ।

अथात्र परस्मैपदेन मुक्ते कथमात्मनेपदं लक्ष्यते, यावता ' अनुदात्तङित आत्मनेपदम् ' (१.३.१२) इत्येवमादिना प्रकरणेन तन्नियतम्? एवं तर्हि आत्मनेपदमेवात्र विकल्पितं विधीयते, तच्चानन्तरं परस्मैपदप्रतिषेधेन सन्निधापितमिह संबध्यते । तेन मुक्ते, शेषात्कर्तरि परस्मैपदं (१.३.७८) भवति ॥

२३९. द्युद्भ्यो लुङि ॥ ९१ ॥ (२३४५)

वेत्येव । ' द्युत दीप्तौ ' (धा. पा. ७४१), तत्साहचर्याद् लुठादयोऽपि 'कृपू' (धा. पा. ७६२) - पर्यन्ता स्तथैव व्यपदिश्यन्ते । बहुवचननिर्द्देशादाद्यर्थो भवति । अनुदात्तेत्त्वान्नित्यमेवात्मनेपदे प्राप्ते द्युतादिभ्यो लुङि वा परस्मैपदं भवति ।

व्यद्युतत्, व्यद्योतिष्ट । अलुठत्, अलोठिष्ट ।

लुङीति किम् ? द्योतते ॥

२४०. वृद्भ्यः स्यसनोः ॥ ९२ ॥ (२३४७)

द्युतादिष्वेव वृतादयः पठ्यन्ते । ' वृतु वर्तने ' (धा. पा. ७५८) ' वृधु वृद्धौ' (धा. पा. ७५९) ' शृधु शब्दकुत्सायाम् ' (धा. पा. ७६०) ' स्यन्दू प्रस्रवणे ' (भा. पा. ७६१) ' कृपू सामर्थ्ये ' (धा. पा. ७६२) - एतेभ्यो धातुभ्यः स्ये सनि च परतो वा परस्मैपदं भवति । वृत् - वत्स्यति, अवत्स्यत्, विवृत्सति; वर्तिष्यते, अवर्तिष्यत, विवर्तिषते । वृध् - वत्स्यति, अवत्स्यत्, विवृत्सति; वर्द्धिष्यते, अवर्द्धिष्यत, विवर्द्धिषते ।

स्यसनोरिति किम्? वर्तते ॥

२४१. लुटि च क्लृपः ॥ ९३ ॥ (२३५१)

वृतादित्वादेव स्यसनोर्विकल्पः सिद्धः, लुटि विधीयते । चकारस्तर्हि स्यसनोरनुकर्षणार्थो न वकव्यः । एवं तर्हीयं प्राप्तिः पूर्वां प्राप्तिं बाधेत, तस्माच्चकारः, स्यसनोरनुकर्षणार्थः क्रियते । लुटि च स्यसनोश्च कृपेः परस्मैपदं वा भवति । कल्प्ता, कल्प्तारौ, कल्प्तारः । कल्प्स्यति, अकल्प्स्यत्, चिक्लृप्सति। कल्पिता, कल्पिष्यते, अकल्पिष्यत, चिकल्पिषते ॥

॥ इति श्रीजयादित्यविरचितायां काशिकावृत्तौ प्रथमाध्यायस्य तृतीयः पादः॥

अथ प्रथमाध्याये

चतुर्थः पादः

२४२. आ कडारादेका संज्ञा ॥ १ ॥ (२३२)

कडाराः कर्मधारये (२.२.३८) इति वक्ष्यति । आ एतस्मात्सूत्रावधेर्यदित ऊर्ध्वमनुक्रमिष्यामः, तत्र एका संज्ञा भवतीति वेदितव्यम् । का पुनरसौ ? या पराऽनवकाशा च। अन्यत्र संज्ञासमावेशान्नियमार्थं वचनमेकैव संज्ञा भवतीति । वक्ष्यति - ' ह्रस्वं लघु ' , (१.४.१०) भिदि, छिदि - भेत्ता, छेत्ता (७.३.८६)। ' संयोगे गुरु ' (१.४.११) शिक्षा, भिक्षा (३.३.१०३) । संयोगे परस्य ह्रस्वस्य लघुसंज्ञा प्राप्नोति, गुरुसंज्ञा च । ' एका संज्ञा ' इति वचनाद् गुरुसंज्ञैव भवति - अततक्षत्, अररक्षत् । ' सन्वल्लघुनि चङ्परेऽनग्लोपे' (१.४.९३) इत्येष विधिर्न भवति ॥

२४३. विप्रतिषेधे परं कार्यम् ॥ २ ॥ (१७५)

तुल्यबलविरोधः विप्रतिषेधः । यत्र द्वौ प्रसङ्गावन्यार्थावेकस्मिन् युगपत् प्राप्नुतः, स तुल्यबलविरोधो विप्रतिषेधः (म. भा. १.४२ वा १) । तस्मिन् विप्रतिषेधे परं कार्यं भवति ।

उत्सर्गापवादनित्यान्तरङ्गबहिरङ्गेषु तुल्यबलता नास्तीति नायमस्य योगस्य विषयः, बलवतैव तत्र भवितव्यम् । अप्रवृत्तौ, पर्यायेण वा प्रवृत्तौ प्राप्तायां वचनमारभ्यते । ' अतो दीर्घो यञि ' (७.३.१०१) । ' सुपि च' (७.३.१०२) इत्यस्यावकाशः - वृक्षाभ्याम्, प्लक्षाभ्याम्; बहुवचने झल्येत् (७.३.१०३) इत्यस्यावकाशः - वृक्षेषु, प्लक्षेषु; इहोभयं प्राप्नोति - वृक्षेभ्यः, प्लक्षेभ्यः इति । परं भवति विप्रतिषेधेन ॥

२४४. यू स्त्र्याख्यौ नदी ॥ ३ ॥ (२६६)

ई च ऊ च=यू । अविभक्तिको निर्देशः । स्त्रियमाचक्षाते स्त्र्याख्यौ । मूलविभुजादिदर्शनात् (३.२.५ वा.) कप्रत्ययः । ईकारान्तमूकारान्तं च स्त्र्याख्यं शब्दरूपं नदीसंज्ञं भवति । ईकारान्तम् - कुमारी, गौरी, लक्ष्मीः, शार्ङ्गरवी । ऊकारान्तम् - ब्रह्मबन्धूः, यवागूः ।

यू इति किम्? मात्रे, दुहित्रे । स्त्र्याख्याविति किम्? ग्रामणीः, सेनानीः, खलपूः। आख्याग्रहणं किम्? शब्दार्थे स्त्रीत्व एव यथा स्यात्, पदान्तराख्ये मा भूत् - ग्रामण्ये स्त्रियै (म. भा. १.३१३) खलप्वे स्त्रियै । नदीप्रदेशाः - 'आण्नद्याः' (७.३.११२) इत्येवमादयः ॥

२४५. नेयङुवङ्स्थानावस्त्री ॥ ४ ॥ (३०३)

पूर्वेणातिप्रसक्ता नदीसंज्ञा प्रतिषिध्यते । स्थितिः स्थानम् । इयङुवङोः स्थानमनयोरितीयङुवङ्स्थानौ यौ यू, तौ नदीसंज्ञौ न भवतः, स्त्रीशब्दं (६.४.७९) वर्जयित्वा । हे श्रीः । हे भ्रूः (६.४.७७) । अस्त्रीति किम्? हे स्त्रि (७.३.१०७) ।

२४६. वऽऽमि ॥ ५ ॥ (३०४)

पूर्वेण नित्ये प्रतिषेधे प्राप्ते आमि विकल्पः क्रियते। इयङुवङ्स्थानौ यू आमि परतो वा नदीसंज्ञौ न भवतः । श्रियाम्, (६.४.७७) श्रीणाम् (७.१.५४)। भ्रुवाम्, भ्रूणाम् । अस्त्रीत्येव - स्त्रीणाम् ॥

२४७. ङिति ह्रस्वश्च ॥ ६ ॥ (२९६)

दीर्घस्य नदीसंज्ञा विहिता, ह्रस्वस्य न प्राप्नोति, इयङुवङ्स्थानयोश्च प्रतिषिद्धा । तस्मान्ङिति वा विधीयते । ङिति परतो ह्रस्वश्च य्वोः सम्बन्धी यः स्त्र्याख्यः, स्त्र्याख्यौ इयङुवङ्स्थानौ च यू वा नदीसंज्ञौ भवतः । कृत्यै (७.३.११२), कृतये । धेन्वै, धेनवे । श्रियै, श्रिये । भ्रुवै, भ्रुवे ।

अस्त्रीत्येव - स्त्रियै । स्त्र्याख्यावित्येव - अग्नये, वायवे, भानवे ॥

२४८. शेषो घ्यसखि ॥ ७ ॥ (२४३)

'ह्रस्वः ' इति वर्त्तते । शेषोऽत्र घिसंज्ञो भवति, सखिशब्दं वर्जयित्वा । कश्च शेषः? ह्रस्वमिवर्णोवर्णान्तं यन्न स्त्र्याख्यम्, स्त्र्याख्यं च यन्न नदीसंज्ञकम्, स शेषः । अग्नये, (७.३.१११) वायवे, कृतये धेनवे ।

असखीति किम् ? सख्या । सख्ये । सख्युः । सख्यौ ।

घिप्रदेशाः - द्वन्द्वे घि (२.२.३२) इत्येवमादयः ॥

२४९. पतिः समास एव ॥ ८ ॥ (२५७)

पतिशब्दस्य घिसंज्ञायां सिद्धायामयं नियमः क्रियते - पतिशब्दः समास एव घिसंज्ञो भवति । प्रजापतिना । प्रजापतये ।

समास इति किम्? पत्या । पत्ये ।

एवकार इष्टतोऽवधारणार्थः । दृढमुष्टिना । दृढमुष्टये ॥

२५०. षष्ठीयुक्तश्छन्दसि वा ॥ ९ ॥ (३३८९)

'पतिः' इति वर्त्तते । पूर्वेण नियमेनासमासे न प्राप्नोतीति वचनमारभ्यते । षष्ठ्यन्तेन शब्देन युक्तः पतिशब्दः छन्दसि विषये वा घिसंज्ञो भवति । कुलुञ्चानां पतये नमः (तै० सं० ४.५.३७), कुलुञ्चानां पत्ये नमः (वाज. सं. १६)।

षष्ठीग्रहणं किम्? 'मया पत्या जरदष्टिर्यथासः' (ऋ. १०.८६.३६) । छन्दसीति किम्? ग्रामस्य पत्ये ॥

२५१. ह्रस्वं लघु ॥ १० ॥ (३१)

मात्रिकस्य ह्रस्वसंज्ञा कृता (१.२.२७), तस्यानेन लघुसंज्ञा विधीयते । ह्रस्वमक्षरं लघुसंज्ञं भवति । भेत्ता, छेत्ता (७.३.८६), अचीकरत्, अजीहरत् (७.४.१, ९३) ।

लघुप्रदेशाः - 'पुगन्तलघूपधस्य च' (७.३.८६) इत्येवमादयः ॥

२५२. संयोगे गुरु ॥ ११ ॥ (३२)

'ह्रस्वम्' इति वर्त्तते । पूर्वेण लघुसंज्ञायां प्राप्तायां गुरुसंज्ञा विधीयते। संयोगे परतो ह्रस्वमक्षरं गुरुसंज्ञं भवति । कुण्डा । हुण्डा । शिक्षा । भिक्षा (३.३.१०३) । गुरुप्रदेशाः _ 'गुरोश्च हलः' (३.३.१०३) इत्येवमादयः ॥

२५३. दीर्घं च ॥ १२ ॥ (३३)

'संयोगे' इति नानुवर्त्तते । सामान्येन संज्ञाविधानम् । दीर्घं चाक्षरं गुरुसंज्ञं भवति । ईहाञ्चक्रे । ईक्षाञ्चक्रे (३.१.३६) ॥

२५४. यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ॥ १३ ॥ (१९९)

यस्मात् प्रत्ययो विधीयते धातोर्वा प्रातिपदिकाद्वा तदादिशब्दरूपं प्रत्यये परतोऽङ्गसंज्ञं भवति । कर्त्ता, हर्त्ता । करिष्यति, हरिष्यति । अकरिष्यत् (७.३.८४)। औपगवः, कापटवः (७.२.१) । यस्मादिति संज्ञिनिर्देशार्थम्, तदादीतिसम्बन्धात्।

प्रत्ययग्रहणं किम्? न्यविशत, व्यक्रीणीत । 'नेर्विशः' (१.३.१७) इत्युपसर्गाद्विधिरस्ति तदादेरङ्गसंज्ञा स्यात् ।

विधिग्रहणं किम्? प्रत्ययपरत्वमात्रे मा भूत् । स्त्री इयती (म. भा. १.४.१३)।

तदादिवचनं स्यादिनुमर्थम् (म. भा. १.४.१३ वा. १) । करिष्यावः, करिष्यामः (७.३.१०१)। कुण्डानि ।

पुनः प्रत्ययग्रहणं किमर्थम्? लुप्तप्रत्यये मा भूत् । श्र्यर्थम् । भ्र्व्यर्थम् (म. भा. १.४.१३ वा. ५) ।

अङ्गप्रदेशाः- अङ्गस्य (६.४.१) इत्येवमादयः ॥

२५५. सुप्तिङन्तं पदम् ॥ १४ ॥ (२९)

' सुप्तिङ् ' इति प्रत्याहारग्रहणम् । सुबन्तं तिङन्तं च शब्दरूपं पदसंज्ञं भवति । ब्राह्मणाः पचन्ति ।

पदसंज्ञायामन्तग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधेः प्रतिषेधार्थम् (म. भा. १.४.१४ वा. १) । गौरी ब्राह्मणितरा ।

पदप्रदेशाः - पदस्य (८.१.१६) पदात् (८.१.१७) इत्येवमादयः॥

२५६. नः क्ये ॥ १५ ॥ (२६५९)

' क्ये ' इति क्यच्क्यङ्क्यषां सामान्यग्रहणम् । नान्तं शब्दरूपं क्ये परतः पदसंज्ञं भवति । क्यच् - राजीयति । क्यङ् - राजायते । क्यष् - वर्मायति, वर्मायते (८.२.७) । चर्मायति, चर्मायते ।

' सिद्धे सत्यारम्भो निमयार्थः ' (का. प. ५९) - नान्तमेव क्ये परतः पदसंज्ञं भवति, नान्यत् । वाच्यति । स्रुच्यति (म. भा. १.४.१५) ॥

२५७. सिति च ॥ १६ ॥ (१२५२)

' यचि भम् ' (१.४.१८) इति वक्ष्यति, तस्यायं पुरस्तादपवादः । सिति प्रत्यये परतः पूर्वं पदसंज्ञं भवति । ' भवतष्ठक्छसौ ' (४.२.११५) -भवदीयः (८.२.३९)। ' ऊर्णाया युस् ' - (५.२.१२३) ऊर्णायुः । ' ऋतोरण् , (५.१.१०५) छन्दसि घस् (५.१.१०६) - ऋत्वियः ॥

२५८. स्वादिष्वसर्वनामस्थाने ॥ १७ ॥ (२३०)

' स्वादिषु ' इति सुशब्दादेकवचनात् (४.१.२) आरभ्य आ कपः (५.४.१५१) प्रत्यया गृह्यन्ते । स्वादिषु प्रत्ययेषु परतः सर्वनामस्थानवर्जितेषु पूर्वं पदसंज्ञं भवति । राजभ्याम्, राजभिः । राजत्वम्, (६.४.१४२) राजता । राजतरः, राजतमः।

असर्वनामस्थाने इति किम्? राजानौ, राजानः ॥

२५९. यचि भम् ॥ १८ ॥ (२३१)

' स्वादिष्वसर्वनामस्थाने ' इति वर्त्तते । पूर्वेण पदसंज्ञायां तदपवादो भसंज्ञा विधीयते । यकारादावजादौ च स्वादौ सर्वनामस्थानवर्जिते प्रत्यये परतः पूर्वं भसंज्ञं भवति । यकारादौ - गार्ग्यः, वात्स्यः । आजादौ - दाक्षिः, प्लाक्षिः (६.४.१४८) ॥

नभोऽङ्गिरोमनुषां वत्युपसंख्यानम् (म. भा. १.४.१८ वा. ३) (कर्तव्यम्)। नभ इव नभस्वत् । अङ्गिरा इव अङ्गिरस्वत् । मनुरिव मनुष्वत् ।

वृषण्वस्वश्वयोः (म. भा. १.४.१८ वा. ४) । वृषन्नित्येतत् वस्वश्वयोः परतो भसंज्ञं भवति छन्दसि विषये । वृषण्वसुः (ऋ. १.१११.१) । वृषणश्वस्य मे नासीत (मै. २.५.५) । भप्रदेशाः - ' भस्य ' (६.४.१२९) इत्येवमादयः॥

२६०. तसौ मत्वर्थे ॥ १९ ॥ (१८९६)

' भम् ' इति वर्त्तते । तकारान्तं सकारान्तं शब्दरूपं मत्वर्थे प्रत्यये परतो भसंज्ञं भवति। उदश्वित्वान् घोषः । विद्युत्वान् बलाहकः । सकारान्तम् - पयस्वी, यशस्वी ।

तसाविति किम्? तक्षवान् ग्रामः ॥

२६१. अयस्मयादीनि च्छन्दसि ॥ २० ॥ (३३९०)

अयस्मयादीनि शब्दरूपाणि छन्दसि विषये साधूनि भवन्ति । भपदसंज्ञाधिकारे विधानात्तेन मुखेन साधुत्वमयस्मयादीनां विधीयते । अयस्मयं वर्म (तै. १.३७.५)। अयस्मयानि पात्त्राणि (कौ. सू. ८१.१८) । क्वचिदुभयमपि भवति - ' स सुष्टुभा स ऋक्वता गणेन ' (ऋ. ४.५०.२) । पदत्वात्कुत्वं भत्वाज्जश्त्वं न भवति । छन्दसीति किम्? अयोमयं वर्म । आकृतिगणोऽयम् ॥

२६२. बहुषु बहुवचनम् ॥ २१ ॥ (१८७)

ङ्याप्प्रातिपदिकात् स्वादयः, लस्य तिबादय इति सामान्येन बहुवचनं विहितम्, तस्यानेन बहुत्वसंख्या वाच्यत्वेन विधीयते । बहुषु बहुवचनं भवति। बहुत्वमस्य वाच्यं भवतीति यावत् ।

कर्मादायोऽप्यपरे विभक्तीनामर्था वाच्याः, तदीये बहुत्वे बहुवचनम्, कर्मादिषु बहुवचनमित्यर्थः । ब्राह्मणाः पठन्ति ।

यत्र च संख्या सम्भवति, तत्रायमुपदेशः । अव्ययेभ्यस्तु निःसंख्येभ्यः सामान्यविहिताः स्वादयो विद्यन्त एव ॥

२६३. द्व्येकयोर्द्विवचनैकवचने ॥ २२ ॥ (१८६)

द्वित्वैकत्वयोरर्थयोर्द्विवचनैकवचने भवतः । एतदपि सामान्य-विहितयोर्द्विवचनैकवचनयोरर्थाभिधानम् । द्वित्वे द्विवचनं भवति, एकत्वे एकवचनं भवति । ब्राह्मणौ पचतः । ब्राह्मणः पचति ॥

२६४. कारके ॥ २३ ॥ (५३४)

‘ कारके ’ इति विशेषणमपादानादिसंज्ञाविषयमधिक्रियते । ‘ कारके’ इत्यधिकारो वेदितव्यः - यदित ऊर्ध्वमनुक्रमिष्यामः ‘ कारके ’ इत्येवं तद् वेदितव्यम् ।

कारकशब्दश्च निमित्तपर्यायः । कारकम्, हेतुरित्यनर्थान्तरम् । कस्य हेतुः? क्रियायाः । वक्ष्यति - ध्रुवमपायेऽपादानम् (१.४.२४), ग्रामादागच्छति। पर्वतादवरोहति ।

कारक इति किम्? वृक्षस्य पर्णं पतति । कुड्यस्य पिण्डः पतति ।

‘ अकथितं च ’ (१.४.५१) । अकथितं च कारकं कर्मसंज्ञं भवति । माणवकं पन्थानं पृच्छति ।

कारके इति किम्? माणवकस्य पितरं पन्थानं पृच्छति ।

कारकसंशब्दनेषु चानेनैव विशेषणेन व्यवहारो विज्ञायते ॥

२६५. ध्रुवमपायेऽपादानम् ॥ २४ ॥ (५८६)

ध्रुवं यदपायमुक्तमपाये साध्ये यदवधिभूतं तत्कारकमपादानसंज्ञं भवति। ग्रामादागच्छति। पर्वतादवरोहति । सार्थाद्धीनः । रथात् पतितः ।

जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् (म. भा. १.४.२४ वा. १) । अधर्माज्जुगुप्सते । अधर्माद् विरमति । धर्मात् प्रमाद्यति ।

अपादानप्रदेशाः - ‘ अपादाने पञ्चमी ’ (२.३.२८) इत्येवमादयः ॥

२६६. भीत्रार्थानां भयहेतुः ॥ २५ ॥ (५८८)

बिभेत्यर्थानां त्रायत्यर्थानां च धातूनां प्रयोगे भयहेतुर्यस्तत्कारकमपादानसंज्ञं भवति । चौरेभ्यो बिभेति । चौरेभ्य उद्विजते । त्रायत्यर्थानाम् - चौरेभ्यस्त्रायते। चौरेभ्यो रक्षति । भयहेतुरिति किम्? अरण्ये बिभेति । अरण्ये त्रायते ॥

२६७. पराजेरसोढः ॥ २६ ॥ (५८९)

परापूर्वस्य जयतेः प्रयोगेऽसोढो योर्थः सोढुं न शक्यते, तत्कारकमपादानसंज्ञं भवति । अध्ययनात्पराजयते । असोढ इति किम्? शत्रून् पराजयते ॥

२६८. वारणार्थानामीप्सितः ॥ २७ ॥ (५९०)

वारणार्थानां धातूनां प्रयोगे य ईप्सितोऽर्थः तत्कारकमपादानसंज्ञं भवति। प्रवृत्तिविघातः वारणम् । यवेभ्यो गां वारयति । यवेभ्यो गां निवर्त्तयति ।

ईप्सित इति किम्? यर्वभ्यो गां वारयति क्षेत्रे ॥

२६९. अन्तर्द्धौ येनादर्शनमिच्छति ॥ २८ ॥ (५९१)

व्यवधानम् अन्तर्द्धिः । अन्तर्द्धिनिमित्तं येनादर्शनमात्मन इच्छति तत्कारकमपादानसंज्ञं भवति । उपाध्यायादन्तर्द्धत्ते । उपाध्यायान्निलीयते । मा मामुपाध्यायो द्राक्षीदिति निलीयते ।

अन्तर्द्धाविति किम्? चौरान्न दिदृक्षते । इच्छतिग्रहणं किम्? अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात् ॥

२७०. आख्यातोपयोगे ॥ २९ ॥ (५९२)

आख्याता प्रतिपादयिता । उपयोगः नियमपूर्वकं विद्याग्रहणम् । उपयोगे साध्ये य आख्याता तत्कारकमपादानसंज्ञं भवति । उपाध्यायादधीते । उपाध्यायादागमयति ।

उपयोग इति किम्? नटस्य गाथां शृणोति (म. भा. १.४.२९) ॥

२७१. जनिकर्तुः प्रकृतिः ॥ ३० ॥ (५९३)

जनेः कर्त्ता=जनिकर्त्ता । जन्यर्थस्य जन्मनः कर्त्ता जायमानः, तस्य या प्रकृतिः कारणम्, हेतुः, तत् कारकमपादानसंज्ञं भवति । शृङ्गाच्छरो जायते । गोमयाद् वृश्चिको जायते (म. भा. १.४.३०) ॥

२७२. भुवः प्रभवः ॥ ३१ ॥ (५९४)

‘ कर्तुः’ इति वर्त्तते । भवनं भूः । भवत्यस्मादिति प्रभवः । भूकर्तुः प्रभवो यस्तत्कारकमपादानसंज्ञं भवति । हिमवतो गङ्गा प्रभवति (म.भा.१.४.३१)। काश्मीरेभ्यो वितस्ता प्रभवति । प्रथमत उपलभ्यत इत्यर्थः ॥

२७३. कर्मणा यमभिप्रैति स संप्रदानम् ॥ ३२ ॥ (५६९)

कर्मणा करणभूतेन कर्त्ता यमभिप्रैति तत्कारकं सम्प्रदानसंज्ञं भवति । अन्वर्थसंज्ञाविज्ञानाद्ददातिकर्मणेति विज्ञायते । उपाध्यायाय गां ददाति (म. भा. १.४.३२)। माणवकाय भिक्षां ददाति ।

क्रियाग्रहणमपि कर्तव्यम् (म. भा. १.४.३२ वा. १) । क्रिययापि यमभिप्रैति स सम्प्रदानम् । श्राद्धाय निगर्हते । युद्धाय सन्नह्यते । पत्ये शेते (म. भा. १.४.३२। वा. १) ।

सम्प्रदानप्रदेशाः - चतुर्थी सम्प्रदाने (२.३.१३) इत्येवमादयः ॥

कर्मणः करणसंज्ञा वक्तव्या सम्प्रदानस्य च कर्मसंज्ञा (म. भा. १.४.३१ वा. २) । पशुना रुद्रं यजते । पशुं रुद्राय ददातीत्यर्थः (म. भा. १.४.३१ वा. २) ॥

२७४. रुच्यर्थानां प्रीयमाणः ॥ ३३ ॥ (५७१)

रुचिना समानार्था रुच्यर्थाः । अन्यकर्तृकोऽभिलाषः रुचिः । रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणो योऽर्थस्तत्कारकं सम्प्रदानसंज्ञं भवति । देवदत्ताय रोचते मोदकः। यज्ञदत्ताय स्वदतेऽपूपः। देवदत्तस्थस्याभिलाषस्य मोदकः कर्त्ता।

प्रीयमाण इति किम्? देवदत्ताय रोचते मोदकः पथि ॥

२७५. श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः ॥ ३४ ॥ (५७२)

श्लाघ-ह्नुङ्-स्था-शप-इत्येतेषां ज्ञीप्स्यमानो योऽर्थस्तत्कारकं सम्प्रदानसंज्ञं भवति । ज्ञीप्स्यमानः ज्ञपयितुमिष्यमाणः, बोधयितुमभिप्रेतः । देवदत्ताय श्लाघते । देवदत्तं श्लाघमानस्तां श्लाघां तमेव ज्ञपयितुमिच्छतीत्यर्थः। एवं देवदत्ताय ह्नुते । यज्ञदत्ताय ह्नुते । देवदत्ताय तिष्ठते, यज्ञदत्ताय तिष्ठते, देवदत्ताय शपते, यज्ञदत्ताय शपते ।

ज्ञीप्स्यमान इति किम्? देवदत्तः श्लाघते ॥

२७६. धारेरुत्तमर्णः ॥ ३५ ॥ (५७३)

धारयतेः प्रयोगे उत्तमर्णो योऽर्थस्तत्कारकं सम्प्रदानसंज्ञं भवति । उत्तममृणं यस्य सः=उत्तमर्णः । कस्य चोत्तममृणम् ? यदीयं धनम् ? धनस्वामी प्रयोक्ता उत्तमर्णः, स सम्प्रदानसंज्ञो भवति । देवदत्ताय शतं धारयति । यज्ञदत्ताय शतं धारयति ।

उत्तमर्ण इति किम् ? देवदत्ताय शतं धारयति ग्रामे ॥

२७७. स्पृहेरीप्सितः ॥ ३६ ॥ (५७४)

' स्पृह ईप्सायाम् ' (धा. पा. १८७२) चुरादावदन्तः पठ्यते । तस्य ईप्सितो योऽर्थस्तत्कारकं सम्प्रदानसंज्ञं भवति । ' ईप्सितः' इत्यभिप्रेत उच्यते । पुष्पेभ्यः स्पृहयति । फलेभ्यः स्पृहयति ।

ईप्सित इति किम्? पुष्पेभ्यो वने स्पृहयति ॥

२७८. क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ॥ ३७ ॥ (५७५)

अमर्षः क्रोधः । अपकारः द्रोहः । अक्षमा ईर्ष्या । गुणेषु दोषाविष्करणम् असूया । क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपस्तत्कारकं सम्प्रदानसंज्ञं भवति । क्रोधस्तावत्कोप एव, द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते । तस्मात्सामान्येन विशेषणम् - ' यं प्रति कोप ' इति । देवदत्ताय क्रुद्ध्यति । देवदत्ताय द्रुह्यति। देवदत्तायेर्ष्यति । देवदत्तायासूयति ।

यं प्रति कोप इति किम्? भार्यामीर्ष्यति - मा एनामन्यो द्राक्षीदिति ॥

२७९. क्रुधद्रुहोरुपसृष्टयोः कर्म ॥ ३८ ॥ (५७६)

पूर्वेण सम्प्रदानसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते । क्रुधद्रुहोरुपसृष्टयो-रुपसर्गसम्बद्धयोर्यं प्रति कोपस्तत्कारकं कर्मसंज्ञं भवति । देवत्तमभिक्रुध्यति। देवदत्तमभिद्रुह्यति ।

उपसृष्टयोरिति किम्? देवदत्ताय क्रुध्यति । यज्ञदत्ताय द्रुह्यति ॥

२८०. राधीक्ष्योर्यस्य विप्रश्नः ॥ ३९ ॥ (५७७)

राधेरीक्षेश्च कारकं सम्प्रदानसंज्ञं भवति । कीदृशम् ? यस्य विप्रश्नः । विविधप्रश्नः विप्रश्नः। स कस्य भवति ? यस्य शुभाशुभं पृच्छ्यते । देवदत्ताय राध्यति । देवदत्तायेक्षते । नैमित्तिकः पृष्टः सन् देवदत्तस्य दैवं पर्यालोचयतीत्यर्थः॥

२८१. प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता ॥ ४० ॥ (५७८)

प्रति-आङ् - इत्येवम्पूर्वस्य शृणोतेः कारकं सम्प्रदानसंज्ञं भवति, कीदृशम्? पूर्वस्य कर्त्ता। प्रतिपूर्व आङ्पूर्वश्च शृणोतिरभ्युपगमे प्रतिज्ञाने वर्त्तते । स चाभ्युपगमः परेण प्रयुक्तस्य सतो भवति । तत्र प्रयोक्ता पूर्वस्याः क्रियायाः कर्ता सम्प्रदानसंज्ञो भवति । देवदत्ताय गां प्रतिशृणोति, देवदात्ताय गामाशृणोति । प्रतिजानीत इत्यर्थः ॥

२८२. अनुप्रतिगृणश्च ॥ ४१ ॥ (५७९)

' पूर्वस्य कर्ता ' इति वर्त्तते । अनुपूर्वस्य प्रतिपूर्वस्य च गृणातेः कारकं पूर्वस्याः क्रियायाः कर्तृभूतं सम्प्रदानसंज्ञं भवति । होत्रेऽनुगृणाति । होता प्रथमं शंसति तमन्यः प्रोत्साहयति । अनुगरः, प्रतिगरः इति हि शंसितुः प्रोत्साहने वर्त्तते । होतारं शंसन्तं प्रोत्साहयतीत्यर्थः ॥

२८३. साधकतमं करणम् ॥ ४२ ॥ (५६०)

क्रियासिद्धौ यत्प्रकृष्टोपकारकं विवक्षितं तत्साधकतमं कारकं करणसंज्ञं भवति । दात्रेण लुनाति । परशुना छिनत्ति ।

तमब्ग्रहणं किम्? गङ्गायां घोषः । कूपे गर्गकुलम् (म. भा. १.४.४२)।

करणप्रदेशाः - कर्तृकरणयोस्तृतीया (२.३.१८) इत्येवमादयः ॥

२८४. दिवः कर्म च ॥ ४३ ॥ (५६२)

पूर्वेण करणसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते । दिवः साधकतमं यत्कारकं तत्कर्मसंज्ञं भवति, चकारात्करणसंज्ञं च । अक्षान्दीव्यति, अक्षैर्दीव्यति ॥

२८५. परिक्रयणे संप्रदानमन्यतरस्याम् ॥ ४४ ॥ (५८०)

साधकतमम् इति वर्तते । पूर्वेण करणसंज्ञायां प्राप्तायां सम्प्रदानसंज्ञा पक्षे विधीयते । परिक्रयणे साधकतमं कारकमन्यतरस्यां सम्प्रादानसंज्ञं भवति। परिक्रयणं नियतकालं वेतनादिना स्वीकरणम्, नात्यन्तिकः क्रय एव । शतेन परिक्रीतोऽनुब्रूहि । शताय परीक्रीतोऽनुब्रूहि । सहस्रेण परिक्रीतोऽनुब्रूहि । सहस्राय परिक्रीतोऽनुब्रूहि ।

२८६. आधारोऽधिकरणम् ॥ ४५ ॥ (६३२)

आध्रियन्तेऽस्मिन् क्रिया इत्याधारः । कर्तृकर्मणोः क्रियाश्रयभूतयोर्धारणक्रियां प्रति य आधारस्तत्कारकमधिकरणसंज्ञं भवति । कटे आस्ते । कटे शेते । स्थाल्यां पचति ।

अधिकरणप्रदेशाः - ' सप्तम्यधिकरणे च ' (२.३.३६) इत्येवमादयः ॥

२८७. अधिशीङ्स्थासां कर्म ॥ ४६ ॥ (५४२)

पूर्वेणाधिकरणसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते । अधिपूर्वाणां शीङ्-स्था-आस्-इत्येतेषामाधारो यस्तत्कारकं कर्मसंज्ञं भवति । ग्राममधिशेते । ग्राममधितिष्ठति । पर्वतमध्यास्ते ॥

२८८. अभिनिविशश्च ॥ ४७ ॥ (५४३)

अभि - निपूर्वस्य विशतेराधारो यस्तत्कारकं कर्मसंज्ञं भवति । ग्राममभिनिविशते ।

कथं कल्याणेऽभिनिवेशः, पापेभिनिवेशः, या या संज्ञा यस्मिन् यस्मिन् संज्ञिन्यभिनिविशत इति ? 'अन्यतरस्याम्' इति वर्त्तते, 'परिक्रयणे संप्रदानमन्यतरस्याम्' (१.४.४४) इत्यतः । सा च व्यवस्थितविभाषा विज्ञायते॥

२८९. उपान्वध्याङ्वसः ॥ ४८ ॥ (५४४)

उप-अनु-अधि-आङ् - इत्येवम्पूर्वस्य वसतेराधारो यस्तत्कारकं कर्मसंज्ञं भवति । ग्राममुपवसति सेना, पर्वतमुपवसति । ग्राममनुवसति सेना, ग्राममधिवसति, ग्राममावसति ॥

वसेरश्यर्थस्य प्रतिषेधो वक्तव्यः (म. भा. १.४.४८ वा. १) । ग्रामे उपवसति । उपयुज्यत इत्युपयोगः । पयः प्रभृति, तस्य निमित्तं गवादि । भोजननिवृत्तिं करोतीत्यर्थः ॥

२९०. कर्तुरीप्सिततमं कर्म ॥ ४९ ॥ (५३५)

कुर्तुः क्रियया यदाप्तुमिष्टतमं तत्कारकं कर्मसंज्ञं भवति । कटं करोति। ग्रामं गच्छति ।

कर्तुरिति किम्? माषेष्वश्वं बध्नाति । कर्मण ईप्सिता माषाः, न कर्तुः । तमब्ग्रहणं किम्? पयसौदनं भुङ्क्ते ।

कर्म (१.४.४६) इत्यनुवर्तमाने पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम् इतरथा आधारस्यैव हि स्यात् - गेहं प्रविशतीति; ओदनं पचति, सक्तून् पिबतीत्यादिषु न स्यात् । पुनः कर्मग्रहणात् सर्वत्र सिद्धं भवति ।

कर्मप्रदेशाः - कर्मणि द्वितीया (२.३.२) इत्येवमादयः ॥

२९१. तथायुक्तं चानीप्सितम् ॥ ५० ॥ (५३८)

येन प्रकारेण कर्तुरीप्सिततमं क्रियया युज्यते तेनैव चेत्प्रकारेण यदनीप्सितं युक्तं भवति तस्य कर्मसंज्ञा विधीयते ।

ईप्सितादन्यत् सर्वमनीप्सितम् (म. भा. १.४.५०, पृ. २६३) - द्वेष्यम्, इतरच्च । विषं भक्षयति । चौरान् पश्यति । ग्रामं गच्छन् वृक्षमूलान्युपसर्पति ॥

२९२. अकथितं च ॥ ५१ ॥ (५३९)

अकथितं च यत्कारकं तत्कर्मसंज्ञं भवति । केनाकथितम् ? अपादानादिविशेषकथाभिः । परिगणनं कर्त्तव्यम् -

दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ।

ब्रुविशासिगुणेन च यत्सचते तदकीर्त्तितमाचरितं कविना ॥ (म. भा. १.४.५१)

उपयुज्यते इत्युपयोगः पयःप्रभृति, तस्य निमित्तं गवादि; तस्योपयुज्यमानपयःप्रभृतिनिमित्तस्य गवादेः कर्मसंज्ञा विधीयते । पाणिना कांस्यपात्र्यां गां दोग्धि पयः । पाण्यादिकमप्युपयोगनिमित्तं तस्य कस्मान्न भवति? नैतदस्ति; विहिता हि तत्र करणादिसंज्ञा, तदर्थमाह - अपूर्वविधाविति ।

ब्रुविशासिगुणेन च यत्सचते । ब्रुविशास्योर्गुणः साधनम्, प्रधानं कर्म धर्मादिकम्, तेन तत्सम्बध्यते, तदकीर्तितमाचरितं कविना तदकथितमुक्तं सूत्रकारेण ।

दुहि - गां दोग्धि पयः । याचि - पौरवं गां याचते । रुधि - गामवरुणद्धि व्रजम् । प्रच्छि - माणवकं पन्थानं पृच्छति । भिक्षि - पौरवं गां भिक्षते । चिञ् - वृक्षमवचिनोति फलानि । ब्रुवि - माणवकं धर्मं ब्रूते । शासि - माणवकं धर्ममनुशास्ति ॥

२९३. गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्त्ता स णौ ॥ ५२ ॥ (५४०)

अर्थशब्दः प्रत्येकमभिसंबध्यते । गत्यर्थानां बुद्ध्यर्थानां प्रत्यवसानार्थानां च धातूनां तथा शब्दकर्मकाणामकर्मकाणां च अण्यन्तानां यः कर्त्ता स ण्यन्तानां कर्मसंज्ञो भवति । गच्छति माणवको ग्रामम्, गमयति माणवकं ग्रामम् । याति माणवको ग्रामम्, यापयति माणवकं ग्रामम्।

गत्यर्थेषु नीवहयोः प्रतिषेधो वक्तव्यः (म. भा. १.४.५२ वा. ५) । नयति भारं देवदत्तः । नाययति भारं देवदत्तेन । वहति भारं देवदत्तः, वाहयति भारं देवदत्तेन ।

वहेरनियन्तृकर्तृकस्येति वक्तव्यम् (म. भा. १.४.५२ वा. ६) । इह प्रतिषेधो मा भूत् - वहन्ति यवान् बलीवर्दाः, वाहयति यवान् बलीवर्दानिति (म. भा., वा. ६)। बुद्धि - बुध्यते माणवको धर्मम्, बोधयति माणवकं धर्मम् । वेत्ति माणवको धर्मम्, वेदयति माणवको धर्मम् । प्रत्यवसानम् अभ्यवहारः - भुङ्क्ते माणवक ओदनम्, भोजयति माणवकमोदनम् । अश्नाति माणवक ओदनम्, आशयति माणवकमोदनम् ॥

आदिखाद्योः प्रतिषेधो वक्तव्यः (म. भा. १.४५२ वा. ५) अत्ति माणवक ओदनम्, आदयते माणवकेनौदनम् । खादति माणवकः । खादयति माणवकेन।

भक्षेरहिंसार्थस्य प्रतिषेधो वक्तव्यः (म. भा. १.४.५२ वा. ७) भक्षयति पिण्डीं देवदत्तः, भक्षयति पिण्डीं देवदत्तेनेति ।

अहिंसार्थस्येति किम्? भक्षयन्ति बलीवर्दाः सस्यम्, भक्षयन्ति बलीवर्दान् सस्यम् ।

शब्दकर्मणाम् - अधीते माणवको वेदम्, अध्यापयति माणवकं वेदम् । पठति माणवको वेदम्, पाठयति माणवकं वेदम् ।

अकर्मकाणाम् - आस्ते देवदत्तः, आसयति देवदत्तम् । शेते देवदत्तः शाययति देवदत्तम् ।

एतेषामिति किम्? पचत्योदनं देवदत्तः, पाचयत्योदनं देवदत्तेनेति । अण्यन्तानामिति किम्? गमयति देवदत्तो यज्ञदत्तम्, तमपरः प्रयुङ्क्ते, गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः॥

२९४. हृक्रोरन्यतरस्याम् ॥ ५३ ॥ (५४२)

' अणि कर्त्ता स णौ ' इति वर्त्तते । हरतेः करोते श्चाण्यन्तयोर्यः कर्त्ता स ण्यन्तयोरन्यतरस्यां कर्मसंज्ञो भवति । हरति भारं माणवकः, हारयति भारं माणवकं माणवकेनेति वा । करोति कटं देवदत्तः, कारयति कटं देवदत्तं देवदत्तेनेति वा ।

अभिवादिदृशोरात्मनेपद उपसंख्यानम् (म. भा. १.४.५३ वा. १) । अभिवदति गुरुं देवदत्तः, अभिवादयते गुरुं देवदत्तम्, देवदत्तेनेति वा । पश्यन्ति भृत्या राजानम्, दर्शयते भृत्यान् राजानम्, भृत्यैरिति वा ।

आत्मनेपद इति किम्? दर्शयति चैत्रं मैत्रमपरः - प्राप्तविकल्पत्वाद् द्वितीयैव । अभिवादयति गुरुं माणवकेन पिता - अप्राप्तविकल्पत्वात्तृतीयैव ॥

२९५. स्वतन्त्रः कर्त्ता ॥ ५४ ॥ (५५९)

' स्वतन्त्रः ' इति प्रधानभूत उच्यते । अगुणभूतो यः क्रियासिद्धौ स्वातन्त्र्येण विवक्ष्यते तत्कारकं कर्तृसंज्ञं भवति । देवदत्तः पचति । स्थाली पचति ।

कर्तृप्रदेशाः - कर्तृकरणयोस्तृतीया (२.३.१८) इत्येवमादयः ॥

२९६. तत्प्रयोजको हेतुश्च ॥ ५५ ॥ (२५७५)

' तत् ' इति अनन्तरः कर्ता परामृश्यते । तस्य प्रयोजकः तत्प्रयोजकः। निपातनात् समासः स्वतन्त्रस्य प्रयोजको योऽर्थः तत्कारकं हेतुसंज्ञं भवति, चकारात् कर्तृसंज्ञं च ।

संज्ञासमावेशार्थश्चकारः । कुर्वाणं प्रयुङ्क्ते, कारयति हारयति । हेतुत्वाद् णिचो निमित्तं कर्तृत्वाच्च कर्तृप्रत्ययेनोच्यते ।

हेतुप्रदेशाः - ' हेतुमति च ' (३.१.२६) इत्येवमादयः ॥

२९७. प्राग्रीश्वरान्निपाताः ॥ ५६ ॥ (१९)

' अधिरीश्वरे ' (१.४.९७) इति वक्ष्यति । प्रागेतस्मादवधेर्यानित ऊर्ध्वमनुक्रमिष्यामः, निपातसंज्ञास्ते वेदितव्याः । वक्ष्यति - ' चादयोऽसत्त्वे ' (१.४.५७) च, वा, ह, अह ।

प्राग्वचनं संज्ञासमावेशार्थम् । गत्युपसर्गकर्मप्रवचनीयसंज्ञाभिस्सह निपातसंज्ञा समाविशति ।

रेफोच्चारणम् ' ईश्वरे तोसुन्कसुनौ ' (३.४.१३) इत्ययमवधिर्मा विज्ञायीति ॥

रीश्वराद्वीश्वरान्मा भूत्, कृन्मेजन्तः परोऽपि सः ।
समासेष्वव्ययीभावो, लौकिकं चातिवर्तते ॥

(म.भा.१.४.५६ वा. १-४)

२९८. चादयोऽसत्त्वे ॥ ५७ ॥ (२०)

चादयो निपातसंज्ञा भवन्ति, न चेत्सत्त्वे वर्तन्ते । प्रसज्यप्रतिषेधोऽयम् । ' सत्त्वम् ' इति द्रव्यमुच्यते ।

च । वा । ह । अह । एव । एवम् । नूनम् । शश्वत् । युगपत् । सूपत् । कूपत् । कुवित् । नेत् । चेत् । चण् । कच्चित् । यत्र । नह । हन्त । माकिम् । नकिम् । माङ् । माङो ङकारो विशेषणार्थः - माङि लुङ् (३.३.१७५) इति, इह न भवति - मा भवतु, मा भविष्यति । नञ् । यावत् । तावत् । त्वा । त्वै । द्वै । रै । श्रौषट् । वौषट्। स्वाहा । वषट्। स्वधा । ओम् । किल । तथा । अथ । सु । स्म । अस्मि । अ । इ । उ । ऋ । लृ । ए । ऐ । ओ । औ । अम् । तक् । उञ् । उकञ् । वेलायाम् । मात्रायाम् । यथा । यत् । यम् । तत् । किम् । पुरा । अद्धा । धिक् । हाहा । हे । है। प्याट् । पाट् । थाट् । अहो । उताहो । हो । तुम् । तथाहि । खलु । आम् । आहो । अथो । ननु । मन्ये । मिथ्या । असि । ब्रूहि । तु । नु । इति । इव । वत् । चन । वत । इह । आम् । शम् । कम्, । अनुकम् । नहिकम्। हिकम् सुकम् सत्यम् ऋतम् श्रद्धा [अद्धा] इद्धा । मुधा । नोचेत् । नचेत् । नहि ।

जातु । कथम् । कुतः । कुत्र । अव। अनु । हाहौ । हैहा । ईहा । आहोस्वित् । छम्बट् । खम्। दिष्ट्या । पशु । वट् । सह । आनुषक् । अङ्ग । फट् । ताजक् । अये । अरे । चटु । बाट् । कुम्। खुम् । घुम् । हुम् । आईम् । शीम् । सीम् । वै ।

उपसर्गविभिक्तिस्वरप्रतिरूपकाश्च निपाताः (ग. सू. १६) । उपसर्गप्रतिरूपकाः -

अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ॥

' अच उपसर्गात्तः ' (७.४.४७) इति तत्त्वं न भवति । दुर्नीतम् । दुर्नयः दुर्निर्णयः । उपसर्गात् (८.४.१४) इति णत्वं न भवति ।

असत्त्व इति किम्? पशुर्वै पुरुषः । पशुः पुरोडाशः ॥

निपातप्रदेशा:- स्वरादिनिपातमव्ययम् (१.१.३७) इत्येवमादयः ॥

२९९. प्रादयः ॥ ५८ ॥ (२१)

प्रादयोऽसत्त्वे निपातसंज्ञा भवन्ति ।

प्र । परा । अप । सम् । अनु । अव । निस् । निर् । दुस् । दुर् । वि । आङ् । नि । अधि । अपि । अति । सु । उत् । अभि । प्रति । परि । उप ।

पृथग्योगकरणमुत्तरसंज्ञाविशेषणार्थम् । ' उपसर्गाः क्रियायोगे ' (१.४.५९) इति चादीनामुपसर्गसंज्ञा मा भूत् । असत्त्वे इत्येव - पराजयन्ति सेनाः ॥

३००. उपसर्गाः क्रियायोगे ॥ ५९ ॥ (२२)

प्रादयः क्रियायोगे उपसर्गसंज्ञा भवन्ति । प्रणयति, परिणयति । प्रणायकः, परिणायकः। क्रियायोग इति किम्? प्रगतो नायकोऽस्माद्देशात् प्रनायको देशः ।

मरुच्छब्दस्य चोपसंख्यानं कर्तव्यम् (म.भा. १.४.५९ । वा. २) । मरुद्भिर्दत्तो मरुत्तः । संज्ञाविधानसामर्थ्यादनजन्तत्वेऽपि ' अच उपसर्गात्तः ' (७.४.४७) इति तत्त्वं भवति । श्रच्छब्दस्योपसंख्यांनम् (म. भा. १.४.५९ वा० ३) । 'आतश्चोपसर्गे' (३.३.१०६) इत्यङ् भवति - श्रद्धा । उपसर्गप्रदेशाः- 'उपसर्गे घोः किः ' (३.३.९३) इत्येवमादयः ॥

३०१. गतिश्च ॥ ६० ॥ (२३)

गतिसंज्ञकाश्च प्रादयो भवन्ति क्रियायोगे । प्रकृत्य (२.२.१८) । प्रकृतम् (६.२.४९)। यत्प्रकरोति (८.१.४९) ।

योगविभाग उत्तरार्थः । उत्तरत्र गतिसंज्ञैव यथा स्यात्, उपसर्गसंज्ञा मा भूत् । ऊरीस्यादित्यत्र ' उपसर्गप्रादुर्भ्यमिस्तिर्यच्परः ' (८.३.८७) इति षत्वं प्रसज्येत ।

चकारः संज्ञासमावेशार्थः । प्रणीतम् । अभिषिक्तम् । ' गतिरनन्तरः ' (६.२.४९) इति स्वरः, ' उपसर्गात् ' (८.४.१४, ८.३.६५) इति णत्वषत्वे च भवतः ।

कारिकाशब्दस्योपसंख्यानम् (म. भा. १.४ ६० । वा. १) । कारिकाकृत्य । कारिकाकृतम् । यत्कारिकाकरोति ।

पुनश्चनसौ छन्दसि गतिसंज्ञौ भवत इति वक्तव्यम् (म. भा. १.४.६० वा. २) । पुनरुत्स्यूतं वासो देयम् (मै. १.७.२) । गतिर्गतौ (८.१.७०) इति निघातो भवति । (उशिग्दूतः) चनोहितः (ऋ० ३.११.२) । गतिरनन्तरः (६.२.४९) इति स्वरः।

गतिप्रदेशाः -' कुगतिप्रादयः ' (२.२.१८) इत्येवमादयः ।

३०२. ऊर्यादिच्विडाचश्च ॥ ६१ ॥

ऊर्यादयः शब्दा च्व्यन्ता डाजन्ताश्च क्रियायोगे गतिसंज्ञा भवन्ति । च्विडाचोः कृभ्वस्तियोगे विधानम्, तत्साहचर्यादूर्यादीनामपि तैरेव योगे गतिसंज्ञा विधीयते ।

ऊरीउररीशब्दावङ्गीकरणे विस्तारे च (ग. सू. १३६) । ऊरीकृत्य, ऊरीकृतम्, यदूरीकरोति। उररीकृत्य, उररीकृतम्, यदुररीकरोति ।

पापी । ताली । आताली । वेताली । धूसी । शकला । संशकला । ध्वंसकला । भ्रंशकला । एते शकलादयो हिंसायाम् (ग. सू. १३६) । शकलाकृत्य । संशकलाकृत्य । ध्वंसकलाकृत्य । भ्रंशकलाकृत्य । गुलुगु धा पीडार्थे (ग. सू. १३६) । गुलुगुधाकृत्य । सजूः सहार्थे (ग. सू. १६७) । सजूःकृत्य । फलू, फली, विक्ली, आक्ली - इति विकारे (ग. सू. १३७)। फलूकृत्य । फलीकृत्य । विक्लीकृत्य । आक्लीकृत्य । आलोष्टी, कराली, केवाली शेवाली, वर्षाली, मस्मसा, मसमसा - एते हिंसायाम् । वषट् । वौषट् । श्रौषट् । स्वाहा । स्वधा । बन्धा । प्रादुस् । श्रुत् । आविस् ।

च्व्यन्ताः खल्वपि - शुक्लीकृत्य । शुक्लीकृतम् । यच्छुल्कीकरोति ।

डाच् - पटपटाकृत्य । पटपटाकृतम् । यत्पटपटाकरोति ॥

३०३. अनुकरणं चानितिपरम् ॥ ६२ ॥ (७६३)

इतिः परो यस्मादिति बहुव्रीहिः । अनुकरणमनितिपरं क्रियायोगे गतिसंज्ञं भवति । खाट्कृत्य । खाट्कृतम् । यत्खाट्करोति ।

अनितिपरमिति किम्? ' खाडिति कृत्वा निरष्ठीवत् ' ॥

३०४. आदरानादरयोः सदसती ॥ ६३ ॥ (७६४)

प्रीतिसम्भ्रमः आदरः । परिभवौदासीन्यम् अनादरः । आदरानादरयोर्यथाक्रमं सदसच्छब्दौ गतिसंज्ञौ भवतः । सत्कृत्य, सत्कृतम्, यत्सत्करोति । असत्कृत्य, असत्कृतम्, यदसत्करोति।

आदरानादरयोरिति किम्? सत्कृत्वा काण्डं गतः । असत्कृत्वा काण्डं गतः॥

३०५. भूषणेऽलम् ॥ ६४ ॥ (७६६)

अलम् इति प्रतिषेधे, सामर्थ्ये, पर्याप्तौ भूषणे चेति विशेषणमुपादीयते। भूषणे योऽलंशब्दः स गतिसंज्ञो भवति । अलंकृत्य, अलंकृतम्, यदलंकरोति।

भूषण इति किम्? अलं भुक्त्वा ओदनं गतः॥

३०६. अन्तरपरिग्रहे ॥ ६५ ॥ (७६६)

अन्तःशब्दोऽपरिग्रहेऽर्थेगतिसंज्ञो भवति । परिग्रहः स्वीकरणम्, तदभावे गतिसंज्ञा विधीयते । अन्तर्हत्य, अन्तर्हतम्, यदन्तर्हन्ति ।

अपरिग्रह इति किम्? अन्तर्हत्वा मूषिकां श्येनो गतः । परिगृह्य गत इत्यर्थः।

अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गसंज्ञा वक्तव्या (म. भा. १.४.६१ वा. १) । आङ् - अन्तर्द्धा (३.३.१०६) । कविधिः - अन्तर्द्धिः (३.३.९२) । णत्वम् - अन्तर्णयति (८.४.६४) ॥

३०७. कर्णेमनसी श्रद्धाप्रतीघाते ॥ ६६ ॥ (७६७)

कर्णेशब्दो मनस्शब्दश्च श्रद्धाप्रतीघाते गतिसंज्ञौ भवतः । कर्णेहत्य पयः पिबति । मनोहत्य पयः पिबति । तावत्पिबति यावदस्याभिलाषो निवृत्तः । श्रद्धा प्रतिहता इत्यर्थः ।

श्रद्धाप्रतीघाते इति किम्? कर्णे हत्वा गतः । मनो हत्वा गतः ॥

३०८. पुरोऽव्ययम् ॥ ६७ ॥ (७६८)

असिप्रत्ययान्तः पुरःशब्दोव्ययम् । स गतिसंज्ञो भवति । समासस्वरोपचाराः (८.३.४०) प्रयोजनम् । पुरस्कृत्य, पुरस्कृतम्, यत्पुरस्करोति ।

अव्ययमिति किम् ? पूः पुरौ, पुरः कृत्वा काण्डं गतः ॥

३०९. अस्तं च ॥ ६८ ॥ (७६९)

अस्तंशब्दो मकारान्तोऽव्ययमनुपलब्धौ वर्त्तते । स गतिसंज्ञो भवति । अस्तंगत्य सविता पुनरुदेति । अस्तंगतानि धनानि । यदस्तंगच्छति । अव्ययमित्येव - अस्तं काण्डम् । क्षिप्तमित्यर्थः ॥

३१०. अच्छ गत्यर्थवदेषु ॥ ६९ ॥ (७७०)

अच्छशब्दोऽव्ययमभिशब्दस्यार्थे वर्त्तते । स गत्यर्थेषु धातुषु वदतौ च गतिसंज्ञो भवति। अच्छगत्य, अच्छगतम्, यदच्छगच्छति । वदतौ - अच्छोद्य, अच्छोदितम्, यदच्छवदति । अव्ययमित्येव - उदकमच्छं गच्छति ॥

३११. अदोऽनुपदेशे ॥ ७० ॥ (७७१)

अदःशब्दस्त्यदादिषु पठ्यते, सोऽनुपदेशे गतिसंज्ञो भवति । उपदेशः परार्थः प्रयोगः । स्वयमेव तु यदा बुद्ध्या परामृशति तदा नास्त्युपदेश इति सोऽस्य विषयः। अदःकृत्य, अदःकृतम्, यददःकरोति ।

अनुपदेश इति किम्? अदः कृत्वा काण्डं गत इति परस्य कथयति ॥

३१२. तिरोऽन्तर्द्धौ ॥ ७१ ॥ (७७२)

अन्तर्द्धिः व्यवधानम् । तत्र तिरःशब्दो गतिसंज्ञो भवति । तिरोभूय, तिरोभूतम्, यत् तिरोभवति । अन्तर्द्धाविति किम्? तिरो भूत्वा स्थितः । पार्श्वातो भूत्वेत्यर्थः ॥

३१३. विभाषा कृञि ॥ ७२ ॥ (७७३)

'अन्तर्द्धौ' इति वर्त्तते । प्राप्तविभाषेयम् । तिरःशब्दः करोतौ परतो विभाषा गतिसंज्ञो भवति । तिरःकृत्य, तिरस्कृत्य (८.३.४२) । तिरस्कृतम् । यत्तिरस्करोति । तिरःकृत्वा । तिरस्कृत्वा । अन्तर्द्धावित्येव तिरः कृत्वा काष्ठं तिष्ठति ॥

३१३. उपाजेऽन्वाजे ॥ ७३ ॥ (७७४)

'विभाषा कृञि' इति वर्त्तते । उपाजेऽन्वाजेशब्दौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य सामर्थ्याधाने वर्त्तेते । तौ कृञि विभाषा गतिसंज्ञौ भवतः । उपाजेकृत्य, उपाजे कृत्वा । अन्वाजेकृत्य, अन्वाजे कृत्वा ॥

३१५. साक्षात्प्रभृतीनि च ॥ ७४ ॥ (७७५)

' विभाषा कृञि ' इति वर्त्तते । साक्षात्प्रभृतीनि शब्दरूपाणि कृञि विभाषा गतिसंज्ञानि भवन्ति ।

साक्षात्प्रभृतिषु च्व्यर्थवचनम् (म. भा. १.४.७४ वा. १) । साक्षात् कृत्य, साक्षात्कृत्वा । मिथ्याकृत्य, मिथ्या कृत्वा । साक्षात् । मिथ्या । चिन्ता । भद्रा । लोचना । विभाषा । संपत्का । आस्था । अम । श्रद्धा । प्रजर्या । प्राजरुहा । वीजर्या । वीजरुहा । संसर्या । अर्थे। लवणम् । उष्णम् । शीतम् । उदकम् । आर्द्रम् । गतिसंज्ञासंनियोगेन लवणादीनां मकारान्तत्वं निपात्यते । अग्नौ । वशे । विकम्पने। विहसने । प्रहसने । प्रादुस् । नमस् । आविस् ॥

३१६. अनत्याधान उरसिमनसी ॥ ७५ ॥ (७७६)

' विभाषा कृञि ' इति वर्त्तते । अत्याधानम् उपश्लेषणम्, तदभावेऽनत्याधाने उरसिमनसी शब्दौ विभाषा कृञि गतिसंज्ञौ भवतः । उरसिकृत्य, उरसि कृत्वा । मनसिकृत्य, मनसि कृत्वा।

अनत्याधान इति किम् ? उरसि कृत्वा पाणिं शेते ॥

३१७. मध्ये पदे निवचने च ॥ ७६ ॥ (७७७)

' विभाषा कृञि ' इति वर्त्तते । चकाराद् ' अनत्याधने ' इति च । मध्ये, पदे, निवचने - इत्येते शब्दा अनत्याधाने विभाषा कृञि गतिसंज्ञा भवन्ति । मध्येकृत्य मध्ये कृत्वा । पदेकृत्य, पदे कृत्वा । निवचनम् वचनाभावः । निवचनेकृत्य, निवचने कृत्वा । वाचं नियम्येत्यर्थः । अनत्याधान इत्येव - हस्तिनः पदे कृत्वा शिरः शेते ॥

३१८. नित्यं हस्ते पाणावुपयमने ॥ ७७ ॥ (७७८)

'कृञि' इति वर्त्तते । 'हस्ते पाणौ' इत्येतौ शब्दौ कृञि नित्यं गतिसंज्ञौ भवत उपयमने। उपयमनम् दारकर्म । हस्तेकृत्य । पाणौकृत्य । दारकर्म कृत्वेत्यर्थः।

उपयमने इति किम्? हस्ते कृत्वा कार्षापणं गतः ॥

३१९. प्राध्वं बन्धने ॥ ७८ ॥ (७७९)

' कृञि ' इति वर्त्तते । ' प्राध्वम् ' इति मकारान्तमव्ययमानुकूल्ये वर्त्तते, तदानुकूल्यं बन्धनहेतुकं यदा भवति तदा प्राध्वंशब्दः कृञि नित्यं गतिसंज्ञो भवति । प्राध्वंकृत्य । बन्धन इति किम्? प्राध्वं कृत्वा शकटं गतः ॥

३२०. जीविकोपनिषदावौपम्ये ॥ ७९ ॥ (७८०)

' कृञि ' इति वर्त्तते । जीविका, उपनिषत् - इत्येतौ शब्दौ औपम्ये विषये कृञि गतिसंज्ञौ भवतः । जीविकाकृत्य । उपनिषत्कृत्य ।

औपम्य इति किम्? जीविकां कृत्वा गतः ॥

३२१. ते प्राग् धातोः ॥ ८० ॥ (२२३०)

ते गत्युपसर्गसंज्ञकाः धातोः प्राक् प्रयोक्तव्याः । तथा चैवोदाहृताः । 'ते' ग्रहणमुपसर्गार्थम्। गतयो ह्यनन्तराः ॥

३२२. छन्दसि परेऽपि ॥ ८१ ॥ (३३९१)

प्राक् प्रयोगे प्राप्ते छन्दसि परेभ्यनुज्ञायन्ते । छन्दसि विषये गत्युपसर्गसंज्ञकाः परेऽपि पूर्वेऽपि प्रयोक्तव्याः । न च परेषां प्रयुज्यमानानां संज्ञाकार्यं किञ्चिदस्ति । केवलं परप्रयोगेऽपि क्रियायोग एषामस्तीति ज्ञाप्यते। याति नि हस्तिना । नियाति हस्तिना । हन्ति नि मुष्टिना । निहन्ति मुष्टिना ॥

३२३. व्यवहिताश्च ॥ ८२ ॥ (३३९२)

व्यवहिताश्च गत्युपसर्गसंज्ञकाः छन्दसि दृश्यन्ते । ' आ मन्द्रैरिन्द्र हरिभिर्याहि मयुररोमभिः ' (ऋ. ३.४५.१) । आयाहि (ऋ. ६.१६.१०) ।

३२४. कर्मप्रवचनीयाः ॥ ८३ ॥ (५४६)

'कर्मप्रवचनीयाः' इत्यधिकारो वेदितव्यः । यानित ऊर्ध्वमनुक्रमिष्यामः कर्मप्रवचनीयसंज्ञास्ते वेदितव्याः । ' अधिरीश्वरे ' (१.४.९७) इति यावद्वक्ष्यति।

कर्मप्रवचनीयप्रदेशाः-'कर्मप्रवचनीययुक्ते द्वितीया' (२.३.८) इत्येवमादयः ॥

३२५. अनुर्लक्षणे ॥ ८४ ॥ (५४७)

अनुशब्दो लक्षणे द्योत्ये कर्मप्रवचनीयसंज्ञो भवति । शाकल्यस्य संहितामनु (निशम्य देवः) प्रावर्षत् (म. भा. १.४.८३) । अनुदुद्यज्ञमन्वसिञ्चत् । अगस्त्यमन्वसिञ्चन्प्रजाः ।

किमर्थमिदमुच्यते, यावता 'लक्षणेत्थम्भूताख्यान' (१.४.९०) इति सिद्धैवानोः कर्मप्रवचनीयसंज्ञा ? हेत्वर्थं तु वचनम् (म. भा. १.४.८३ वा. २), हेतुतृतीयां बाधित्वा द्वितीयैव यथा स्यात् ॥

३२६. तृतीयार्थे ॥ ८५ ॥ (५४९)

अनुशब्दस्तृतीयार्थे द्योत्ये कर्मप्रवचनीयसंज्ञो भवति । नदीमन्ववसिता सेना । पर्वतमन्ववसिता सेना । पर्वतेन सम्बद्धेत्यर्थः ॥

३२७. हीने ॥ ८६ ॥ (५५०)

'हीन' इति न्यून उच्यते, स चोत्कृष्टापेक्षः । तेनेयं हीनोत्कृष्टसंबन्धे संज्ञा विज्ञायते। हीने द्योत्येऽयमनुः कर्मप्रवचनीयसंज्ञो भवति । अनुशाकटायनं वैयाकरणाः। अन्वर्जुनं योद्धारः॥

३२८. उपोऽधिके च ॥ ८७ ॥ (५५१)

उपशब्दः अधिके हीने च द्योत्ये कर्मप्रवचनीयसंज्ञो भवति । उपखार्याः (२.३.९) द्रोणः। उपनिष्के कार्षापणम् । हीने - उपशाकटायनं वैयाकरणाः॥

३२९. अपपरी वर्जने ॥ ८८ ॥ (५९६)

अप-परी - शब्दौ वर्जने द्योत्ये कर्मप्रवचनीयसंजौ भवतः । प्रकृतेन सम्बन्धिना कस्यचिदनभिसम्बन्धः वर्जनम् । अप त्रिगर्त्तेभ्यो (२.३.१०) वृष्टो देवः। परि परि (८.१.५) त्रिगर्त्तेभ्यो वृष्टो देवः । वर्जन इति किम्? ओदनं परिषिञ्चति ॥

३३०. आङ् मर्यादावचने ॥ ८९ ॥ (५९७)

'आङ्' इत्येष शब्दो मर्यादावचने कर्मप्रवचनीयसंज्ञो भवति । अवधिः - मर्यादा । वचनग्रहणादभिविधिरपि गृह्यते । आ पाटलिपुत्राद् (२.३.१०) वृष्टो देवः । आकुमारं यशः पाणिनेः (म. भा. १.४.८८ वा. १) । आ सांकाश्यात् । आ मथुरायाः । मर्यादावचने इति किम्? ईषदर्थे क्रियायोगे च मा भूत् ॥

३३१. लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः ॥ ९० ॥ (५५२)

लक्षणे, इत्थंभूताख्याने, भागे, वीप्सायां च विषयभूतायाम् - प्रति, परि, अनु - इत्येते कर्मप्रवचनीयसंज्ञा भवन्ति । लक्षणे तावत् - वृक्षं प्रति विद्योतते विद्युत् । वृक्षं परि । वृक्षमनु। इत्थम्भूताख्याने - साधुर्देवदत्तो मातरं प्रति । मातरं परि । मातरमनु । भागे - यदत्र मां प्रति स्यात् । मां परि स्यात् । मामनु स्यात् । वीप्सायाम् - वृक्षं वृक्षं प्रति सिञ्चति, परि सिञ्चति, अनु सिञ्चति । लक्षणादिष्विति किम्? ओदनं परिषिञ्चति । अथ परिशब्दयोगे

पञ्चमी कस्मान्न भवति - 'पञ्चम्यपाङ्परिभिः' (२.३.१०) इति? वर्जनविषये सा विधीयते, अपशब्दसाहचर्यात् ।

३३२. अभिरभागे ॥ ९१ ॥ (५५३)

लक्षणादिष्वेव भागवर्जितेष्वभिः कर्मप्रवचनीयसंज्ञो भवति । वृक्षमभि विद्योतते विद्युत्। साधु र्देवदत्तो मातरमभि । वृक्षं वृक्षमभि सिञ्चति । अभागे इति किम्? भागः स्वीक्रियमाणोंऽशः । यदत्र ममाभिष्यात् तद्दीयताम्। यदत्र मम भवति तद्दीयतामित्यर्थः ॥

३३३. प्रतिः प्रतिनिधिप्रतिदानयोः ॥ ९२ ॥ (४९९)

मुख्यसदृशः - प्रतिनिधिः । दत्तस्य प्रतिनिर्यातनम् प्रतिदानम् । प्रतिनिधिविषये प्रतिदानविषये च प्रतिः कर्मप्रवचनीयसंज्ञो भवति । अभिमन्युरर्जुनतः प्रति । माषानस्मै तिलेभ्यः (२.३.११) प्रति यच्छति ॥

३३४. अधिपरी अनर्थकौ ॥ ९३ ॥ (५५४)

अधिपरी शब्दौ अनर्थकौ अनर्थान्तरवाचिनौ कर्मप्रवचनीयसंज्ञौ भवतः। कुतोऽध्यागच्छति। कुतः पर्यागच्छति ।

गत्युपसर्गसंज्ञाबाधनार्था कर्मप्रवचनीयसंज्ञा विधीयते ॥

३३५. सुः पूजायाम् ॥ ९४ ॥ (५५५)

सुशब्दः पूजायामर्थे कर्मप्रवचनीयसंज्ञो भवति । सुसिक्तं भवता । सुस्तुतं भवता । धात्वर्थः स्तूयते । उपसर्गसंज्ञाश्रयं षत्वं न भवति ।

पूजायामिति किम्? सुषिक्तं किं तवात्र ॥

३३६. अतिरतिक्रमणे च ॥ ९५ ॥ (५५६)

अतिशब्दः अतिक्रमणे चकारात्पूजायां च कर्मप्रवचनीयसंज्ञो भवति । निष्पन्नेऽपि वस्तुनि क्रिया प्रवृत्तिः अतिक्रमणम् । अति सिक्तमेव भवता, अति स्तुतमेव भवता । पूजायाम् - अति सिक्तं भवता । अति स्तुतं भवता । शोभनं कृतमित्यर्थः ।

३३७. अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु ॥९६॥ (५५७)

पदार्थे, संभावने, अन्ववसर्गे, गर्हायाम्, समुच्चये च वर्तमानः अपिः कर्मप्रवचनीयसंज्ञो भवति ।

पदान्तरस्याप्रयुज्यमानस्यार्थः पदार्थः । सर्पिषोऽपि स्यात् । मधुनोऽपि स्यात् । मात्रा, बिन्दुः; स्तोकमित्यस्यार्थेऽपिशब्दो वर्त्तते । संभावनम् अधिकार्थवचनेन शक्तेरप्रतिघाताविष्करणम् । अपि सिञ्चेन् मूलकसहस्रम् । अपि स्तुयाद् राजानम् । अन्ववसर्गः = कामचाराभ्यनुज्ञानम्-अपि सिञ्च, अपि स्तुहि । गर्हा निन्दा - धिग् जाल्मं देवदत्तम् अपि सिञ्चेत्पलाण्डुम्, (नि. १.४.१२) अपि स्तुयाद् वृषलम् । समुच्चये - अपि सिञ्च अपि स्तुहि । सिञ्च च स्तुहि च । उपसर्गसंज्ञाबाधनात् षत्वं न भवति ॥

३३८. अधिरीश्वरे ॥ ९७ ॥ (६४४)

ईश्वरः स्वामी, स च स्वमपेक्षते । तदयं स्वस्वामिसम्बन्धे अधिः कर्मप्रवचनीयसंज्ञो भवति । तत्र कदाचित् स्वामिनः कर्मप्रवचनीयविभक्तिः सप्तमी भवति कदाचित् स्वात् । अधि ब्रह्मदत्ते पञ्चालाः । अधि पञ्चालेषु ब्रह्मदत्तः ॥

३३९. विभाषा कृञि ॥ ९८ ॥ (६४६)

अधिः करोतौ विभाषा कर्मप्रवचनीयसंज्ञो भवति । यदत्र मामधिकरिष्यति। कर्मप्रवचनीयसंज्ञापक्षे गतिसंज्ञाबाधनात् तिङि चोदात्तवति (८.१.७१) इति निघातो न भवति ॥

३४०. लः परस्मैपदम् ॥ ९९ ॥ (२१५५)

'लः' इति षष्ठी आदेशापेक्षा । लादेशाः परस्मैपदसंज्ञा भवन्ति । तिप्, तस्, झि । सिप्, थस्, थ । मिप्, वस्, मस् । शतृक्वसू च ।

परस्मैपदप्रदेशाः- 'सिचि वृद्धिः परस्मैपदेषु' (७.२.१) इत्येवमादयः॥

३४१. तङानावात्मनेपदम् ॥ १०० ॥ (२१५६)

'तङ्' इति प्रत्याहारो नवानां वचनानाम् । 'आन' इति शानच्कानचोर्ग्रहणम्। पूर्वेण परस्मैपदसंज्ञायां प्राप्तायां तङानयोरात्मनेपदसंज्ञा विधीयते । त, आताम्, झ । थास्, आथाम्, ध्वम् । इट्, वहि, महिङ् । आनः खल्वपि - शानच्कानचौ । 'लः' इत्येव - कतीह निघ्नानाः (३.२.१२९) ।

आत्मनेपदप्रदेशाः - 'अनुदात्तङित आत्मनेपदम्' (१.३.१२) इत्येवमादयः ॥

३४२. तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः ॥ १०१ ॥ (२१६०)

तिङोऽष्टादश प्रत्ययाः - नव परस्मैपदंसंज्ञकाः, नवात्मनेपदसंज्ञकाः । तत्र परस्मैपदेषु त्रयस्त्रिकाः यथाक्रमं प्रथममध्यमोत्तमसंज्ञा भवन्ति । आत्मनेपदेष्वपि त्रयस्त्रिकाः प्रथममध्यमोत्तमसंज्ञा भवन्ति ।

तिप्, तस्, झि - इति प्रथमः । सिप्, थस्,थ - इति मध्यमः । मिप्, वस्, मस् - इत्युत्तमः ।

आत्मनेपदेषु - त, आताम्, झ - इति प्रथमः । थास्, आथाम्, ध्वम् - इति मध्यमः । इट्, वहि, महिङ् - इत्युत्तमः ।

प्रथममध्यमोत्तमप्रदेशाः - शेषे प्रथमः (१.४.१०८) इत्येवमादयः ॥

३४३. तान्येकवचनद्विवचनबहुवचनान्येकशः ॥ १०२ ॥ (२१३१)

तान्येकवचनद्विवचनबहुवचनसंज्ञानि भवन्ति । एकशः एकैकं पदम् । 'तिप्' इत्येकवचनम् । तस् इति द्विवचनम् । झि इति बहुवचनम् । एवं सर्वत्र । एकवचनद्विवचनबहुवचनप्रदेशाः - ' बहुषु बहुवचनम् ' (१.५.२१) इत्येवमादयः ॥

३४४. सुपः ॥ १०३ ॥ (१८५)

तिङां त्रिकेष्वेकवचनादिसंज्ञा विहिताः, संप्रति सुपां त्रिकेषु विधीयन्ते । सुपश्च त्रीणि त्रीणि पदानि एकश एकवचनद्विवचनबहुवचनसंज्ञानि भवन्ति ।

' सु ' इत्येकवचनम् । ' औ ' इति द्विवचनम् । ' जस् ' इति बहुवचनम् । एवं सर्वत्र॥

३४५. विभक्तिश्च ॥ १०४ ॥ (१८४)

' त्रीणि त्रीणि ' इत्यनुवर्त्तते । त्रीणि त्रीणि विभक्तिसंज्ञाश्च भवन्ति सुपस्तिङश्च।

विभक्तिप्रदेशाः - अष्टन आ विभक्तौ (७.२.८४) इत्येवमादयः ॥

३४६. युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः ॥ १०५ ॥ (२१६२)

लस्य (३.४.७७) इत्यधिकृत्य सामान्येन तिबादयो विहिताः, तेषामयं पुरुषनियमः क्रियते - युष्मद्युपपदे सति व्यवहिते चाव्यवहिते सति समानाधिकरणे समानाभिधेये तुल्यकारके स्थानिनि प्रयुज्यमानेऽप्यप्रयुज्यमानेऽपि मध्यमपुरुषो भवति । त्वं पचसि, युवां पचथः, यूयं पचथ । अप्रयुज्यमानेऽपि - पचसि, पचथः, पचथ ॥

३४७. प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ॥ १०६ ॥ (२१६३)

प्रहासः=परिहासः क्रीडा । प्रहासे गम्यमाने मन्योपपदे धातोर्मध्यमपुरुषो भवति, मन्यतेश्चोत्तमः, स चैकवद्भवति । एहि मन्ये ओदनं भोक्ष्यसे इति नहि भोक्ष्यसे, भुक्तः सोऽतिथिभिः । एहि मन्ये रथेन यास्यसि, न हि यास्यसि, यातस्तेन ते पिता । मध्यमोत्तमयोः प्राप्तयोः उत्तममध्यमौ विधीयेते । प्रहासे इति किम्? एहि मन्यसे ओदनं भोक्ष्ये इति । सुष्ठु मन्यसे, साधु मन्यसे ॥

३४८. अस्मद्युत्तमः ॥ १०७ ॥ (२१६४)

उत्तमपुरुषो नियम्यते । अस्मद्युपपदे समानाभिधेये प्रयुज्यमानेऽप्रयुज्यमानेऽपि उत्तमपुरुषो भवति । अहं पचामि । आवां पचावः। वयं पचामः । अप्रयुज्यमानेऽपि - पचामि । पचावः । पचामः ॥

३४९. शेषे प्रथमः ॥ १०८ ॥ (२१६५)

'शेषे' इति मध्यमोत्तमविषयादन्य उच्यते । यत्र युष्मदस्मदी समानाधिकरणे उपपदे न स्तः, तत्र शेषे प्रथमपुरुषो भवति । पचति । पचतः । पचन्ति ॥

३५०. परः संनिकर्षः संहिता ॥ १०९ ॥ (२८)

परशब्दोऽतिशये वर्त्तते । संनिकर्षः प्रत्यासत्तिः । परो यः संनिकर्षः वर्णानामर्धमात्राकालव्यवधानम्, स संहितासंज्ञो भवति । दध्यत्र । मध्वत्र ।

संहिताप्रदेशाः - संहितायाम् (६.१.७२) इत्येवमादयः ॥

३५१. विरामोऽवसानम् ॥ ११० ॥ (२७)

विरतिः=विरामः, विरम्यतेऽनेनेति वा विरामः । सोऽवसानसंज्ञो भवति । दधिँ । मधुँ (८.४.५७) । वृक्षः । प्लक्षः (८.३.१५) ।

अवसानप्रदेशाः - 'खरवसानयोर्विसर्जनीयः' (८.३.१५) इत्येवमादयः ॥

॥ इति श्रीजयादित्यविरचितायां काशिकावृत्तौ प्रथमाध्यायस्य चतुर्थः पादः ॥

॥ समाप्तश्चायं प्रथमाध्यायः ॥

अथ द्वितीयाध्याये

प्रथमः पादः

३५२. समर्थः पदविधिः ॥ १ ॥ (६४७)

परिभाषेयम् । यः कश्चिद् इह शास्त्रे पदविधिः श्रूयते स सर्वः समर्थो वेदितव्यः । विधीयत इति विधिः, पदानां विधिः पदविधिः । स पुनः समासादिः।
समर्थः शक्तः । विग्रहवाक्यार्थाभिधाने यः शक्तः स समर्थो वेदितव्यः ।

अथवा समर्थपदाश्रयत्वात् समर्थः । समर्थानां पदानां सम्बद्धार्थानां संसृष्टार्थानां विधिर्वेदितव्यः । वक्ष्यति-'द्वितीया श्रितातीतपतित-गतात्यस्तप्राप्तापन्नैः' (२.१.२४) - कष्टं श्रितः कष्टश्रितः ।

समर्थग्रहणं किम्? पश्य देवदत्त कष्टम्, श्रितो विष्णुमित्रो गुरुकुलम् । (म.भा. २.१.१) ' तृतीया तत्कृतार्थेन गुणवचनेन ' (२.१.३०) - शङ्कुलया खण्डः शङ्कुलाखण्डः। समर्थग्रहणं किम्? किं त्वं करिष्यसि शङ्कुलया, खण्डो देवदत्त उपलेन । ' चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ' (२.१.३६) - युपाय दारु युपदारु । समर्थग्रहणं किम्? गच्छ त्वं यूपाय, दारु देवदत्तस्य गेहे । 'पञ्चमी भयेन ' (२.१.३७) - वृकेभ्यो भयं वृकभयम् । समर्थग्रहणं किम्? गच्छ त्वं मा वृकेभ्यः, भयं देवदत्तस्य यज्ञदत्तात् (म. भा. २.१.१) । 'षष्ठी' (२.२.८) राज्ञः पुरुषो राजपुरुषः । समर्थग्रहणं किम्? भार्या राज्ञः, पुरुषो देवदत्तस्य (म. भा.) । ' सप्तमी शौण्डैः ' (२.१.४०) - अक्षेषु शौण्डः अक्षशौण्डः । समर्थग्रहणं किम्? शक्तस्त्वमक्षेषु, शौण्डः पिबति पानागारे (म. भा.) ।

पदग्रहणं किम्? वर्णविधौ समर्थपरिभाषा मा भूत् । तिष्ठतु दध्यशान त्वं शाकेन । तिष्ठतु कुमारीच्छत्रं हर देवदत्तात् (म. भा.) । यणादेशो (३.१.७७) नित्यश्च तुग् (६.१.७५) भवति ॥

३५३. सुबामन्त्रिते पराङ्गवत्स्वरे ॥ २ ॥ (३६५३)

सुबन्तमामन्त्रिते परतः परस्याङ्गवद्भवति, स्वरे स्वरलक्षणे कर्तव्ये । तादात्म्यातिदेशोऽयम् ।

सुबन्तमामन्त्रितमनुप्रविशति । वक्ष्यति - 'आमन्त्रितस्य च' (६.१.१९८), आमन्त्रितस्यादिरुदात्तो भवति । स ससुप्कस्यापि यथा स्यात् । कुण्डेनाटन् । परशुना वृश्चन्। मद्राणां राजन् । कश्मीराणां राजन् । सुबिति किम् ? पीड्ये पीड्यमान । आमन्त्रित इति किम्? गेहे गार्ग्यः । परग्रहणं किम्? पूर्वस्य मा भूत् - देवदत्त कुंडेनाटन् ।

अङ्गग्रहणं किम्? यथा मृत्पिण्डीभूतः स्वरं लभेत । उभयोराद्युदात्तत्वं मा भूत् ।

वत्करणं किम्? स्वाश्रयमपि कार्यं यथा स्यात् । आम् कुण्डेनाटन्। 'आम एकान्तरमामन्त्रितमनन्तिके ' (८.१.९५) इत्येकान्तरता भवति ।

स्वर इति किम्? कूपे सिञ्चन् । चर्म नमन् । षत्वणत्वे (८.३.१११) (८.४.१) प्रति पराङ्गवन्न भवति ।

सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसंख्यानमनन्तरत्वात् (म. भा. २.१.२ वा. ४) । तीक्ष्णया सूच्या सीव्यन् । तीक्ष्णेन परशुना वृश्चन् (म. भा.) ।

अव्ययानां प्रतिषेधो वक्तव्यः । उच्चैरधीयान (म. भा. , वा. ६) । नीचैरधीयान ॥

३५४. प्राक्कडारात् समासः ॥ ३ ॥ (६४८)

कडारसंशब्दनात् (२.२.३८) प्राग् यानित ऊर्ध्वमनुक्रमिष्यामः, ते समाससंज्ञा वेदितव्याः। वक्ष्यति - ' यथाऽसादृश्ये ' (२.१.७), यथावृद्धं ब्राह्मणानामन्त्रयस्व । प्राग्वचनं संज्ञासमावेशार्थम् (म. भा.) ।

समासप्रदेशाः - ' तृतीयासमासे ' (१.१.३०) इत्येवमादयः ॥

३५५. सह सुपा ॥ ४ ॥ (६४९)

' सुप् ' इति वर्त्तते ' सह ' इति ' सुपा ' इति च त्रयमप्यधिकृतं वेदितव्यम् । यदित ऊर्ध्वमनुक्रमिष्यामस्तत्रेदमुपस्थितं द्रष्टव्यम् । वक्ष्यति - ' द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः ' (२.१.१४) इति, द्वितीयान्तं श्रितादिभिः सह समस्यते; कष्टं श्रितः=कष्टश्रितः ।

सहग्रहणं योगविभागार्थम्, तिङापि सह यथा स्यात् - अनुव्यचलत्, अनुप्रावर्षत् ॥

३५६. अव्ययीभावः ॥ ५ ॥ (६५१)

'अव्ययीभावः' इत्यधिकरो वेदितव्यः। यानित ऊर्ध्वमनुक्रमिष्या-मोऽव्ययीभावसंज्ञास्ते वेदितव्याः ।

वक्ष्यति - ' यथाऽसादृश्ये ' (२.१.७), यथावृद्धं ब्राह्मणानामन्त्रयस्व ।

अन्वर्थसंज्ञा चेयं महती तया पूर्वपदार्थप्राधान्यमव्ययीभावस्य दर्शयति ।

अव्ययीभावप्रदेशाः - ' अव्ययीभावश्च ' (२.४.१८) इत्येवमादयः ।

३५७.अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानु-पूर्व्ययौगपद्यसादृश्यसम्पत्ति-साकल्यान्तवचनेषु ॥ ६ ॥ (६५२)

'सुप्' 'सुपा' इति च वर्त्तते । विभाक्त्यादिष्वर्थेषु यदव्ययं वर्त्तते तत्समर्थेन सुबन्तेन सह समस्यते, अव्ययीभावश्च समासो भवति । वचनग्रहणं प्रत्येकमभिसम्बद्ध्यते ।

(१) विभक्तिवचने तावत् - स्त्रीष्वधिकृत्य कथा प्रवर्तते अधिस्त्रि, अधिकुमारि । सप्तम्यर्थे यदव्ययं तद् विभक्तिवचनम् ।

(२) समीपवचने - कुम्भस्य समीपम् उपकुम्भम् । उपमणिकम् ।

(३) समृद्धिः-ऋद्धेराधिक्यम् । समृद्धिर्मद्राणाम् सुमद्रम्, सुमगधं वर्त्तते।

(४) व्यृद्धिः ऋद्धेरभावः । गवदिकानामृद्धेरभावः=दुर्गवदिकम्, दुर्यवनं वर्तते ।

(५) अर्थाभावः=वस्तुनोऽभावः । अभावो मक्षिकाणाम् निर्मक्षिकम्, निर्मशकं वर्त्तते ।

(६) अत्ययः [अ] भूतत्वम्, अतिक्रमः । अतीतानि हिमानि निर्हिमम्, निःशीतं वर्तते ।

(७) असंप्रति=उपभोगस्य वर्तमानकालप्रतिषेधः । अतितैसृकम् । तैसृकम्=आच्छादनम्, तस्यायमुपभोगकालो न भवतीत्यर्थः ।

(८) शब्दप्रादुर्भावः प्रकाशता शब्दस्य - इति पाणिनि । तत्पाणिनि । पाणिनिशब्दो लोके प्रकाशत इत्यर्थः ।

(९) पश्चात् - अनुरथं पादातम् । रथानां पश्चात् इत्यर्थः ।

(१०) यथा यथार्थे यदव्ययं वर्तते तत्समस्यते ।

योग्यता, वीप्सा, पदार्थानतिवृत्तिः सादृश्यं चेति यथार्थाः। योग्यतायाम् - अनुरूपम् । रूपयोग्यं भवतीत्यर्थः । वीप्सायाम् - अर्थमर्थं प्रति प्रत्यर्थम्। पदार्थानतिवृत्तौ - यथाशक्ति ।

(११) आनुपूर्व्यम् अनुक्रमः । अनुज्येष्ठं प्रविशन्तु भवन्तः । ज्येष्ठानुपूर्व्येण भवन्तः प्रविशन्त्विवत्यर्थः ।

(१२) यौगपद्यम् एककालता । सचक्रं धेहि । युगपच्चक्रं धेहीत्यर्थः ।

(१३) सादृश्यम् तुल्यता । किमर्थमिदमुच्यते, यथार्थ इत्येव सिद्धम्? गुणभूतेऽपि सादृश्ये यथा स्यात् - सदृशः सख्या=ससखि ।

(१४) सम्पत्तिः अनुरूप आत्मभावः, समृद्धेरन्यः । सब्रह्म बाभ्रवाणाम्। सक्षत्रं शालङ्कायनानाम् ।

(१५) साकल्यम् - अशेषता । सतृणमभ्यवहरति, सबुसम् । न किञ्चिदभ्यवहार्य परित्यजतीत्ययमर्थोऽधिकार्थवचनेन प्रतिपाद्यते ।

(१६) अन्तवचने - 'अन्त' इति परिग्रहापेक्षया समाप्तिरुच्यते । साग्न्यधीते। सेष्टिपशुबन्धम् । पशुबन्धान्तमधीत इत्यर्थः । इयं समाप्तिरसकलेऽप्यध्ययने भवतीति साकल्यात् पृथगुच्यते ॥

३५८. यथाऽसादृश्ये ॥ ८ ॥ (६६१)

'यथा' इत्येतदव्ययमसादृश्ये वर्तमानं सुपा सह समस्यते, अव्ययीभावश्च समासो भवति। यथावृद्धं ब्राह्मणानामन्त्रयस्व । ये ये वृद्धाः यथावृद्धम् । यथाध्यापकम् ।

असादृश्ये इति किम्? यथा देवदत्तस्तथा यज्ञदत्तः (म. भा.) । यथार्थे यदव्ययमिति पूर्वेणैव सिद्धे समासे वचनमिदं सादृश्यप्रतिषेधार्थम् ॥

३५९. यावदवधारणे ॥ ८ ॥ (६६२)

'यावत्' इत्येतदव्ययमवधारणे वर्तमानं सुपा सह समस्यते, अव्ययीभावश्च समासो भवति। अवधारणम् इयत्तापरिच्छेदः यावदमत्रं ब्राह्मणानामन्त्रयस्व । यावन्ति पात्राणि संभवन्ति, पञ्च षड् वा, तावत् आमन्त्रयस्व ।

अवधारण इति किम्? यावद्दत्तं तावद् भुक्तम् । नावधारयामि कियन्मया भुक्तमिति ॥

३६०. सुप् प्रतिना मात्रार्थे ॥ ९ ॥ (६६३)

मात्रा=बिन्दुः, स्तोकम्, अल्पमिति पर्यायाः । मात्रार्थे वर्तमानेन प्रतिना सह सुबन्तं समस्यते, अव्ययीभावश्च समासो भवति । अस्त्यत्र किञ्चित् शाकं शाकप्रति । सूपप्रति ।

मात्रार्थ इति किम्? वृक्षं प्रति विद्योतते विद्युत् । सुबिति वर्तमाने पुनः सुब्ग्रहणमव्ययनिवृत्त्यर्थम् ।

३६१. अक्षशलाकासङ्ख्याः परिणा ॥ १० ॥ (६६४)

अक्षशब्दः, शलाकाशब्दः, संख्याशब्दाश्च परिणा सह समस्यन्ते, अव्ययीभावश्च समासो भवति । कितवव्यवहारे समासोऽयमिष्यते । पञ्चिका नाम द्यूतं पञ्चभिरक्षैः शलाकाभिर्वा भवति । तत्र यदा सर्वे उत्तानाः पतन्ति, अवाञ्चो वा तदा पातयिता जयति, तस्यैवैतस्य विपातोऽन्यथा पाते सति जायते । अक्षेणेदं न तथा वृत्तं यथा पूर्वं जये (म. भा.) - अक्षपरि, शलाकापरि, एकपरि, द्विपरि, त्रिपरि । परेण चतुष्परि ।

पञ्चसु त्वेकरूपासु जय एव भविष्यति ।
अक्षादयस्तृतीयान्ताः पूर्वोक्तस्य यथा न तत् ।
कितवव्यवहारे च एकत्वेऽक्षशलाकयोः ॥ (म. भा. २.१.१०)

३६२. विभाषा ॥ ११ ॥ (६६५)

'विभाषा' इत्ययमधिकारो वेदितव्यः (म.भा.) । यदित ऊर्ध्वमनुक्रमिष्यामस्तद्विभाषा भवति । वक्ष्यति - अपपरिबहिरञ्चवः पञ्चम्या (२.१.१२), अपत्रिगर्तं वृष्टो देवः, अप त्रिगर्तेभ्यः॥

३६३. अपपरिबहिरञ्चवः पञ्चम्या ॥ १२ ॥ (६६६)

अप, परि, बहिस्, अञ्चु - इत्येते सुबन्ताः पञ्चम्यन्तेन सह विभाषा समस्यन्ते, अव्ययीभावश्च समासो भवति । अपत्रिगर्त्तं वृष्टो देवः, अप त्रिगर्तेभ्यः। परित्रिगर्तम्, परि त्रिगर्तेभ्यः । बहिर्ग्रामम्, बहिर्ग्रामात् । प्राग्ग्रामम्, प्राग्ग्रामात् । बहिःशब्दयोगे पञ्चमीभावस्यैतदेव ज्ञापकम् ॥

३६४. आङ् मर्यादाभिविध्योः ॥ १३ ॥ (६६७)

'आङ्' इत्येतन्मर्यादायामभिविधौ च वर्तमानं पञ्चम्यन्तेन सह विभाषा समस्यते, अव्ययीभावश्च समासो भवति । आपाटलिपुत्रं वृष्टो देवः, आ पाटलिपुत्रात् । अभिविधौ - आकुमारं यशः पाणिनेः, आकुमारेभ्यः ॥

३६५. लक्षणेनाभिप्रती आभिमुख्ये ॥ १४ ॥ (६६८)

लक्षणम् चिह्नम्, तद्वाचिना सुबन्तेन सहाभिप्रती शब्दावाभिमुख्ये वर्तमानौ विभाषा समस्येते, अव्ययीभावश्च समासो भवति । अभ्यग्नि शलभाः पतन्ति, अग्निमभि । प्रत्यग्नि, अग्निं प्रति । अग्निं लक्ष्यीकृत्य अभिमुखं पतन्तीत्यर्थः।

लक्षणेनेति किम्? स्रुघ्नं प्रति गतः । प्रतिनिवृत्य स्रुघ्नमेवाभिमुखं गतः। अभिप्रती इति किम्? येनाग्निस्तेन गतः । आभिमुख्य इति किम्? अभ्यङ्का गावः, प्रत्यङ्का गावः । नवाङ्का इत्यर्थः ॥

३६६. अनुर्यत्समया ॥ १५ ॥ (६६९)

समया=समीपम् । अनुर्यस्य समीपवाची तेन लक्षणभूतेन सह विभाषा समस्यते, अव्ययीभावश्च समासो भवति । अनुवनमशनिर्गतः ।

अनुरिति किम्? वनं समया । यत्समयेति किम्? वृक्षमनु विद्योतते विद्युत् । ' अव्ययं ' विभक्तिसमीप (२.१.६) इत्येव सिद्धे पुनर्वचनं विभाषार्थम्॥

३६७. यस्य चायामः ॥ १६ ॥ (६७०)

' लक्षणेन' इति वर्तते । आयामः=दैर्घ्यम् । अनुर्यस्यायामवाची तेन लक्षणभूतेन सह विभाषा समस्यते, अव्ययीभावश्च समासो भवति । अनुगङ्गं वाराणसी (म. मा.) । अनुयमुनं मथुरा । यमुनाऽऽयामेन मथुराऽऽयामो लक्ष्यते।

आयाम इति किम्? वृक्षमनु विद्योतते विद्युत् ॥

३६८. तिष्ठद्गुप्रभृतीनि च ॥ १७ ॥ (६७१)

तिष्ठद्गवादयः समुदाया एव निपात्यन्ते । तिष्ठद्गुप्रभृतीनि शब्दरूपाणि अव्ययीभावसंज्ञकानि भवन्ति । तिष्ठद्गु कालविशेषः (म. भा.) । तिष्ठन्ति गावो यस्मिन्काले दोहनाय स तिष्ठद्गु कालः । खलेयवादीनि प्रथमान्तानि विभक्त्यन्तरेण न संबध्यन्ते, अन्यपदार्थे च काले वर्तन्ते । चकारोऽवधारणार्थः अपरः समासो न भवति - परमतिष्ठद्ग्विति।

तिष्ठद्गु । वहद्गु । आयतीगवम् । खलेयवम् । खलेबुसम् । लूनयवम्। लूयमानयवम्। पूतयवम् । पूयमानयवम् । संहृतयवम् । संह्रियमाणयवम् । संहृतबुसम् । संह्रियमाणबुसम् । एते कालशब्दाः ।

समभूमि । समपदाति । सुषमम् । विषमम् । निष्षमम् । दुष्षमम् । अपरसमम् । आयतीसमम् । प्राह्णम् । प्ररथम् । प्रमृगम् । प्रदक्षिणम् । अपरदक्षिणम् । सम्प्रति । असम्प्रति । पापसमम् । पुण्यसमम् । ' इच् कर्मव्यतीहारे' (५.४.१२७) - दण्डादण्डि । मुसलामुसलि ॥

३६९. पारे मध्ये षष्ठ्या वा ॥ १८ ॥ (६७२)

षष्ठीसमासे प्राप्ते तदपवादोऽव्ययीभाव आरभ्यते । वावचनाच्च षष्ठीसमासोऽपि पक्षेऽभ्यनुज्ञायते । पारमध्यशब्दौ षठ्यन्तेन सह विभाषा समस्येते, अव्ययीभावश्च समासो भवति । तत्सन्नियोगेन चानयोरेकारान्तत्वं निपात्यते । पारं गङ्गायाः=पारेगङ्गम् । मध्यं

गङ्गायाः=मध्येगङ्गम् । षष्ठीसमासपक्षे - गङ्गापारम्, गङ्गामध्यम् । महाविभाषया वाक्यविकल्पः क्रियते ॥

३७०. संख्या वंश्येन ॥ १९ ॥ (६७३)

विद्यया जन्मना वा प्राणिनामेकलक्षणसंतानो वंश इत्यभिधीयते । तत्र भवो=वंश्यः । तद्वाचिना सुबन्तेन सह संख्या समस्यते, अव्ययीभावश्च समासो भवति । द्वौ मुनी व्याकरणस्य वंश्यौ द्विमुनि व्याकरणस्य । त्रिमुनि =व्याकरणस्य ।

यदा तु विद्यया तद्वतामभेदविवक्षा तदा सामानाधिकरण्यं भवति - द्विमुनि व्याकरणम्, त्रिमुनि व्याकरणमिति । जन्मना - एकविंशति भारद्वाजम् ॥

३७१. नदीभिश्च ॥ २० ॥ (६७४)

'संख्या ' इत्यनुवर्तते । नदीवचनैः शब्दैः सह संख्या समस्यते, अव्ययीभावश्च समासो भवति । समाहारे चायमिष्यते । सप्तगङ्गम् । द्वियमुनम्। पञ्चनदम् । सप्तगोदावरम् ॥

३७२. अन्यपदार्थे च संज्ञायाम् ॥ २१ ॥ (६७५)

'संख्या ' इति निवृत्तम्, नदीग्रहणमनुवर्तते । नदीभिः सह सुबन्तमन्यपदार्थे वर्त्तमानं संज्ञायां विषये समस्यते, अव्ययीभावश्च समासो भवति । विभाषाधिकारेऽपि नित्यसमास एवायम् । न हि वाक्येन संज्ञा गम्यते । उन्मत्तगङ्गं नाम देशः । लोहितगङ्गम् । कृष्णगङ्गम् । शनैर्गङ्गम् ।

अन्यपदार्थ इति किम्? कृष्णवेण्णा । संज्ञायामिति किम्? शीघ्रगङ्गो देशः ॥

३७३. तत्पुरुषः ॥ २२ ॥ (६८४)

'तत्पुरुषः' इति संज्ञाऽधिक्रियते प्राग्बहुव्रीहेः (२.२.२३) । यानित ऊर्ध्वमनुक्रमिष्यामस्तत्पुरुषसंज्ञास्ते वेदितव्याः । वक्ष्यति - 'द्वितीया श्रितातीतपतित' (२.१.२४) इति, कष्टश्रितः । पूर्वाचार्यसंज्ञा चेयं महती, तदङ्गीकरणमुपाधेरपि तदीयस्य परिग्रहार्थम् - 'उत्तरपदार्थप्रधानस्तत्पुरुषः' (म. भा.) इति ।

तत्पुरुषप्रदेशाः - 'तत्पुरुषे कृति बहुलम् ' (३.३.१४) इत्येवमादयः॥

३७४. द्विगुश्च ॥ २३ ॥ (६८५)

द्विगुश्च समासस्तत्पुरुषसंज्ञो भवति । द्विगोस्तत्पुरुषत्वे समासान्ताः प्रयोजनम् (म. भा.) । पञ्चराजी, दशराजी । द्व्यहः, त्र्यहः । पञ्चगवम्, दशगवम् ॥

३७५. द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः ॥ २४ ॥ (६८६)

'सुप्' 'सुपा' इति वर्तते, तस्य विशेषणमेतद् द्वितीया । द्वितीयान्तं सुबन्तं श्रितादिभिः सह समस्यते, तत्पुरुषश्च समासो भवति । कष्टं श्रितः कष्टश्रितः। नरकश्रितः । अतीत - कान्तारमतीतः कान्तारातीतः ।

पतित - नरकं पतितः नरकपतितः । गत - ग्रामं गतः ग्रामगतः । अत्यस्त - तरङ्गानत्यस्तः तरङ्गात्यस्तः । तुहिनात्यस्तः । प्राप्त - सुखं प्राप्तः सुखप्राप्तः। आपन्न - सुखमापन्नः सुखापन्नः । दुःखापन्नः ।

श्रितादिषु गमिगाम्यादीनामुपसंख्यानम् (म. भा. २.१.२४ वा. १) । ग्रामं गमी ग्रामगमी। ग्रामं गामी ग्रामगामी । ओदनं बुभुक्षुः ओदनबुभुक्षुः ॥

३७६. स्वयं क्तेन ॥ २५ ॥ (६८७)

' स्वयम् ' एतदव्ययमात्मनेत्यस्यार्थे वर्त्तते, तस्य द्वितीयया सह सम्बन्धो नोपपद्यत इति द्वितीयाग्रहणमुत्तरार्थमनुवर्त्तते । स्वयम् इत्येतत्सुबन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति । स्वयंधौतौ पादौ । स्वयं विलीनमाज्यम् । ऎकपद्यमैकस्वर्यं च समासत्वाद्भवति॥

३७७. खट्वा क्षेपे ॥ २६ ॥ (६८८)

खट्वाशब्दो द्वितीयान्तः क्तान्तेन सह क्षेपे गम्यमाने समस्यते, तत्पुरुषश्च समासो भवति । क्षेपः=निन्दा, स च समासार्थ एव, तेन विभाषाधिकारेऽपि नित्यसमास एवायम् । न हि वाक्येन क्षेपो गम्यते । खट्वारोहणं चेह विमार्गप्रस्थानस्योपलक्षणम् । सर्व एवाविनीतः खट्वारूढ इत्युच्यते । खट्वारूढो जाल्मः । खट्वाप्लुतः । अपथप्रस्थित इत्यर्थः ।

क्षेप इति किम्? खट्वामारूढः ॥

३७८. सामि ॥ २७ ॥ (६८९)

' सामि ' इत्येतदव्ययमर्द्धशब्दपर्यायः, तस्यासत्त्ववाचित्वाद् द्वितीयया नास्ति सम्बन्धः। तत् सुबन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति । सामिकृतम् । सामिपीतम् । सामिभुक्तम् । ऐकपद्य मैकस्वर्यं च समासत्वाद्भवति ॥

३७९. कालाः ॥ २८ ॥ (६९०)

'द्वितीया' 'क्तेन' इति वर्तते । कालवाचिनः शब्दा द्वितीयान्ताः क्तान्तेन सह समस्यन्ते विभाषा, तत्पुरुषश्च समासो भवति । अनत्यन्तसंयोगार्थं वचनम्। कालाः इति न स्वरूपविधिः। षण्मुहूर्त्ताश्चराचराः, ते कदाचिदहर्गच्छन्ति, कदाचिद्रात्रिम् (म. भा.) । अहरतिसृता मुहूर्त्ताः अहस्संक्रान्ताः । रात्र्यतिसृता मुहूर्त्ताः रात्रिसंक्रान्ताः। मासप्रमितश्चन्द्रमाः । मासं प्रमातुमारब्धः प्रतिपच्चन्द्रमा इत्यर्थः ॥

३८०. अत्यन्तसंयोगे च ॥ २९ ॥ (६९१)

' कालाः ' इति वर्तते, ' क्तेन ' इति निवृत्तम् । अत्यन्तसंयोगः कृत्स्नसंयोगः कालस्य स्वेन सम्बन्धिना व्याप्तिः । कालवाचिनः शब्दा द्वितीयान्ता अत्यन्तसंयोगे गम्यमाने सुपा सह समस्यन्ते विभाषा, तत्पुरुषश्च समासो भवति । मुहूर्त्तं सुखम्=मुहूर्त्तसुखम् । सर्वरात्रकल्याणी । सर्वरात्रशोभना ॥

३८१. तृतीया तत्कृतार्थेन गुणवचनेन ॥ ३० ॥ (६९२)

'सुप्' 'सुपा' इति वर्तते, तस्य विशेषणमेतत्तृतीया । तृतीयान्तं सुबन्तं गुणवचनेनार्थशब्देन च सह समस्यते, तत्पुरुषश्च समासो भवति ।

कीदृशेन गुणवचनेन? तत्कृतेन तदर्थकृतेन; तृतीयान्तार्थकृतेनेति यावत् । शङ्कुलया खण्डः शङ्कुलाखण्डः । कितिकाणः । किरिकाणः । अर्थशब्देन - धान्येनार्थः, धान्यार्थः।

तत्कृतेनेति किम्? अक्ष्णा काणः । गुणवचनेति किम्? गोभिर्वपावान् (म. भा.) ॥

३८२. पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ॥ ३१ ॥ (६९३)

पूर्व, सदृश, सम, ऊनार्थ, कलह, निपुण, मिश्र, श्लक्ष्ण - एतैः सह तृतीयान्तं समस्यते, तत्पुरुषश्च समासो भवति । अस्मादेव वचनात् पूर्वादिभिर्योगे तृतीया भवति, हेतौ वा द्रष्टव्या। पूर्व - मासेन पूर्वः=मासपूर्वः, संवत्सरपूर्वः। सदृश - मातृसदृशः, पितृसदृशः। सम - मातृसमः, पितृसमः । ऊनार्थ - माषोनम्, कार्षापणोनम् । माषविकलम्, कार्षापणविकलम् । कलह -

असिकलहः, वाक्कलहः । निपुण - वाग्निपुणः, आचारनिपुणः । मिश्र - गुडमिश्रः, तिलमिश्रः। श्लक्ष्ण - आचारश्लक्ष्णः ॥

पूर्वादिष्ववरस्योपसंख्यानम् (म. भा. २.१.३० वा. १) । मासेनावरः= मासावरः। संवत्सरावरः ॥

३८३. कर्तृकरणे कृता बहुलम् ॥ ३२ ॥ (६९४)

'तृतीया' इति वर्तते । कर्तरि करणे च या तृतीया तदन्तं कृदन्तेन सह समस्यते बहुलम्, तत्पुरुषश्च समासो भवति । सर्वोपाधिव्यभिचारार्थं बहुलग्रहणम्। कर्तरि - अहिना हतः=अहिहतः । करणे - नखैर्निर्भिन्नो=नखनिर्भिन्नः । परशुना छिन्नः=परशुच्छिन्नः ।

कर्तृकरणे इति किम्? भिक्षाभिरुषितः । बहुलग्रहणं किम्? दात्रेण धान्यं लूनवान्, परशुना छिन्नवान् - इह समासो न भवति; पादहारकः, गलेचोपकः (म. भा.) इति च भवति॥

३८४. कृत्यैरधिकार्थवचने ॥ ३३ ॥ (६९५)

स्तुतिनिन्दाप्रयुक्तमध्यारोपितार्थवचनमधिकार्थवचनम् । कर्तृकरणयोर्या तृतीया तदन्तं सुबन्तं कृत्यैः सह समस्यतेऽधिकार्थवचने गम्यमाने विभाषा, तत्पुरुषश्च समासो भवति । कर्त्ता - काकपेया (३.१.९७) नदी । श्वलेह्यः (३.१.१२४) कूपः। करणम् - बाष्पच्छेद्यानि तृणानि । कण्टकसञ्चेय ओदनः। पूर्वस्यैवायं प्रपञ्चः।

कृत्यग्रहणे यण्ण्यतोर्ग्रहणं कर्त्तव्यम् । इह मा भूत् - काकैः पातव्या इति ।

३८५. अन्नेन व्यञ्जनम् ॥ ३४ ॥ (६९६)

'तृतीया' इति वर्तते । व्यञ्जनवाचि तृतीयान्तमन्नवाचिना सुबन्तेन सह समस्यते विभाषा, तत्पुरुषश्च समासो भवति । संस्कार्यमन्नम् संस्कारकं व्यञ्जनम् । दध्ना उपसिक्त ओदनः=दध्योदनः । क्षीरौदनः । वृत्तौ क्रियाया अन्तर्भावादन्नव्यञ्जनयोः सामर्थ्यम् ॥

३८६. भक्ष्येण मिश्रीकरणम् ॥ ३५ ॥ (६९७)

मिश्रीकरणवाचि तृतीयान्तं भक्ष्यवाचिना सुबन्तेन समस्यते, तत्पुरुषश्च समासो भवति। खरविशदमध्यवहार्यं भक्ष्यम्, तस्य संस्कारकं मिश्रीकरणम्। गुडेन मिश्रा धानाः=गुडधानाः । गुडपृथुकाः । वृत्तौ क्रियाया अन्तर्भावात्पूर्वोत्तरपदयोः सामर्थ्यम् ॥

३८७. चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ॥ ३६ ॥ (६९८)

' सुप् ' ' सुपा ' इति वर्तते, तस्य विशेषणमेतच्चतुर्थी । ' तत् ' इति सर्वनाम्ना चतुर्थ्यन्तस्यार्थः परामृश्यते । तस्मै इदं तदर्थम् । तदर्थ, अर्थ, बलि, हित, सुख, रक्षित - इत्येतैः सह चतुर्थ्यन्तं समस्यते, तत्पुरुषश्च समासो भवति । तदर्थेन प्रकृतिविकारभावे समासोऽयमिष्यते । यूपाय दारु =युपदारु । कुण्डलाय हिरण्यम्=कुण्डलहिरण्यम् ।

इह न भवति - रन्धनाय स्थाली, अवहननायोलूखलमिति । चतुर्थी चास्मादेव ज्ञापकात्तादर्थ्ये भवति ॥

अर्थेन नित्यसमासवचनम्, सर्वलिङ्गता च वक्तव्या (म. भा. २ १ ३६ वा. ४, ५) । ब्राह्मणार्थं पयः । ब्राह्मणार्था यवागूः (म. भा.) । बलि - कुबेराय बलिः=कुबेरबलिः । महाराजबलिः । हित गोहितम् । अश्वहितम् । सुख - गोसुखम् । अश्वसुखम् । रक्षित - गोरक्षितम् । अश्वरक्षितम् ॥

३८८. पञ्चमी भयेन ॥ ३७ ॥ (६९९)

' सुप् ' ' सुपा ' इति वर्त्तते, तस्य विशेषणमेतत्पञ्चमी । पञ्चम्यन्तं सुबन्तं भयशब्देन सुबन्तेन सह समस्यते विभाषा, तत्पुरुषश्च समासो भवति । वृकेभ्यो भयम्=वृकभयम् । चौरभयम् । दस्युभयम् ।

भयभीतभीतिभीभिरिति वक्तव्यम् (म. भा. २.१.३६ वा. १) । वृकेभ्यो भीतः=वृकभीतः । वृकभीतिः । वृकभीः । पूर्वस्यैवायं बहुलग्रहणस्य प्रपञ्चः। तथा च - ग्रामनिर्गतः, अधर्मजुगुप्सुरित्येवमादि सिद्धं भवति ॥

३८९. अपेतापोढमुक्तपतितापत्रस्तैरल्पशः ॥ ३८ ॥ (७००)

अपेत, अपोढ, मुक्त, पतित, अपत्रस्त - इत्येतैः सह पञ्चम्यन्तं समस्यते, तत्पुरुषश्च समासो भवति । अपेत - सुखापेतः । अपोढ - कल्पनापोढः । मुक्त - चक्रमुक्तः । पतित - स्वर्गपतितः । अपत्रस्त - तरङ्गापत्रस्तः । 'अल्पशः ' इति समासस्याल्पविषयतामाचष्टे । अल्पा पञ्चमी समस्यते, न सर्वा । प्रासादात्पतितः, भोजनादपत्रस्तः - इत्येवमादौ न भवति । ' कर्तृकरणे कृता बहुलम्' (२.१.३२) इत्यस्यैवायं प्रपञ्चः ॥

३९०. स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन ॥ ३९ ॥ (७०१)

स्तोक, अन्तिक, दूर - इत्येवमर्थाः शब्दाः कृच्छ्रशब्दश्च पञ्चम्यन्ताः क्तान्तेन सह समस्यन्ते, तत्पुरुषश्च समासो भवति । स्तोक - स्तोकान्मुक्तः। अन्तिक - अन्तिकादागतः ।

अभ्याशादागतः । दूरादागतः । विप्रकृष्टादागतः। कृच्छ्रान्मुक्तः । कृच्छ्रात्लब्धः । ' पञ्चम्याः स्तोकादिभ्यः' इत्यलुक् ॥

शतसहस्रौ परेणेति वक्तव्यम् । शतात्परे परश्शताः । सहस्त्रात्परे परस्सहस्राः। राजदन्तादित्वात् परनिपातः निपातनात् सुडागमः ॥

३९१. सप्तमी शौण्डैः ॥ ४० ॥ (७१७)

सप्तम्यन्तं शौण्डादिभिः सह समस्यते, तत्पुरुषश्च समासो भवति । अक्षेषु शौण्डः=अक्षशौण्डः । अक्षधूर्त्तः । अक्षकितवः ।

शौण्ड । धूर्त्त । कितव । व्याड । प्रवीण । संवीत । अन्तर् । अन्तःशब्दस्त्वत्राधिकरणप्रधान एव पठ्यते । अधिपटु । पण्डित । कुशल । चपल । निपुण । वृत्तौ प्रसक्तिक्रियाया अन्तर्भावादक्षादिषु अधिकरणे सप्तमी ॥

३९२. सिद्धशुष्कपक्वबन्धैश्च ॥ ४१ ॥ (७१८)

' सप्तमी ' इति वर्तते । सिद्ध, शुष्क, पक्व, बन्ध - इत्येतैः सह सप्तम्यन्तं समस्यते, तत्पुरुषश्च समासो भवति । सांकाश्यसिद्धः । काम्पिल्यसिद्धः। शुष्क - आतपशुष्कः । छायाशुष्कः । पक्व - स्थालीपक्वः । कुम्भीपक्वः । बन्ध - चक्रबन्धः । बहुलग्रहणस्यैवायमुदाहरणप्रपञ्चः ॥

३९३. ध्वाङ्क्षेण क्षेपे ॥ ४२ ॥ (७१९)

'ध्वाङ्क्षेण' इत्यर्थग्रहणम् । ध्वाङ्क्षवाचिना सह सप्तम्यन्तं सुबन्तं समस्यते, तत्पुरुषश्च समासो भवति, क्षेपे गम्यमाने । तीर्थे ध्वाङक्ष इव= तीर्थध्वाङ्क्षः।

अनवस्थित इत्यर्थः । तीर्थकाकः । तीर्थवायसः ।

क्षेपे इति किम्? तीर्थे ध्वाङ्क्षस्तिष्ठति ॥

३९४. कृत्यैऋणे ॥ ४३ ॥ (७२०)

'सप्तमी' इति वर्तते । कृत्यप्रत्ययान्तैः सह सप्तम्यन्तं समस्यते, तत्पुरुषश्च समासो भवति, ऋणे गम्यमाने । यत्प्रत्ययेनैवेष्यते । मासे देयमृणं =मासदेयम् । संवत्सरदेयम् । त्र्यहदेयम् ।

ऋणग्रहणं नियोगोपलक्षणार्थम्, तेनेहापि समासो भवति - पूर्वाह्णे गेयं साम । प्रातरध्येयोऽनुवाकः ।

ऋण इति किम्? मासे देया भिक्षा ।

३९५. संज्ञायाम् ॥ ४४ ॥ (७२१)

संज्ञायां विषये सप्तम्यन्तं सुपा सह समस्यते, तत्पुरुषश्च समासो भवति । संज्ञा समुदायोपाधिः । तेन नित्यसमास एवायम्, न हि वाक्येन संज्ञा गम्यते । अरण्येतिलकाः । अरण्येमाषाः । वनेकिंशुकाः । वनेबिल्वकाः । कूपेपिशाचकाः। 'हलदन्तात्सप्तम्याः संज्ञायाम्' इत्यलुक् ॥

३९६. क्तेनाहोरात्रावयवाः ॥ ४५ ॥ (७२२)

अहरवयवाः, रात्र्यवयवाश्च सप्तम्यन्ताः क्तान्तेन सह समस्यन्ते, तत्पुरुषश्च समासो भवति । पूर्वाह्णकृतम् । अपराह्णकृतम् । पूर्वरात्रकृतम् । अपररात्रकृतम्।

अवयवग्रहणं किम्? एतत्तु ते दिवा वृत्तं रात्रौ वृत्तं च द्रक्ष्यसि । अहनि भुक्तम् । रात्रौ वृत्तम् । बहुलग्रहणाद् रात्रिवृत्तम् , संन्ध्यागर्जितमित्यादयः ॥

३९७. तत्र ॥ ४६ ॥ (७२३)

'तत्र' इत्येतत् सप्तम्यन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति । तत्रभुक्तम्। तत्रकृतम् । तत्रपीतम् । ऐकपद्यमैकस्वर्यं च समासत्वाद् भवति ॥

३९८. क्षेपे ॥ ४७ ॥ (७२४)

क्षेपः=निन्दा । क्षेपे गम्यमाने सप्तम्यन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति । अवतप्तेनकुलस्थितं तवैतत् । चापलमेतत् । अनवस्थितत्वं तवैतदित्यर्थः । उदकेविशीर्णम् । प्रवाहेमूत्रितम् । भस्मनिहुतम् । निष्फलं यत्क्रियते तदेवमुच्यते । ' तत्पुरुषे कृति बहुलम् ' (६.३.१४) इत्यलुक् ॥

३९९. पात्रेसमितादयश्च ॥ ४८ ॥ (७२५)

समुदाया एव निपात्यन्ते । पात्रेसमितादयः शब्दास्तत्पुरुषसंज्ञा भवन्ति, क्षेपे गम्यमाने। ये चात्र क्तान्तेन सह समासास्तेषां पूर्वेणैव सिद्धे पुनः पाठो युक्तारोह्यादिपरिग्रहार्थः - पूर्वपदाद्युदात्तत्वं यथा स्यादिति । युक्तारोह्यादिषु हि पात्रेसमिताः । पठ्यन्ते । पात्रेबहुलाः । अवधारणेन क्षेपो गम्यते - पात्रे एव समिता न पुनः क्वचित्कार्य इति । उदुम्बरमशकादिषु

उपमया क्षेपः । मातरिपुरुष इति प्रतिषिद्धसेवनेन । पिण्डीशूरादिषु निरीहतया । अव्यक्तत्वाच्चाकृतिगणोऽयम्।

पात्रेसमिताः । पात्रेबहुलाः । उदुम्बरमशकाः । उदरक्रिमिः । कूपकच्छपः। कूपचूर्णकः । अवटकच्छपः । कूपमण्डूकः । कुम्भमण्डूकः । उदपानमण्डूकः। नगरकाकः । नगरवायसः । मातरिपुरुषः । पिण्डीशूरः । गेहेशूरः । गेहेनर्दी । गेहेक्ष्वेडी । गेहेविजिती । गेहेव्याडः । गेहेदृप्तः। गेहेधृष्टः । गर्भेतृप्तः । आखनिकबकः । गोष्ठेशूरः । गोष्ठेविजिती । गोष्ठेक्ष्वेडी । गेहेमेही। गोष्ठेपटुः । गोष्ठेपण्डितः । गोष्ठेप्रगल्भः । कर्णेटिट्टिभः । कर्णेचुरचुरा । चकारोऽवधारणार्थः, तेन समासान्तरं न भवति परमपात्रेसमिता इति ।

४००. पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन ॥ ४९ ॥ (७२६)

'सुप्' 'सुपा' इति वर्त्तते, तस्य विशेषणमेतत् । पूर्वकाल, एक, सर्व, जरत्, पूराण, नव, केवल इत्येते सुबन्ताः समानाधिकरणेन सुपा सह समस्यन्ते, तत्पुरुषश्च समासो भवति । भिन्नप्रवृत्तिनिमित्तस्य शब्दस्यैकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम् । 'पूर्वकाल' इत्यर्थनिर्देशः, परिशिष्टानां स्वरूपग्रहणम् । पूर्वकालोऽपरकालेन समस्यते । स्नातानुलिप्तः । कृष्टसमीकृतम् । दग्धप्ररूढम्। एकशाटी । एकभिक्षा । सर्वदेवाः । सर्वमनुष्याः । जरद्धस्ती । जरद्गृष्टिः । जरद्वृत्तिः। पुराणान्नम् । पुराणावसथम् । नवान्नम् । नवावसथम् । केवलान्नम्।

समानाधिकरणेनेति किम्? एकस्याः शाटी ।

४०१. दिक्संख्ये संज्ञायाम् ॥ ५० ॥ (७२७)

'समानाधिकरणेन' इत्यापादसमाप्तेरनुवर्त्तते । दिग्वाचिनः शब्दाः संख्या च समानाधिकरणेन सुबन्तेन सह समस्यन्ते, तत्पुरुषश्च समासो भवति, संज्ञायां विषये । पूर्वेषुकामशमी । अपरेषुकामशमी । संख्या - पञ्चाम्राः । सप्तर्षयः।

संज्ञायामिति किम्? उत्तरा वृक्षाः । पञ्च ब्राह्मणाः ॥

४०२. तद्धितार्थोत्तरपदसमाहारे च ॥ ५१ ॥ (७२८)

' दिक्संख्ये ' इत्यनुवर्त्तते । तद्धितार्थे विषये उत्तरपदे च परतः समाहारे चाभिधेये दिक्संख्ये समानाधिकरणेन सुपा सह समस्येते, तत्पुरुषश्च समासो भवति ।

तद्धितार्थे तावत् - पूर्वस्यां शालायां भवः । 'दिक्पूर्वपदादसंज्ञायां ञः' [४/२/१०७], पौर्वशालः, आपरशालः । उत्तरपदे - पूर्वशालाप्रियः, अपरशालाप्रियः। समाहारे दिक्शब्दो न संभवति । संख्या, तद्धितार्थे पाञ्चनापितिः। उत्तरपदे पञ्चगवधनः, दशगवधनः ।

समाहारे - पञ्चपूली, दशपूली ।

पञ्चकुमारि, दशकुमारि । 'स नपुंसकम्' [२/४/१७] इति नपुंसकत्वम्, ' ह्रस्वो नपुंसके प्रातिपदिकस्य ' [२/३/४७] इति ह्रस्वत्वम् ॥

४०३. संख्यापूर्वो द्विगुः ॥ ५२ ॥ (७३१)

' तद्धितार्थोत्तरपदसमाहारे च ' [२/१/५१] इत्यत्र यः संख्यापूर्वः समासः स द्विगुसंज्ञो भवति ।

तद्वितार्थे तावत् - पञ्चसु कपालेषु संस्कृतः पञ्चकपालः, दशकपालः। 'संस्कृतं भक्षाः' [४/२/१६] इतीहाण्, तस्य ' द्विगोर्लुगनपत्ये ' [४/२/८८] इति लुक् ।

उत्तरपदे - पञ्चनावप्रियः । ' नावो द्विगोः ' [५/४/९९] इति समासान्तो भवति ।

समाहारे - पञ्चमूली । ' द्विगोः' [४/१/२१] इति ङीब् भवति । द्विगुप्रदेशाः - ' द्विगोः' इत्येवमादयः ॥

४०४. कुत्सितानि कुत्सनैः ॥ ५३ ॥ (७३२)

कुत्सितवाचीनि सुबन्तानि कुत्सनवचनैः सुबन्तैः सह समस्यन्ते, तत्पुरुषश्च समासो भवति । शब्दप्रवृत्तिनिमित्तकुत्सायामयं समास इष्यते । ' विशेषणं विशेष्येण' [२/१/५७] इति परनिपाते प्राप्ते विशेष्यस्य पूर्वनिपातार्थ आरम्भः। वैयाकरणखसूचिः । निष्प्रतिभ इत्यर्थः । याज्ञिककितवः । अयाज्ययाजनतृष्णापर उच्यते । मीमांसकदुर्दुरूढः । नास्तिकः ।

कुत्सितानीति किम्? वैयाकरणश्चौरः । न ह्यत्र वैयाकरणत्वं कुत्स्यते । कुत्सनैरिति किम्? कुत्सितो ब्राह्मणः ।

४०५. पापाणके कुत्सितैः ॥ २४ ॥ (७३३)

पापाणकशब्दौ कुत्सनाभिधायिनौ, तयोः पूर्वेण समासे परनिपातः प्राप्तः पूर्वनिपातार्थमिदमारभ्यते । पाप, अणक - एते सुबन्ते कुत्सितवचनैः सह समस्येते, तत्पुरुषश्च समासो भवति । पापनापितः, पापकुलालः । अणकनापितः, अणककुलालः॥

४०६. उपमानानि सामान्यवचनैः ॥ ५५ ॥ (७३४)

उपमीयतेऽनेनेत्युपमानम् । उपमानवाचीनि सुबन्तानि सामान्यवचनैः सुबन्तैः सह समस्यन्ते, तत्पुरुषश्च समासो भवति । उपमानोपमेययोः साधारणो धर्मः सामान्यम्, तद्विशिष्टोपमेयवचनैरयं समासः । शस्त्रीव श्यामा शस्त्रीश्यामा देवदत्ता । कुमुदश्येनी । हंसगद्गदा। न्यग्रोधपरिमण्डला ।

उपमानानीति किम्? देवदत्ता श्यामा ।

सामान्यवचनैरिति किम्? फाला इव तण्डुलाः । पर्वता इव बलाहकाः ॥

४०७. उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ॥ ५६ ॥ (७३५)

उपमेयम् उपमितम्, तद्वाचि सुबन्तं व्याघ्रादिभिः सामर्थ्यादुपमानवचनैः सह समस्यते, तत्पुरुषश्च समासो भवति, न चेत्सामान्यवाची शब्दः प्रयुज्यते। ' विशेषणं विशेष्येण ' [२/१/५७] इति परनिपाते प्राप्ते विशेष्यस्य पूर्वनिपातार्थ आरम्भः । पुरुषोऽयं व्याघ्र इव - पुरुषव्याघ्रः । पुरुषसिंहः ।

सामान्याप्रयोग इति किम्? पुरुषोऽयं व्याघ्र इव शूरः ।

व्याघ्र । सिंह । ऋक्ष । ऋषभ । चन्दन । वृक्ष । वृष । वराह । हस्तिन् । कुञ्जर । रुरु । पृषत । पुण्डरीक । बलाहक । आकृतिगणश्चायम् । तेनेदमपि भवति - मुखपद्मम्, मुखकमलम्, करकिशलयम्, पार्थिवचन्द्र इत्येवमादि ॥

४०८. विशेषणं विशेष्येण बहुलम् ॥ ५७ ॥ (७३६)

भेदकम् विशेषणम्, भेद्यम् विशेष्यम् । विशेषणवाचि सुबन्तं विशेष्यवाचिना समानाधिकरणेन सुबन्तेन सह बहुलं समस्यते, तत्पुरुषश्च समासो भवति । नीलोत्पलम्। रक्तोत्पलम् । बहुलवचनं व्यवस्थार्थम् । क्वचिन्नित्यसमास एव -कृष्णसर्पः, लोहितशालिः । क्वचिन्न भवत्येव - रामो जामदग्न्यः, अर्जुनः कार्त्तवीर्यः। क्वचिद्विकल्पः - नीलमुत्पलम्, नीलोत्पलम् ।

विशेषणमिति किम्? तक्षकः सर्पः । विशेष्येणेति किम्? लोहितस्तक्षकः॥

४०९. पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च ॥ ५८ ॥ (७३७)

पूर्व, अपर, प्रथम, चरम, जघन्य, समान, मध्य, मध्यम, वीर - इत्येते सुबन्ताः समानाधिकरणेन सुपा सह समस्यन्ते, तत्पुरुषश्च समासो भवति । पूर्वपुरुषः। अपरपुरुषः ।

प्रथमपुरुषः । चरमपुरुषः । जघन्यपुरुषः । समानपुरुषः। मध्यपुरुषः। मध्यमपुरुषः । वीरपुरुषः। पूर्वस्यैवायं प्रपञ्चः ।

४१०. श्रेण्यादयः कृतादिभिः ॥ ५९ ॥ (७३८)

श्रेण्यादयः सुबन्ताः कृतादिभिः समानधिकरणेः सह समस्यन्ते । तत्पुरुषश्च समासो भवति । श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यम् (म.भा.२.१.५८ वा.१) । अश्रेणयः श्रेणयः कृता श्रेणिकृताः । एककृताः । श्रेण्यादयः पठ्यन्ते । कृतादिराकृतिगणः। च्व्यन्तानां तु ' कुगतिप्रादयः ' इत्यनेन नित्यसमासः । श्रेणीकृताः ।

श्रेणि । एक । पूग । कुण्ड । राशि । विशिख । निचय । निधान । इन्द्र। देव । मुण्ड। भूत । श्रवण । वदान्य । अध्यापक । ब्राह्मण । क्षत्रिय । पटु । पण्डित । कुशल । चपल । निपुण । कृपण । इति श्रेण्यादिः ॥

कृत । मित । मत । भूत । उक्त । समाज्ञात । समाम्नात । समाख्यात । संभावित। अवधारित । निराकृत । अवकल्पित । उपकृत । उपाकृत । इति कृतादिः॥

४११. क्तेन नञ्विशिष्टेनानञ् ॥ ६० ॥ (७३९)

नञैव विशेषो यस्य सर्वमन्यत्प्रकृत्यादिकं तुल्यं तन्नञ्विशिष्टम्, तेन नञ्विशिष्टेन क्तान्तेन समानाधिकरणेन सह अनञ् क्तान्तं समस्यते, तत्पुरुषश्च समासो भवति । कृतं च तदकृतं च=कृताकृतम् । भुक्ताभुक्तम् । पीतापीतम्। उदितानुदितम् । नुडिटौ तद्भक्तत्वान्नैव भेदकौ । अशितानशितेन जीवति । क्लिष्टाक्लिशितेन वर्त्तते ।

कृतापकृतादीनामुपसंख्यानम् (म. भा. २.१.६० वा. ४) । कृतापकृतम्। भुक्तविभुक्तम् । पीतविपीतम् । गतप्रत्यागतम् । यातानुयातम् । क्रयाक्रयिका । पुटापुटिका । फलाफलिका । मानोन्मानिका ॥

समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च (म. भा. २.१.६९ वा. ६) । शाकप्रधानः पार्थिवः शाकपार्थिवः । कुतपसौश्रुतः। अजातौल्वलिः॥

४१२. सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ॥ ६१ ॥ (७४०)

सत्, महत्, परम, उत्तम, उत्कृष्ट - इत्यते पूज्यमानैः सह समस्यन्ते, तत्पुरुषश्च समासो भवति । ' पूज्यमानैः ' इति वचनात् पूजावचनाः सदादयो विज्ञायन्ते । सत्पुरुषः । महापुरुषः । परमपुरुषः । उत्तमपुरुषः । उत्कृष्टपुरुषः।

पूज्यमानैरिति किम्? उत्कृष्टा गौः कर्द्दमात् ॥

४१३. वृन्दारकनागकुञ्जरैः पूज्यमानम् ॥ ६२ ॥ (७४१)

वृन्दारक, नाग, कुञ्जर - इत्येतैः सह पूज्यमानवाचि सुबन्तं समस्यते, तत्पुरुषश्च समासो भवति । ' पूज्यमानम् ' इति वचनाद् वृन्दारकादयः पूजावचना गृह्यन्ते । गोवृन्दारकः, अश्ववृन्दारकः । गोनागः, अश्वनागः । गोकुञ्जरः, अश्वकुञ्जरः।

पूज्यमानमिति किम्? सुषीमो नागः ॥

४१४. कतरकतमौ जातिपरिप्रश्ने ॥ ६३ ॥ (७४२)

कतरकतमौ जातिपरिप्रश्ने वर्त्तमानौ समर्थेन सुपा सह समस्येते, तत्पुरुषश्च समासो भवति । कतरकठः । कतरकलापः । कतमकठः । कतमकलापः ।

ननु कतमशब्दस्तावज्जातिपरिप्रश्न एव व्युत्पादितः, कतरशब्दोऽपि साहचर्यात्तदर्थवृत्तिरेव ग्रहीष्यते, किं जातिपरिप्रश्नग्रहणेन? एवं तर्ह्येतज्ज्ञापयति - कतमशब्दोऽन्यत्रापि वर्त्तत इति । तथा च प्रत्युदाहरणम् - कतरो भवतोर्देवदत्तः। कतमो भवतां देवदत्तः ॥

४१५. किं क्षेपे ॥ ६४ ॥ (७४३)

' किम् ' इत्येतत् क्षेपे गम्यमाने सुपा सह समस्यते, तत्पुरुषश्च समासो भवति । किंराजा, यो न रक्षति । किंसखा, योऽभिद्रुह्यति । किंगौः, यो न वहति। ' किमः क्षेपे ' [४/५/७०] इति समासान्तो न भवति ।

क्षेपे इति किम्? को राजा पाटलिपुत्रे ॥

४१६. पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहब्दष्कयणी-प्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः ॥ ६५ ॥ (७४४)

उभयव्यञ्जना ' पोटा ' इत्यभिधीयते । गृष्टिः एकवारप्रसूता । धेनुः प्रत्यग्रप्रसूता । वशा वन्ध्या । वेहद् गर्भपातिनी । बष्कयणी तरुणवत्सा । पोटादिभिः सह जातिवाचि सुबन्तं समस्यते, तत्पुरुषश्चसमासो भवति । इभपोटा । इभयुवतिः । अग्निस्तोकः। उदश्वित्कतिपयम् । गोगृष्टिः । गोधेनुः। गोवशा । गोवेहत् । गोबष्कयणी । कठप्रवक्ता । कठश्रोत्रियः । कठाध्यापकः। कठधूर्त्तः । जातिरिति किम्? देवदत्तः प्रवक्ता । धूर्त्तग्रहणमकुत्सार्थम् ॥

४१७. प्रशंसावचनैश्च ॥ ६६ ॥ (७४७)

' जातिः ' इति वर्त्तते । जातिवाचि सुबन्तं प्रशंसावचनैः सह समस्यते, तत्पुरुषश्च समासो भवति । रूढिशब्दाः प्रशंसावचना गृह्यन्ते मतल्लिकादयः, ते चाविष्टलिङ्गत्वादन्यलिङ्गेऽपि जातिशब्दे स्वलिङ्गोपादाना एव समानाधिकरणा भवन्ति । गोप्रकाण्डम् । अश्वप्रकाण्डम् । गोमतल्लिका । अश्वमतल्लिका । गोमचर्च्चिका । अश्वमचर्चिका।

जातिरिति किम्? कुमारी मतल्लिका ॥

४१८. युवा खलतिपलितवलिनजरतीभिः ॥ ६७ ॥ (७८७)

खलत्यादिभिः समानाधिकरणैः सह युवशब्दः समस्यते, तत्पुरुषश्च समासो भावति । 'जरतीभिः' इति स्त्रीलिङ्गेन निर्देशः ' प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति ज्ञापनार्थः । युवा खलतिः=युवखलतिः । युवतिः खलती युवखलती । युवा पलितः युवपलितः । युवतिः पलिता युवपलिता । युवा वलिनः युववलिनः । युवतिर्वलिना युववलिना । युवा जरन् युवजरन् । युवतिर्जरती युवजरती ॥

४१९. कृत्यतुल्याख्या अजात्या ॥ ६८ ॥ (७४९)

कृत्यप्रत्ययान्तास्तुल्यपर्यायाश्च सुबन्ता अजातिवचनेन समस्यन्ते, तत्पुरुषश्च समासो भवति भोज्योष्णम् । भोज्यलवणम् । पानीयशीतम् । तुल्याख्याः - तुल्यश्वेतः । तुल्यमहान् । सदृशश्वेतः । सदृशमहान् ।

अजात्येति किम्? भोज्य ओदनः ॥

४२०. वर्णो वर्णेन ॥ ६९ ॥ (७५०)

वर्णविशेषवाचि सुबन्तं वर्णविशेषवाचिना सुबन्तेन समानाधिकरणेन सह समस्यते, तत्पुरुषश्च समासो भवति । कृष्णसारङ्गः । लोहितसारङ्गः । कृष्णशबलः। लोहितशबलः । अवयवद्वारेण कृष्णशब्दः समुदाये वर्त्तमानः समानाधिकरणो भवति ॥

४२१. कुमारः श्रमणादिभिः ॥ ७० ॥ (७५२)

कुमारशब्दः श्रमणादिभिः सह समस्यते, तत्पुरुषश्च समासो भवति । येऽत्र स्त्रीलिङ्गाः पठ्यन्ते - श्रमणा प्रव्रजिता कुलटेत्येवमादयस्तैः सह स्त्रीलिङ्गः एव कुमारशब्दः समस्यते । ये

तु पुँल्लिङ्गा अध्यापकोऽभिरूपकः पण्डित इति, तैरुभयथा; ' प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ' (व्या. परि. २५) इति । कुमारी श्रमणा=कुमारश्रमणा ।

श्रमणा । प्रव्रजिता । कुलटा । गर्भीणी । तापसी । दासी । बन्धकी । अध्यापक । अभिरूपक । पण्डित । पटु । मृदु । कुशल । चपल । निपुण ॥

४२२. चतुष्पादो गर्भिण्या ॥ ७१ ॥ (७५३)

चतुष्पाद्वाचिनः सुबन्ता गर्भिणीशब्देन समस्यन्ते, तत्पुरुषश्च समासो भवति । गोगर्भिणी । अजागर्भिणी ॥

चतुष्पाज्जातिरिति वक्तव्यम् (म. भा. २.१.७० वा. १) । इह मा भूत् - कालाक्षी गर्भिणी। स्वस्तिमती गर्भिणी । चतुष्पाद इति किम् ? ब्राह्मणी गर्भिणी ॥

४२३. मयूरव्यंसकादयश्च ॥ ७२ ॥ (७५४)

समुदाया एव निपात्यन्ते । मयूरव्यंसकादयः शब्दास्तत्पुरुषसंज्ञा भवन्ति। चकारोऽवधारणार्थः परममयूरव्यंसक इति समासान्तरं न भवति । मयूरव्यंसकः। छात्रव्यंसकः । काम्बोजमुण्डः । यवनमुण्डः । छन्दसि - हस्तेगृह्य । पादेगृह्य । लाङ्गलेगृह्य। पुनर्दाय ॥

एहीडादयोऽन्यपदार्थे । एहीडम्, एहियवं वर्त्तते । एहिवाणिजा क्रिया । अपेहिवाणिजा, प्रेहिवाणिजा । एहिस्वागता, अपेहिस्वागता, प्रेहिस्वागता । एहिद्वितीया, अपेहिद्वितीया । इहवितर्का । प्रोहकटा, अपोहकटा । प्रोहकर्दमा, अपोहकर्दमा । उद्धरचूडा । आहरचेला । आहरवसना । आहरवनिता । कृन्त विचक्षणा । उद्धरोत्सृजा । उद्धमविधमा । उत्पचविपचा । उत्पतनिपता । उच्चावचम् । उच्चनीचम् । अचितोपचितम् । अवचितपराचितम् । निश्चप्रचम्। अकिञ्चनम् । स्नात्वाकालकः । पीत्वास्थिरक । भुक्त्वासुहितः । प्रोष्यपापीयान् । उत्पत्यपाकला । निपत्यरुहिणी । निषाण्णश्यामा । अपेहिप्रसवा । इहपञ्चमी । इहद्वितीया ।

जहि कर्मणा बहुलमाभिक्ष्ण्ये कर्त्तारं चाभिदधाति । जहिजोडः । उज्जहिजोडः । जहिस्तम्बः । उज्जहिस्तम्बः ॥

आख्यातमाख्यातेन क्रियासातत्ये । अश्नीतपिबता । पचतभृज्जता । खादतमोदता। खादताचमता ।

आहरनिवपा । आवपनिष्किरा । उत्पचविपचा । भिन्धिलवणा । छिन्धिविचक्षणा । पचलवणा । पचप्रकूटा । अविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः॥

॥ इति श्रीजयादित्यविरचितायां काशिकायां
वृत्तौ द्वितीयाध्यायस्य प्रथमः पादः ॥

अथ द्वितीयाध्याये
द्वितीयः पादः

४२४. पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे ॥ १ ॥ (७१२)

एकदेशोऽस्यास्तीत्येकदेशी अवयवी, तद्वाचिना सुबन्तेन सह पूर्व, अपर, अधर, उत्तरशब्दाः सामर्थ्यादेकदेशवचना समस्यन्ते, तत्पुरुषश्च समासो भवति । एकाधिकरणग्रहणमेकदेशिनो विशेषणम् । एकं चेदधिकरण-मेकद्रव्यमेकदेशि भवति । षष्ठीसमासापवादोऽयं योगः । पूर्वं कायस्य=पूर्वकायः। अपरकायः । अधरकायः । उत्तरकायः ।

एकदेशिनेति किम्? पूर्वं नाभेः कायस्य । एकाधिकरण इति किम्? पूर्वं छात्राणामामन्त्रय । कथं मध्याह्नः, सायाह्न इति? ' संख्याविसायपूर्वस्याह्नस्य' इति ज्ञापकात् । सर्वेणैकदेशशब्देनाह्नः समासो भवति ॥

४२५. अर्द्धं नपुंसकम् ॥ २ ॥ (७१३)

' एकदेशिनैकाधिकरणे ' इति वर्त्तते । समप्रविभागेऽर्धशब्दो नपुंसकमाविष्टलिङ्गः, तस्येदं ग्रहणम्। ' अर्द्धम्' इत्येतद् नपुंसकमेकदेशिनैकाधिकरणेन समस्यते, तत्पुरुषश्च समासो भवति । षष्ठीसमासापवादोऽयं योगः । अर्द्धं पिप्पल्याः अर्द्धपिप्पली । अर्द्धकोशातकी ।

नपुंसकमिति किम्? ग्रामार्द्धः । नगरार्द्धः । एकदेशिनेत्येव - अर्द्धं पशोर्देवदत्तस्य देवदत्तेन सह समासो न भवति । ' एकाधिकरणे ' इत्येव - अर्द्धं पिप्पलीनाम् ॥

४२६. द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् ॥ ३ ॥ (७१४)

' एकदेशिनैकाधिकरणे ' इति वर्त्तते । षष्ठीसमासापवादोऽयं योगः । अन्यतरस्यांग्रहणात् षष्ठीसमासोऽपि भवति । ' पूरणगुण' (२.२.११) इति प्रतिषेधश्चात एवान्यतरस्यांग्रहणसामर्थ्यान्न प्रवर्त्तते । द्वितीयादीनि शब्दरूपाणि एकदेशिनैकाधिकरणेन सहान्यतरस्यां समस्यन्ते, तत्पुरुषश्च समासो भवति । द्वितीयं भिक्षायाः=द्वितीयभिक्षा ।

षष्ठीसमासपक्षे - भिक्षाद्वितीयं वा । तृतीयं भिक्षायाः=तृतीयभिक्षा । भिक्षातृतीयं वा । चतुर्थं भिक्षायाः=चतुर्थभिक्षा । भिक्षाचतुर्थं वा । तुर्य भिक्षायाः=तुर्यभिक्षा । भिक्षातुर्यं वा ।

तुरीयशब्दस्यापीष्यते । तुरीयं भिक्षायाः=तुरीयभिक्षा । भिक्षातुरीयं वा ।

एकदेशिनेत्येव - द्वितीयं भिक्षाया भिक्षुकस्य । एकाधिकरण इत्येव - द्वितीयं भिक्षाणाम्।

४२७. प्राप्तापन्ने च द्वितीयया ॥ ४ ॥ (७१५)

एकदेशिनैकाधिकरणे इति निवृत्तम् । द्वितीयासमासे प्राप्ते वचनमिदम् । समासविधानात्सोऽपि भवति । प्राप्त, आपन्न - इत्येतौ द्वितीयान्तेन सह समस्येते, तत्पुरुषश्च समासो भवति । प्राप्तो जीविकां=प्राप्तजीविकः, जीविकाप्राप्त इति वा । आपन्नो जीविकाम्=आपन्नजीविकः, जीविकापन्न इति वा ।

४२८. कालाः परिमाणिना ॥ ५ ॥ (७१६)

परिमाणमस्यास्तीति परिमाणी, तद्वाचिना सुबन्तेन सह सामर्थ्यात्परि-माणवचनाः कालशब्दाः समस्यन्ते, तत्पुरुषश्च समासो भवति । षष्ठीसमासविषये योगारम्भः । मासो जातस्य=मासजातः । संवत्सरजातः । द्यहजातः । त्र्यहजातः॥

४२९. नञ् ॥ ६ ॥ (७५६)

नञ् समर्थेन सुबन्तेन सह समस्यते, तत्पुरुषश्च समासो भवति । न ब्राह्मणः=अब्राह्मणः। अवृषलः ।

नञो नलोपस्तिङि क्षेपे । अपचसि त्वं जाल्म ॥

४३०. ईषदकृता ॥ ७ ॥ (७५५)

'ईषत् ' इत्ययं शब्दोऽकृदन्तेन सुपा सह समस्यते, तत्पुरुषश्च समासो भवति ।

ईषद् गुणवचनेनेति वक्तव्यम् (म. भा. २.२.७ वा. १) । ईषत्कडारः। ईषत्पिङ्गलः । ईषद्विकटः । ईषदुन्नतः । ईषत्पीतम् । ईषद्रक्तम् ।

गुणवचनेनेति किम्? इह न भवति - ईषद् गार्ग्यः ॥

४३१. षष्ठी ॥ ८ ॥ (७०२)

षठ्यन्तं सुबन्तं समर्थेन सुबन्तेन सह समस्यते, तत्पुरुषश्च समासो भवति । राज्ञः पुरुषः=राजपुरुषः । ब्राह्मणकम्बलः ।

कृद्योगा च षष्ठी समस्यत इति वक्तव्यम् (म. भा. २.२.८ वा. १) । इध्मप्रव्रश्चनः । पलाशशातनः । किमर्थमिदमुच्यते? ' प्रतिपदविधाना च षष्ठी न समस्यते ' इति वक्ष्यति, तस्यायं पुरस्तादपकर्षः ॥

४३२. याजकादिभिश्च ॥ ९ ॥ (७०३)

पूर्वेण समासः सिद्ध एव, तस्य ' कर्तरि च ' (२/२/१६) इति प्रतिषेधे प्राप्ते वचनमिदमारभ्यते प्रतिप्रसवार्थम् । याजकादिभिः सह षष्ठी समस्यते, तत्पुरुषश्च समासो भवति। ब्राह्मणयाजकः । क्षत्रियययाजकः ।

याजक । पूजक । परिचारक । परिषेचक । स्नातक । अध्यापक । उत्सादक । उद्वर्त्तक। होतृ । पोतृ । भर्तृ । रथगणक । पत्तिगणक । तत्स्थैश्च गुणैः षष्ठी समस्यत इति वक्तव्यम् (म. भा. २.२.९ वा. २) । चन्दनगन्धः। कपित्थरसः ।

गुणात्तरेण तरलोपश्चेति वक्तव्यम् । सर्वेषां श्वेततरः=सर्वश्वेतः, सर्वेषां महत्तरः=सर्वमहान्; ' न निधरिणे ' (२/२/१०) इति प्रतिषेधे प्राप्ते वचनमिदम् । सर्वशुक्ला गौः॥

४३३. न निर्धारणे ॥ १० ॥ (७०४)

पूर्वेण समासे प्राप्ते प्रतिषेध आरभ्यते । निर्धरणे या षष्ठी सा न समस्यते । जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणम् । क्षत्रियो मनुष्याणां शूरतमः । कृष्णा गवां सम्पन्नक्षीरतमा । धावन्नध्वगानां शीघ्रतमः ।

प्रतिपदविधाना च षष्ठी न समस्यत इति वक्तव्यम् (म. भा. २.२.१० वा. १)। सर्पिषो ज्ञानम् । मधुनो ज्ञानम् ॥

४३४. पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन ॥ ११ ॥ (७०५)

पूरण, गुण, सुहितार्थ, सद्, अव्यय, तव्य, समानाधिकरण - इत्येतैः सह षष्ठी न समस्यते । अर्थशब्दः प्रत्येकमभिसंबध्यते, तेन स्वरूपविधिर्न भवति । पूरणार्थे - छात्राणां पञ्चमः । छात्राणां दशमः । गुण - बलाकायाः शौक्ल्यम् । काकस्य काष्ण्यम् । सुहितार्थाः=तृप्त्यर्थाः । फलानां सुहितः । फलानां तृप्तः । सत् - ब्राह्मणस्य कुर्वन् ।

ब्राह्मणस्य कुर्वाणः । अव्यय - ब्राह्मणस्य कृत्वा । ब्राह्मणस्य हृत्वा । तव्य - ब्राह्मणस्य कर्तव्यम् ।

तव्यता सानुबन्धकेन समासो भवत्येव - ब्राह्मणकर्त्तव्यम् । समानाधिकरण - शुकस्य मारावदिस्य, राज्ञः पाटलिपुत्रकस्य, पाणिनेः सूत्रकारस्य । किं च स्यात्? पूर्वनिपातस्यानियमः स्यात् । अनन्तरायां तु प्राप्तौ प्रतिषिद्धायां विशेषणं विशेष्येण (२/१/५७) इति भवत्येव समासः। पूर्वनिपातश्च तदा नियोगतो विशेषणस्यैव ॥

४३५. क्तेन च पूजायाम् ॥ १२ ॥ (७०६)

'मतिबुद्धिपूजार्थेभ्यश्च' (२/३/१८८) इति वक्ष्यति, तस्येदं ग्रहणम् । पुजाग्रहणमुपलक्षणार्थम् । क्तो यः पूजायां विहितस्तेन षष्ठी न समस्यते । राज्ञां मतः । राज्ञां बुद्धः । राज्ञां पूजितः ।

पूजायामिति किम्? छात्रस्य हसितं=छात्रहसितम् ॥

४३६. अधिकरणवाचिना च ॥ १३ ॥ (७०७)

'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः' (३/४/७६) इति वक्ष्यति, तस्येदं ग्रहणम्। अधिकरणवाचिना क्तेन षष्ठी न समस्यते । इदमेषामासितम्। इदमेषां यातम् । इदमेषां भुक्तम्॥

४३७. कर्मणि च ॥ १४ ॥ (७०८)

' क्तेन ' इति निवृत्तम् । कर्मग्रहणं षष्ठीविशेषणम् । कर्मणि च या षष्ठी सा न समस्यते। ' उभयप्राप्तौ कर्मणि ' (२/३/८) इति षष्ठ्या इदं ग्रहणम् । आश्चर्यो गवां दोहोऽगोपालकेन । रोचते ओदनस्य भोजनं देवदत्तेन । साधु खलु पयसः पानं देवदत्तेन । विचित्रा सूत्रस्य कृतिः पाणिनिना ॥

४३८. तृजकाभ्यां कर्तरि ॥ १५ ॥ (७०९)

कर्तृग्रहणं षष्ठीविशेषणम् । कर्त्तरि या षष्ठी सा तृचाऽकेन च सह न समस्यते । भवतः शायिका । भवत आसिका । भवतोऽग्रगामिका । तृच् कर्त्तर्येव विधीयते, तत्प्रयोगे कर्तरि षष्ठी नास्ति । तस्मात्तृज्ग्रहणमुत्तरार्थम् । कर्तरीति किम्? इक्षुभक्षिकां मे धारयसि ॥

४३९. कर्त्तरि च ॥ १६ ॥ (७१०)

कर्त्तरि च यौ तृजकौ ताभ्यां सह षष्ठी न समस्यते । सामर्थ्यादकस्य विशेषणार्थं कर्तृग्रहणमितरत्र व्यभिचाराभावात् । अपां स्रष्टा । पुरां भेत्ता । वज्रस्य भर्त्ता । ननु च भर्तृशब्दो ह्ययं याजकादिषु पठ्यते ? संबम्धिशब्दस्य पतिपर्यायस्य तत्र ग्रहणम् । अकः खल्वपि - ओदनस्य भोजकः । सक्तूनां पायकः ॥

४४०. नित्यं क्रीडाजीविकयोः ॥ १७ ॥ (७११)

' न ' इति निवृत्तम्, न तृजकौ । नित्यं समासो विधीयते । क्रीडायां जीविकायां च नित्यं षष्ठी समस्यते, तत्पुरुषश्च समासो भवति । तृच् क्रीडाजीविकयोर्नास्तीत्यक एवोदाह्रियते - उद्दाल्कपुष्पभञ्जिका । वारणपुष्पप्रचायिका । जीविकायाम् - दन्तलेखकः, नखलेखकः ।

क्रीडाजीविकयोरिति किम्? ओदनस्य भोजकः ॥

४४१. कुगतिप्रादयः ॥ १८ ॥ (७६१)

' नित्यम् ' इति वर्त्तते । कुशब्दोऽव्ययं परिगृह्यते, गत्यादिभिः साहचर्यात्, न द्रव्यवचनः । कुगतिप्रादयः समर्थेन शब्दान्तरेण सह नित्यं समस्यन्ते, तत्पुरुषश्च समासो भवति । कुः पापार्थे - कुपुरुषः । गति-उररीकृतम्, यदूरीकरोति । प्रादयः - दुर्निन्दायाम्, दुष्पुरुषः । स्वती पूजायाम्, सुपुरुषः, अतिपुरुषः । आपिङ्गलः ।

प्रायिकं चैतदुपाधिवचनम् । अन्यत्रापि हि समासो दृश्यते । कोष्णम्, कवोष्णम्, कदुष्णम् । दुष्कृतम् । [सुष्टुतम्] अतिस्तुतम् । आबद्धम् इति ।

प्रादयो गताद्यर्थे प्रथमया (म. भा. २.२ १८. वा. ५) । प्रगत आचार्यः प्राचार्यः । प्रान्तेवासी ।

अत्यादयः क्रान्ताद्यर्थे द्वितीयया (म. भा. वा. ३) । अतिक्रान्तः खट्वाम् अतिखट्वः । अतिमालः ।

अवादयः क्रुष्टाद्यर्थे तृतीयया (म. भा. वा. ८) । अवक्रुष्टः कोकिलया अवकोकिलः ।

पर्यादयो ग्लानाद्यर्थे चतुर्थ्या (म. भा. वा. ८) । परिग्लानोऽध्ययनाय पर्यध्ययनः । अलं कुमार्यै अलंकुमारिः।

निरादयः क्रान्ताद्यर्थे पञ्चम्या । (म. भा. वा. ९) । निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः । निर्वाराणसिः ।

इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् । (म. भा. वा. ६) । वाससीइव ।

प्रादिप्रसङ्गे कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः । वृक्षं प्रति विद्योतते विद्युत् । साधुर्देवदत्तो मातरं प्रति ॥

४४२. उपपदमतिङ् ॥ १९ ॥ (७१२)

' नित्यम् ' इति वर्तते । उपपदमतिङन्तं समर्थेन शब्दान्तरेण सह समस्यते नित्यम्, तत्पुरुषश्च समासो भवति । कुम्भकारः । नगरकारः ।

अतिङिति किम्? एधानाहारको व्रजति ।

ननु च ' सुप् सुपा ' इति वर्त्तते, तत्र कुतस्तिङन्तेन सह समासप्रसङ्गः? एतज्ज्ञापयति - ' एतयोर्योगयोः सुप् सुपेति न संबध्यते ' इति । तेन ' गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः ' इत्येतदुपपन्नं भवति । अश्वकीती । धनक्रीती ॥

४४३. अमैवाव्ययेन ॥ २० ॥ (७८३)

पूर्वेणैव समासे सिद्धे नियमार्थं वचनम् । अव्ययेनोपपदस्य यः समासः सोऽमैव भवति, नान्येन । स्वादुङ्कारं भुङ्क्ते । संपन्नङ्कारं भुङ्क्ते । लवणङ्कारं भुङ्क्ते ।

अमैवेति किम्? ' कालसमयवेलासु तुमुन् ' [३/३/६७] - कालो भोक्तुम् ।

एवकारकरणमुपपदविशेषणार्थम् - अमैव यत्तुल्यविधानमुपपदं तस्य समासो यथा स्यात्, अमा चान्येन च यत्तुल्यविधानं तस्य मा भूत् - अग्रे भोजम् ॥

४४४. तृतीयाप्रभृतीन्यन्यतरस्याम् ॥ २१ ॥ (७८४)

अमैव इत्यनुवर्त्तते । उपदंशस्तृतीयायाम् [३/४/४७] इत्यतः प्रभृति यान्युपपदानि तान्यमैवाव्ययेन सहान्यतरस्यां समस्यन्ते, तत्पुरुषश्च समासो भवति ।

उभयत्रविभाषेयम् । यदमैव तुल्यविधानमुपपदं तस्य प्राप्ते, यथा - उपदंशस्तृतीयायाम् इति । यत्पुनरमा चान्येन च तुल्यविधानं तस्याप्राप्ते, यथा - अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ [३/४/६९] इति, मूलकोपदंशं भुङ्क्ते, मूलकेनोपदंशं भुङ्क्ते । उच्चैःकारमाचष्टे । उच्चैःकारम् ।

अमैवेत्येव - ' पर्याप्तिवचनेष्वलमर्थेषु ' पर्याप्तो भोक्तुम् । प्रभुर्भोक्तुम् ॥

४४५. क्त्वा च ॥ २२ ॥ (७८५)

'अमैव' इति पूर्वयोगेऽनुवृत्तम्, तेनान्यत्र न प्राप्नोतीति वचनमारभ्यते । कत्वाप्रत्ययेन सह तृतीयाप्रभृतीन्युपपदानि अन्यतरस्यां समस्यन्ते, तत्पुरुषश्च समासो भवति । उच्चैः कृत्य। उच्चैः कृत्वा । ' अव्ययेऽयथाभिप्रेताख्याने ' [३/४/५९] इति क्त्वाप्रत्ययः । समासपक्षे ल्यबेव। तृतीयाप्रभृतीनीत्येव - अलं कृत्वा । खलु कृत्वा ॥

४४६. शेषो बहुव्रीहिः ॥ २३ ॥ (८२९)

उपयुक्तादन्यः शेषः । शेषः समासो बहुव्रीहिसंज्ञो भवति । कश्च शेषः? यत्रान्यः समासो नोक्तः । वक्ष्यति - ' अनेकमन्यपदार्थे ' [२/२/२४] । चित्रगुः । शबलगुः । कृष्णेत्तरासङ्गः । शेष इति किम्? उन्मत्तगङ्गम्, लोहितगङ्गम् । बहुव्रीहिप्रदेशाः - ' न बहुव्रीहौ ' [१/१/२९] इत्येवमादयः॥

४४७. अनेकमन्यपदार्थे ॥ २४ ॥ (८३०)

अनेकं सुबन्तमन्यपदार्थे वर्तमानं सह समस्यते, बहुव्रीहिश्च समासो भवति । प्रथमार्थमेकं वर्जयित्वा सर्वेषु विभक्त्यर्थेषु बहुव्रीहिर्भवति । प्राप्तमुदकं यं ग्रामं प्राप्तोदको ग्रामः। ऊढरथोऽनड्वान् । उपहृतपशूरुद्रः । उद्धृतौदना स्थाली । चित्रगुर्देवदत्तः । वीरपुरुषको ग्रामः ।

प्रथमार्थे तु न भवति । वृष्टे देवे गतः । अनेकग्रहणं किम्?
बहूनामपि यथा स्यात् -

सुसूक्ष्मजटकेशेन सुगजाजिनवाससा ।
समन्तशितिरन्ध्रेण द्वयोर्वृत्तौ न सिध्यति ॥ (म. भा. २.२ २४)

बहुव्रीहिः समानाधिकरणानामिति वक्तव्यम् (म.भा. २.२.२४ वा. ७) । व्यधिकरणानां मा भूत् - पञ्चभिर्भुक्तमस्य ।

अव्ययानां च बहुव्रीहिर्वक्तव्यः (वा. ८) । उच्चैर्मुखः । नीचैर्मुखः ।

सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च वक्तव्यः (वा. ९) । कण्ठे स्थितः कालोऽस्य कण्ठेकालः । उरसिलोमा । उष्ट्रस्य मुखमिव मुखं यस्य स उष्ट्रमुखः। खरमुखः ।

समुदायविकारषष्ठ्याश्च बहुव्रीहिरुत्तरपदलोपश्चेति वक्तव्यम् (वा.१०) । केशानां संघातः=केशसंघातः, केशानां चूडः=केशचूडः । सुवर्णस्य विकारोऽलंकारोऽस्य सुवर्णालङ्कारः ।

प्रादिभ्यो धातुजस्योत्तरपदस्य लोपश्च वा बहुव्रीहिर्वक्तव्यः (वा. ११) । प्रपतितं पर्णमस्य प्रपर्णः, प्रपतितपर्णः । प्रपतितं पलाशमस्य प्रपलाशः ।

नञोऽस्त्यर्थानां बहुव्रीहिर्वा चोत्तरपदलोपश्च वक्तव्यः (वा. १२) । अविद्यमानः पुत्रो यस्य अपुत्रः । अविद्यमानभार्यः अभार्यः ।

सुबधिकारेऽस्तिक्षीरादीनां बहुव्रीहिर्वक्तव्यः (वा. १८) । अस्तिक्षीरा ब्राह्मणी। अस्त्यादयो निपाताः ॥

४४८. संख्ययाऽव्ययासान्नादूराधिकसंख्याः संख्येये ॥ २५ ॥ (८४३)

संख्येये या संख्या वर्त्तते तया सहाव्ययासन्नादूराधिकसंख्याः समस्यन्ते, बहुव्रीहिश्च समासो भवति ।

अव्यय - उपदशाः । उपविंशाः । आसन्नदशाः । आसन्नविंशाः । अदूरदशाः। अदूरविंशाः । अधिकदशाः । अधिकविंशाः । संख्या - द्वित्राः । त्रिचतुराः । द्विदशाः।

संख्ययेति किम्? पञ्च ब्राह्मणाः । अव्ययासन्नादूराधिकसंख्या इति किम्? ब्राह्मणाः पञ्च । संख्येये इति किम्? अधिका विंशातिर्गवाम् ॥

४४९. दिङ्नामान्यन्तराले ॥ २६ ॥ (८४५)

दिशां नामानि दिङ्नामानि । दिङ्नामानि सुबन्तानि अन्तराले वाच्ये समस्यन्ते, बहुव्रीहिश्च समासो भवति । दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं दक्षिणपूर्वा दिक् । पूर्वोत्तरा। उत्तरपश्चिमा । पश्चिमदक्षिणा ॥

सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः (म. भा.) । नामग्रहणं रूढ्यर्थम्, इह मा भूत् - ऐन्द्र्याश्च कौबेर्याश्च दिशोर्यदन्तरालमिति ॥

४५०. तत्र तेनेदमिति सरूपे ॥ २७ ॥ (८४६)

‘ तत्र ’ इति सप्तम्यन्तं गृह्यते । ‘ तेन ’ इति तृतीयान्तम् । सरूपग्रहणं प्रत्येकमभिसम्बद्ध्यते । तत्रेति सप्तम्यन्ते सरूपे पदे तेनेति च तृतीयान्ते इदमित्येतस्मिन्नर्थे समस्येते, बहुव्रीहिश्च समासो भवति । इतिकरणश्चेह विवक्षार्थो लौकिकमर्थमनुसारयति । ततो ग्रहणं प्रहरणं कर्मव्यतीहारो युद्धं च समासार्थ इति सर्वमितिकरणाल्लभ्यते । यत्तत्रेति निर्दिष्टं ग्रहणं चेत्तद्भवति, यत्तेनेति निर्दिष्टं प्रहरणं चेत्तद्भवति, यदिदमिति निर्दिष्टं युद्धं चेतद्भवति । केशेष केशेषु च गृहीत्वा इदं युद्धं वृत्तं केशाकेशि । कचाकचि । दण्डैश्च दण्डैश्च प्रहृत्य इदं युद्धं वृत्तं दण्डादण्डि । मुसलामुसलि । ‘इच् कर्मव्यतीहारे’ [५/४/१२७] इति इच् समासान्तः, स चाव्ययम् । ‘अन्येषामपि दृश्यते’ [६/३/१३५] इति पूर्वपदस्य दीर्घत्वम् ॥

सरूपग्रहणं किम्? हलैश्च मुसलैश्च प्रहृत्य इदं युद्धं वृत्तम् ॥

४५१. तेन सहेति तुल्ययोगे ॥ २८ ॥ (८४८)

' सह ' इत्येतच्छब्दरूपं तुल्ययोगे वर्तमानं तेन इति तृतीयान्तेन सह समस्यते, बहुव्रीहिश्च समासो भवति । सह पुत्रेणागतः सपुत्रः । सच्छात्रः । सकर्मकरः । तुल्ययोग इति किम्? ' सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ।'

विद्यमानैरेव दशभिः पुत्रैर्भारं वहतीत्यर्थः । कथं सकर्मकः, सलोमकः,सपक्षक इति? न ह्यत्र तुल्ययोगो गम्यते, किं तहि? विद्यमानता । प्रायिकं तुल्ययोगे इति विशेषणम्, अन्यत्रापि समासो दृश्यते ॥

४५२. चार्थे द्वन्द्वः ॥ २९ ॥ (९०१)

' अनेकम् ' इति वर्तते । अनेकं सुबन्तं चार्थे वर्त्तमानं समस्यते, द्वन्द्वसंज्ञश्च समासो भवति । समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । तत्र समुच्चयान्वाचययोरसामर्थ्यान्नास्ति समासः । इतरेतरयोगे समाहारे च समासो विधीयते । प्लक्षश्च प्लक्षग्रोधश्च प्लक्षन्यग्रोधौ । धवश्च खदिरश्च पलाशश्च धवखदिरपलाशाः । वाक्च त्वक्च वाक्त्वचम् । वाग्दृषदम् ।

द्वन्द्वप्रदेशाः -द्वन्द्वे च [१/१/३१] इत्येवमादयः ॥

४५३. उपसर्जनं पूर्वम् ॥ ३० ॥ (६५४)

' समासे ' इति वर्त्तते । उपसर्जनसंज्ञकं समासे पूर्वं प्रयोक्तव्यम् । पूर्ववचनं परप्रयोगनिवृत्त्यर्थम् । अनियमो हि स्यात् । द्वितीया - कष्टश्रितः । तृतीया - शंकुलाखण्डः । चतुर्थी - यूपदारु । पञ्चमी - वृकभयम् । षष्ठी - राजपुरुषः । सप्तमी - अक्षशौण्डः ॥

४५४. राजदन्तादिषु परम् ॥ ३१ ॥ (९०२)

पूर्वनिपाते प्राप्ते परप्रयोगार्थं वचनम् । राजदन्तादिषु परमुपसर्जनं प्रयोक्तव्यम् । न केवलमुपसर्जनस्य, अन्यस्यापि यथालक्षणं विहितस्य पूर्वनिपातस्यापवादः परनिपातो विधीयते। दन्तानां राजा राजदन्तः । वनस्याग्रे अग्रेवणम् । निपातनादलुक्।

राजदन्तः । अग्रेवणम् । लिप्तवासितम् । नग्नमुषितम् । सिक्तसंमृष्टम् । मृष्टलुञ्चितम्। अवक्लिन्नपक्वम् । अर्पितोप्तम् । उप्तगाढम् ।

पूर्वकालस्य परनिपातः - उलूखलमुसलम् । तण्डुलकिण्वम् । दृषदुपलम्। आरग्वायनबन्धकी । चित्ररथबाह्लीकम् । आवन्त्यश्मकम् । शूद्रार्यम् । स्नातकराजानौ । विष्वक्सेनार्जुनौ । अक्षिभ्रुवम् । दारगवम् ।

शब्दार्थौ । धर्मार्थौ । कामार्थौ । अनियमश्चात्रेष्यते । अर्थशब्दौ । अर्थधर्मौ । अर्थकामौ। तत्कथम् ? वक्तव्यमिदम् - धर्मादिषूभयमिति । वैकारिकतम् । गजवाजम् । गोपालधानीपूलासम् । पूलासककरण्डम् । स्थूलपूलासम् । उशीरबीजम् । सिञ्जास्थम् । चित्रास्वाती । भार्यापती । जायापती । जम्पती । दम्पती । जायाशब्दस्य जम्भावो दम्भावश्च निपात्यते । पुत्रपती । पुत्रपशू । केशश्मश्रू । श्मश्रुकेशौ । शिरोबीजम् । सर्पिर्मधुनी । मधुसर्पिषी । आद्यन्तौ । अन्तादी । गुणवृद्धी । वृद्धिगुणौ ॥

४५५. द्वन्द्वे घि ॥ ३२ ॥ (९०३)

' पूर्वम् ' इति वर्त्तते । द्वन्द्वे समासे घ्यन्तं पूर्वं प्रयोक्तव्यम् । पटुगुप्तौ। मृदुगुप्तौ। अनेकप्राप्तावेकस्य नियमः, शेषे त्वनियमः । पटुमृदुशुक्लाः । पटुशुक्लमृदवः ।

द्वन्द्व इति किम्? विश्पष्टपटुः ॥

४५६. अजाद्यदन्तम् ॥ ३३ ॥ (९०४)

' द्वन्द्वे ' इति वर्त्तते । अजाद्यदन्तं शब्दरूपं द्वन्द्वे समासे पूर्वं प्रयोक्तव्यम्। उष्ट्रखरम् । उष्ट्रशशकम् । बहुष्वनियमः । अश्वरथेन्द्राः । इन्द्ररथाश्वाः । द्वन्द्वे घ्यन्तादजाद्यदन्तं विप्रतिषेधेन। इन्द्राग्नी । इन्द्रवायू । तपरकरणं किम्? अश्ववृषौ, वृषाश्वे इति वा ॥

४५७. अल्पाच्तरम् ॥ ३४ ॥ (९०५)

'द्वन्द्वे' इति वर्त्तते । अल्पाच्तरं शब्दरूपं द्वन्द्वे समासे पूर्वं प्रयोक्तव्यम् । प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ । धवखदिरपलाशाः । बहुष्वनियमः - शङ्खदुन्दुभिवीणाः। वीणाशङ्खदुन्दुभयः । ऋतुनक्षत्राणामानुपूर्व्येण समानाक्षराणां पूर्वनिपातो वक्तव्यः (म. भा. २.२.३४ वा. ३) । हेमन्तशिशिरवसन्ताः । चित्रास्वाती । कृत्तिकारोहिण्यौ । समानाक्षराणामिति किम्? ग्रीष्मवसन्तौ । लघ्वक्षरं पूर्वं निपततीति वक्तव्यम् (म. भा. २.२.३४ वा. ५) । कुशकाशम्। शरशादम् ।

अभ्यर्हितं च पूर्वं निपततीति वक्तव्यम् (वा. ४) । मातापितरौ । श्रद्धामेधे। दीक्षातपसी। वर्णानामानुपूर्व्येण पूर्वनिपातः (वा. ६) । ब्राह्मणक्षत्रियविट्शूद्राः। समानाक्षराणामित्यत्र नास्ति । भ्रातुश्च ज्यायसः पूर्वनिपातो वक्तव्यः (वा. ७)। युधिष्ठिरार्जुनौ। संख्याया अल्पीयस्याः पूर्वनिपातो वक्तव्यः (वा. ८) । द्वित्राः। त्रिचतुराः। नवतिशतम् ॥

४५८. सप्तमीविशेषणे बहुव्रीहौ ॥ ३५ ॥ (८९८)

सर्वोपसर्जनत्वाद्बहुव्रीहेरनियमे प्राप्ते नियमार्थं वचनम् । सप्तम्यन्तं विशेषणं च बहुव्रीहिसमासे पूर्वं प्रयोक्तव्यम् । कण्ठेकालः । उरसिलोमा । विशेषणम् - चित्रगुः । शबलगुः।

सर्वनामसंख्ययोरुपसंख्यानम् (म. भा. २.२.३५ वा. १) । सर्वश्वेतः । सर्वकृष्णः द्विशुक्लः । द्विकृष्णः । अनयोरेव मिथः संप्रधारणायां परत्वात्संख्यायाः पूर्वनिपातः । द्व्यन्यः। त्र्यन्यः ।

वा प्रियस्य पूर्वनिपातः (वा. ३) । गुडप्रियः । प्रियगुडः ।

सप्तम्याः पूर्वनिपाते प्राप्ते गड्वादिभ्यः सप्तम्यन्तं परम् (वा. ४) । गडुकण्ठः। गडुशिराः। कथं वहेगडुः ? प्राप्तस्य चाबाधा व्याख्येया ॥

४५९. निष्ठा ॥ ३६ ॥ (८९९)

निष्ठान्तं च बहुव्रीहिसमासे पूर्वं प्रयोक्तव्यम् । कृतकटः । भिक्षितभिक्षिः। अवमुक्तोपानत्कः ।

आहूतसुब्रह्मण्यः । ननु च विशेषणमेवात्र निष्ठा ? नैष नियमः, विशेषणविशेष्यभावस्य विवक्षानिबन्धनत्वात् । कटे कटेन कृतमिति वा विग्रहीतव्यम्।

निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परवचनम् (म.भा. २.२.३६ वा.१)। शार्ङ्गजग्धी । पलाण्डुभक्षिती । मासजाता । संवत्सरजाता । सुखजाता । दुःखजाता । कथं कृतकटः, भुक्तौदनः? प्राप्तस्य चाबाधा व्याख्येया ॥

प्रहरणार्थेभ्यश्च परे निष्ठासप्तम्यौ भवत इति वक्तव्यम् (म. भा. २.२.३६ वा. ५) । अस्युद्यतः । दण्डपाणिः । कथम् उद्यतगदः, उद्यतासिः? प्राप्तस्य चाबाधा व्याख्येया ॥

४६०. वाऽऽहिताग्न्यादिषु ॥ ३७ ॥ (९००)

'निष्ठा' इति पूर्वनिपाते प्राप्ते विकल्प उच्यते । आहिताग्न्यादिषु निष्ठान्तं पूर्वं वा प्रयोज्यम् । अग्न्याहितः । आहिताग्निः । जातपुत्रः । पुत्रजातः। जातदन्तः। जातश्मश्रुः । तैलपीतः । घृतपीतः ऊढभार्यः । गतार्थः । आकृतिगणश्चायम् । तेन गडुकण्ठप्रभृतय इहैव द्रष्टव्याः ॥

४६१. कडाराः कर्मधारये ॥ ३८ ॥

गुणशब्दानां विशेषणत्वात् पूर्वनिपाते प्राप्ते विकल्प उच्यते । कडारादयः शब्दाः कर्मधारये समासे वा पूर्वं प्रयोक्तव्याः । कडारजैमिनिः । जैमिनिकडारः।

कडार । गडुल । काण । खञ्ज । कुण्ठ । खञ्जर । खलति । गौर । वृद्ध । भिक्षुक। पिङ्गल । तनु । वटर । कर्मधारय इति किम्? कडारपुरुषो ग्रामः॥

॥ इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ
द्वितीयाध्यायस्य द्वितीयः पादः समाप्तः ॥

अथ द्वितीयाध्याये
तृतीयः पादः

४६२. अनभिहिते ॥ १ ॥ (५३६)

'अनभिहिते' इत्यधिकारोऽयं वेदितव्यः । यदित ऊर्ध्वमनुक्रमिष्यामः, 'अनभिहिते' इत्येवं तद्वेदितव्यम् । अनभिहिते=अनुक्ते अनिर्दिष्टे कर्मादौ विभक्तिर्भवति । केनाभिहिते? तिङ्कृत्तद्धितसमासैः, परिसंख्यानम् (म. भा.) वक्ष्यति -- 'कर्मणि द्वितीया', (२.३.२) कटं करोति । ग्रामं गच्छति । अनभिहित इति किम्? तिङ् -क्रियते कटः । कृत् - कृतः कटः। तद्धित-शत्यः, शतिकः (५.१.२१) । समास - प्राप्तमुदकं यं ग्रामं प्राप्तोदको ग्रामः ।

परिसंख्यानं किम्? कटं करोति भीष्ममुदारं दर्शनीयम् (म. भा.) ।

'बहुषु बहुवचनम्' (१.४.२१) इत्येवमादिना संख्यावाच्यत्वेन विभक्तीनामुपदिष्टाः, तत्र विशेषणार्थमिदमारभ्यते- अनभिहितकर्माद्याश्रयेष्वेकत्वादिषु द्वितीयादयो वेदितव्या (म. भा.) इति ।

४६३. कर्मणि द्वितीया ॥ २ ॥ (५३७)

द्वितीयादयः शब्दाः पूर्वाचार्यैः सुपां त्रिकेषु स्मर्यन्ते, तैरेवात्र व्यवहारः । कर्मणि कारके या संख्या तत्र द्वितीया विभक्तिर्भवति । कटं करोति । ग्रामं गच्छति ।

उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।
द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥
(म.भा.२.३.२)

उभयतो ग्रामम् । सर्वतो ग्रामम् । धिग्देवदत्तम् । उपर्युपरि ग्रामम् । अध्यधि ग्रामम्। अधोऽधो ग्रामम् ॥

अभितः- परितः- समया - निकषा - हा - प्रतियोगेषु च दृश्यते (म. भा. २.३.२ वा. १)। अभितो ग्रामम् । परितो ग्रामम् । समया ग्रामम् । निकषा ग्रामम् । हा देवदत्तम् । बुभुक्षितं न प्रतिभाति किञ्चित् (म. भा.) ॥

४६४. तृतीया च होश्छन्दसि ॥ ३ ॥ (३३९४)

'कर्मणि' इति वर्त्तते । द्वितीयायां प्राप्तायां तृतीया विधीयते, च शब्दात्सा च भवति। छन्दसि विषये जुहोतेः कर्मणि कारके तृतीया विभक्तिर्भवति, द्वितीया च । ' यवाग्वाऽग्निहोत्रं जुहोति ' 'यवागूमग्निहोत्रं जुहोति' (शां. श्रौ. सू. ३.१२.१६) ।

छन्दसीति किम्? यवागूमग्निहोत्रं जुहोति ।

४६५. अन्तराऽन्तरेण युक्ते ॥ ४ ॥ (५४५)

द्वितीया स्वर्यते, न तृतीया । अन्तराऽन्तरेणशब्दौ निपातौ साहचर्याद् गृह्येते। आभ्यां योगे द्वितीया विभक्तिर्भवति । षष्ठ्यपवादोऽयं योगः । तत्रान्तराशब्दो मध्यमाधेयप्रधानमाचष्टे । अन्तरेणशब्दस्तु तच्च विनार्थं च । अन्तरा त्वां च मां च कमण्डलुः। अन्तरेण त्वां च मां च कमण्डलुः (म. भा.) । अन्तरेण पुरुषकारं न किञ्चिल्लभ्यते।

युक्तग्रहणं किम्? अन्तरा तक्षशिलां पाटलिपुत्रं च सुघ्नस्य प्राकारः ॥

४६६. कालाध्वनोरत्यन्तसंयोगे ॥ ५ ॥ (५५८)

कालशब्देभ्योऽध्वशब्देभ्यश्च द्वितीया विभक्तिर्भवति अत्यन्तसंयोगे गम्यमाने। क्रियागुणद्रव्यैः साकल्येन कालाध्वनोः संबन्धः अत्यन्तसंयोगः । मासमधीते । संवत्सरमधीते । मासं कल्याणी । संवत्सरं कल्याणी । मासं गुडधानाः । अध्वनः खल्वपि - क्रोशमधीते । योजनमधीते । क्रोशं कुटिला नदी (म. भा.) । क्रोशं पर्वतः । योजनं पर्वतः ।

अत्यन्तसंयोग इति किम्? मासस्य द्विरधीते । क्रोशस्यैकदेशे पर्वतः । योजनस्यैकदेशे पर्वतः ॥

४६७. अपवर्गे तृतीया ॥ ६ ॥ (५६३)

'कालाध्वनोरत्यन्तसंयोगे ' इति वर्त्तते । अपवर्गः=फलप्राप्तौ सत्यां क्रियापरिसमाप्तिः। अपवर्गे गम्यमाने कालाध्वनोरत्यन्तसंयोगे तृतीया विभक्तिर्भवति। मासेनानुवाकोऽधीतः । संवत्सरेणानुवाकोऽधीतः । अध्वनः-क्रोशेनानुवाकोऽधीतः। योजनेनानुवाकोऽधीतः । अपवर्ग

इति किम्? क्रोशमधीतोऽनुवाकः । मासमधीतः। कर्तृव्यावृत्तौ फलसिद्धेरभावात् तृतीया न भवति। मासमधीतोऽनुवाको न चानेन गृहीतः (म. भा.) ॥

४६८. सप्तमीपञ्चम्यौ कारकमध्ये ॥ ७ ॥ (६४३)

'कालाध्वनोः ' इति वर्त्तते । कारकयोर्मध्ये यौ कालाध्वानौ ताभ्यां सप्तमीपञ्चम्यौ विभक्ती भवतः । अद्य भुक्त्वा देवदत्तो द्व्यहे भोक्ता, द्व्यहाद्वा भोक्ता (म. भा.) । त्र्यहे त्र्यहाद्वा भोक्ता । कर्तृशक्त्योर्मध्ये कालः । इहस्थोऽयमिष्वासः क्रोशे लक्ष्यं विद्ध्यति । क्रोशाल्लक्ष्यं विद्ध्यति (म. भा.)। कर्तृकर्मणोः कारकयोः कर्मापादानयोः कर्माधिकरणयोर्वा मध्ये क्रोशः । संख्यातानुदेशो न भवति; अस्वरितत्वात् ॥

४६९. कर्मप्रवचनीययुक्ते द्वितीया ॥ ८ ॥ (५४८)

कर्मप्रवचनीयैर्युक्ते द्वितीया विभक्तिर्भवति । अनुर्लक्षणे (१.४.८४) । शाकल्यस्य संहितामनु प्रावर्षत् । आगस्त्यमन्वसिञ्चत् प्रजाः ॥

४७०. यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ॥ ९ ॥ (६४५)

' कर्मप्रवचनीययुक्ते' इति वर्त्तते । यस्मादधिकं यस्य चेश्वरवचनं कर्मप्रवचनीयैर्युक्ते तत्र सप्तमी विभक्तिर्भवति । उप (१.४.८७) खार्यां द्रोणः । उपनिष्के कार्षापणम् । ' यस्य चेश्वरवचनम् ' इति स्वस्वामिनोर्द्वयोरपि पर्यायेण सप्तमी विभक्तिर्भवति । अधि (१.४.९७) ब्रह्मदत्ते पञ्चालाः, अधि पञ्चालेषु ब्रह्मदत्तः (म. भा.) इति । द्वितीयापवादो योगः ॥

४७१. पञ्चम्यपाङ्परिभिः ॥ १० ॥ (५९८)

अप, आङ्, परि-इत्येतैः कर्मप्रवचनीयैर्योगे पञ्चमी विभक्तिर्भवति । अप (१.४.८९) त्रिगर्तेभ्यो वृष्टो देवः । आ पाटलिपुत्राद् वृष्टो देवः । परि (१.४.८८) त्रिगर्तेभ्यो वृष्टो देवः । अपेन साहचर्यात् परेर्वर्जनार्थस्य ग्रहणम्, तेनेह न भवति - वृक्षं परि (१.४.९०) विद्योतते विद्युत्॥

४७२. प्रतिनिधिप्रतिदाने च यस्मात् ॥ ११ ॥ (६००)

मुख्यसदृशः प्रतिनिधिः । दत्तस्य प्रतिनिर्यातनम् प्रतिदानम् । यस्मात्प्रतिनिधिर्यतश्च प्रतिदानं तत्र कर्मप्रवचनीययुक्ते पञ्चमी विभक्तिर्भवति । अभिमन्युरर्जुनतः प्रति (१.४.९२) । प्रद्युम्नो वासुदेवतः प्रति । माषानस्मै तिलेभ्यः प्रति (१.४.९२) यच्छति ।

ननु च प्रतिनिधिप्रतिदाने कर्मवचनीययुक्ते, न तु यतः प्रतिनिधिप्रतिदाने? नैष दोषः, सम्बन्ध-सम्बन्धात्तस्यापि योगोऽस्त्येव ॥

४७३. गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ॥ १२ ॥ (५८५)

गत्यार्थानां धातूनां चेष्टाक्रियाणां परिस्पन्दक्रियाणां कर्मणि कारकेऽध्ववर्जिते द्वितीयाचतुर्थ्यौ भवतः । ग्रामं गच्छति । ग्रामाय गच्छति । ग्रामं व्रजति । ग्रामाय व्रजति ।

गत्यर्थग्रहणं किम्? ओदनं पचति । कर्मणीति किम्? अश्वेन व्रजति । चेष्टायामिति किम्? मनसा पाटलिपुत्रं गच्छति । अनध्वनीति किम्? अध्वानं गच्छति ।

अध्वनीत्यर्थग्रहणम् (म. भा.) । पन्थानं गच्छति । मार्गं गच्छति ।

आस्थितप्रतिषेधश्चायं विज्ञेयः (म. भा.) । आस्थितः संप्राप्तः, आक्रान्त उच्यते । यत्र तु उत्पथेन पन्थानं गच्छति, तत्र भवितव्यमेव चतुर्थ्या-पथे गच्छतीति (म. भा.) ।

द्वितीयाग्रहणं किम्? न चतुर्थ्येव विकल्प्येत, अपवादविषयेऽपि यथा स्यात् - ग्रामं गन्ता, ग्रामाय गन्ता । कृद्योगलक्षणा षष्ठी न भवति ॥

४७४. चतुर्थी संप्रदाने ॥ १३ ॥ (५७०)

संप्रदाने कारके चतुर्थी विभक्तिर्भवति । उपाध्यायाय गां ददाति, माणवकाय भिक्षां ददाति, देवदत्ताय रोचते, पुष्पेभ्यः स्पृहयति इत्यादि ॥

चतुर्थीविधाने तादर्थ्यं उपसंख्यानम् (म. भा. २.३.१३ वा. १) । यूपाय दारु । कुण्डलाय हिरण्यम् । रन्धनाय स्थाली । अवहननायोलूखलम् ।

क्लृपि संपद्यमाने चतुर्थी वक्तव्या (म. भा. २.३.१३ वा. २) । मूत्राय कल्पते यवागूः। क्लृपीत्यर्थनिर्देशः। मूत्राय संपद्यते यवागूः। मूत्राय जायते यवागूः।

उत्पातेन ज्ञाप्यमाने चतुर्थी वक्तव्या (म. भा. २.३.१३) ।

वाताय कपिला विद्युदातपायातिलोहिनी ।
पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् ॥ (म. भा. २.३.१३)

हितयोगे चतुर्थी वक्तव्या (म. भा. २.३.१३ वा. ४) । गोभ्यो हितम् । अरोचकिने हितम्॥

४७५. क्रियार्थोपपदस्य च कर्मणि स्थानिनः ॥ १४ ॥ (५८१)

क्रियार्था क्रिया उपपदं यस्य, सोऽयं क्रियार्थोपपदः । ' तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ' (३.३.१०) इत्येष विषयो लक्ष्यते । क्रियार्थोपपदस्य च स्थानिनोऽप्रयुज्यमानस्य धातोः कर्मणि कारके चतुर्थी विभक्तिर्भवति । द्वितीयापवादो योगः । एधेभ्यो व्रजति । पुष्पेभ्यो व्रजति ।

क्रियार्थोपपदस्येति किम्? प्रविश पिण्डीम् । प्रविश तर्पणम् । भक्षिरत्र स्थानी, न तु क्रियार्थोपपदः । कर्मणीति किम्? एधेभ्यो व्रजति शकटेन । स्थानिन इति किम् ? एधानाहर्तुं व्रजति ॥

४७६. तुमर्थाच्च भाववचनात् ॥ १५ ॥ (५८२)

तुमुना समानार्थस्तुमर्थः । तुमर्थभाववचनप्रत्ययान्तात् प्रातिपदिकाच्चतुर्थी विभक्तिर्भवति। 'भाववचनाश्च' (३.३.११) इति वक्ष्यति, तस्येदं ग्रहणम् । पाकाय व्रजति । त्यागाय व्रजति । भूतये व्रजति । संपत्तये व्रजति ।

तुमर्थादिति किम्? पाकः, त्यागः, रागः । भाववचनादिति किम्? कारको (३.३.१०) व्रजति ॥

४७७. नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च ॥ १६ ॥ (५८३)

नमः स्वस्ति, स्वाहा, स्वधा, अलम्, वषट्-इत्येतैर्योगे चतुर्थी विभक्तिर्भवति। नमो देवेभ्यः (मै. १.२.१३) । स्वस्ति प्रजाभ्यः । स्वाहाऽग्नये (तै. १.८.१३.१)। स्वधा पितृभ्यः (मै १.२.१३) । अलं मल्लो मल्लाय (म. भा.) । अलमिति - पर्याप्त्यर्थग्रहणम् - प्रभुर्मल्लो मल्लाय, शक्तो मल्लो मल्लाय (म. भा.) । वषडग्नये । वषडिन्द्राय (ऋ. ७.९७.७) । चकारः पुनरस्यैव समुच्चयार्थः, तेनाशीर्विवक्षायामपि षष्ठीं बाधित्वा चतुर्थ्येव भवति - स्वस्ति गोभ्यो भूयात् । स्वस्ति ब्राह्मणेभ्यः (म. भा.) ॥

४७८. मन्यकर्मण्यनादरे विभाषाऽप्राणिषु ॥ १७ ॥ (५८४)

मन्यतेः कर्मणि मन्यकर्मणि । मन्यकर्मणि प्राणिवर्जिते विभाषा चतुर्थी विभक्तिर्भवति अनादरे गम्यमाने । अनादरः=तिरस्कारः । न त्वां तृणं मन्ये न त्वां तृणाय मन्ये । न त्वां बुसं मन्ये । न त्वां बुसाय मन्ये ।

मन्यतिग्रहणं किम्? न त्वां तृणं चिन्तयामि । विकरणनिर्देशः किमर्थः ? न त्वां तृणं मन्वे ।

अनादर इति किम्?

अश्मानं दृषदं मन्ये मन्ये काष्ठमुलूखलम् ।

अन्धायास्तं सुतं मन्ये यस्य माता न पश्यति ॥

अप्रणिष्विति किम्? न त्वा शृगालं मन्ये ।

यदेतदप्राणिष्विति तदनावादिष्विति वक्तव्यम् (म. भा. २.३.१७) । व्यवस्थितविभाषा च ज्ञेया । न त्वा नावं मन्ये । यावत्तीर्णं न नाव्यम् । न त्वाऽन्नं मन्ये । यावन्न भुक्तं श्राद्धम्। प्राणिषु तूभयम्- न त्वा काकं मन्ये (म. भा.) । न त्वा शृगालं मन्ये । इह चतुर्थी द्वितीया च भवतः । न त्वा श्वानं मन्ये । न त्वा शुने मन्ये (म. भा.) । युष्मदः कस्मान्न भवति चतुर्थी, एतदपि हि मन्यतेः कर्म? व्यवस्थितविभाषाविज्ञानादेव न भवति ॥

४७९. कर्तृकरणयोस्तृतीया ॥ १८ ॥ (५६१)

कर्त्तरि करणे च कारके तृतीया विभक्तिर्भवति । देवदत्तेन कृतम् । यज्ञदत्तेन भुक्तम्। करणे - दात्रेण लुनाति । परशुना छिनत्ति ।

तृतीयाविधाने प्रकृत्यादीनामुपसंख्यानम् (म. भा. २.३.१८ वा. १) । प्रकृत्याऽभिरूपः । प्रकृत्या दर्शनीयः । प्रायेण याज्ञिकः । प्रायेण वैयाकरणः । गार्ग्योऽस्मि गोत्रेण । समेन धावति। विषमेण धावति । द्विद्रोणेन धान्यं क्रीणाति। पञ्चकेन पशून् क्रीणाति । साहस्रेणाश्वान् क्रीणाति (म. भा.)॥

४८०. सहयुक्तेऽप्रधाने ॥ १९ ॥ (५६४)

सहार्थेन युक्ते अप्रधाने तृतीया विभक्तिर्भवति । पुत्रेण सहागतः पिता । पुत्रेण सह गोमान् । पितुरत्र क्रियादिसंबन्धः शब्देनोच्यते, पुत्रस्य तु प्रतीयमान इति तस्याप्राधान्यम् । सहार्थेन योगे तृतीयाविधानात्पर्यायप्रयोगेऽपि भवति - पुत्रेण सार्द्धमिति । विनापि सहशब्देन भवति 'वृद्धो यूना' (१.२.६५) इति निपातनात्।

अप्रधान इति किम्? शिष्येण सहोपाध्यायस्य गौः ॥

४८१. येनाङ्गविकारः ॥ २० ॥ (५६५)

अङ्गशब्दोऽत्राङ्गसमुदाये शरीरे वर्तते, 'येन' इति च तदवयवो हेतुत्वेन निर्दिश्यते । येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया विभक्तिर्भवति । अक्ष्णा काणः । पादेन खञ्जः । पाणिना कुणिः । अवयवधर्मेण समुदायो व्यपदिश्यते । अङ्गविकार इति किम्? अक्षि काणमस्य (म. भा.) ॥

४८२. इत्थम्भूतलक्षणे ॥ २१ ॥ (५६६)

कञ्चित्प्रकारं प्राप्तः इत्थम्भूतः, तस्य लक्षणमित्थम्भूतलक्षणम्, ततस्तृतीया विभक्तिर्भवति । अपि भवान् कमण्डलुना छात्त्रमद्राक्षीत् (म. भा.) ? छात्त्रेणोपाध्यायम् । शिखया परिव्राजकम् ।इह न भवति कमण्डलुपाणिश्छात्त्र इति; लक्षणस्य समासेऽन्तर्भूतत्वात्।

इत्थम्भूत इति किम्? वृक्षं प्रति विद्योतनम्॥

४८३. संज्ञोऽन्यतरस्यां कर्मणि ॥ २२ ॥ (५६७)

संपूर्वस्य जानातेः कर्मणि कारके द्वितीयायां प्राप्तायामन्यतरस्यां तृतीया विभक्तिर्भवति । पित्रा संजानीते । पितरं संजानीते । मात्रा संजानीते । मातरं संजानीते (म. भा.) ॥

४८४. हेतौ ॥ २३ ॥ (५६८)

फलसाधनयोग्यः पदार्थो लोके हेतुरुच्यते । तद्वाचिनस्तृतीया विभक्तिर्भवति धनेन कुलम्। कन्यया शोकः । विद्यया यशः ॥

४८५. अकर्तर्यृणे पञ्चमी ॥ २४ ॥ (६०१)

'हेतौ' इति वर्त्तते । कर्तृवर्जितं यदृणं हेतुस्ततः पञ्चमी विभक्तिर्भवति । तृतीयापवादो योगः । शताद्बद्धः । सहस्राद्बद्धः ॥

अकर्त्तरीति किम्? शतेन बन्धितः । शतमृणं च भवति, प्रयोजकत्वाच्च कर्तृसंज्ञकम् ॥

४८६. विभाषा गुणेऽस्त्रियाम् ॥ २५ ॥ (६०२)

'हेतौ' इति वर्त्तते । गुणे हेतावस्त्रीलिङ्गे विभाषा पञ्चमी विभक्तिर्भवति । जाड्याब्दद्धः, जाड्येन बद्धः । पाण्डित्याद् मुक्तः, पाण्डित्येन मुक्तः ।

गुणग्रहणं किम्? धनेन कुलम् । अस्त्रियामिति किम् ? बुद्ध्या मुक्तः । प्रज्ञया मुक्तः॥

४८७. षष्ठी हेतुप्रयोगे ॥ २६ ॥ (६०७)

हेतोः प्रयोगः=हेतुप्रयोगः । हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये षष्ठी विभक्तिर्भवति। अन्नस्य हेतोर्वसति ॥

४८८. सर्वनाम्नस्तृतीया च ॥ २७ ॥ (६०८)

सर्वनाम्नो हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये तृतीया विभक्तिर्भवति षष्ठी च । पूर्वेण षष्ठ्यामेव प्राप्तायामिदमुच्यते । कस्य हेतोर्वसति । केन हेतुना वसति । यस्य हेतोर्वसति । येन हेतुना वसति ।

निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम् (म. भा. २.३.२३ वा. १)॥ किं निमित्तं वसति । केन निमित्तेन वसति । कस्मै निमित्ताय वसति । कस्मान्निमित्ताद्वसति। कस्य निमित्तस्य वसति । कस्मिन्निमित्ते वसति । एवं कारणहेत्वोरप्युदाहार्यम् ।

अर्थग्रहणं चैतत् । पर्यायोपादानं तु स्वरूपविधिर्मा विज्ञायीति । तेनेहापि कस्मात्प्रयोजनाद् वसति । कस्य प्रयोजनस्य वसति । कस्मिन् प्रयोजने वसति॥

४८९. अपादाने पञ्चमी ॥ २८ ॥ (५८७)

अपादाने कारके पञ्चमी विभक्तिर्भवति । ग्रामादागच्छति । पर्वतादवरोहति। वृकेभ्यो बिभेति । अध्ययनात्पराजयते ।

पञ्चमीविधाने ल्यब्लोपे कर्मण्युपसंख्यानम् (म. भा. २.३.२८ वा. १)। प्रासादमारुह्य प्रेक्षते, प्रासादात्प्रेक्षते ।

अधिकरणे चोपसंख्यानम् (म. भा. २.३.२८ वा. २) । आसने उपविश्य प्रेक्षते, आसनात्प्रेक्षते । शयनात्प्रेक्षते ।

प्रश्नाख्यानयोश्च पञ्चमी वक्तव्या (म. भा. २.३.२८ वा. ३)। कुतो भवान्? पाटलिपुत्रात्।

यतश्चाध्वकालनिर्माणं तत्र पञ्चमी वक्तव्या (म. भा. २.३.२८ वा. ४)। गवीधुमतः सांकाश्यं चत्वारि योजनानि । कार्त्तिक्या आग्रहायणी मासे ।

तद्युक्तात्काले सप्तमी वक्तव्या (म. भा. २.३.२८ वा. ५) । कार्त्तिक्या आग्रहायणी मासे । अध्वनः प्रथमा सप्तमी च वक्तव्या (म. भा. २.३.२८ वा. ६) । गवीधुमतः सांकाश्यं चत्वारि योजनानि, चतुर्षु योजनेषु वा ॥

४९०. अन्यारादितरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते ॥२९ ॥ (५९५)

अन्य, आरात्, इतर, ऋते, दिक्शब्द, अञ्चूत्तरपद, आच्, आहि - इत्येतैर्योगे पञ्चमी विभक्तिर्भवति ।

(१) अन्य - इत्यर्थग्रहणम् । तेन पर्यायप्रयोगेऽपि भवति । अन्यो देवदत्तात्। भिन्नो देवदत्तात् । अर्थान्तरं देवदत्तात् । विलक्षणो देवदत्तात् ।

(२) आराच्छब्दो दूरान्तिकार्थे वर्त्तते । तत्र 'दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्' (२.३.३४) इति प्राप्ते पञ्चमी विधीयते । आराद्देवदत्तात् । आराद्यज्ञदत्तात् ।

(३) 'इतर' इति निर्दिश्यमानस्य प्रतियोगी पदार्थ उच्यते । इतरो देवदत्तात्।

(४) 'ऋते' इति अव्ययं वर्जनार्थे । ऋते देवदत्तात् । ऋते यज्ञदत्तात् ।

(५) दिक्शब्दः - पूर्वो ग्रामात् पर्वतः । उत्तरो ग्रामात् । पूर्वो ग्रीष्माद्वसन्तः। उत्तरो ग्रीष्मो वसन्तात् । 'दिक्शब्द' इत्यत्र शब्दग्रहणं देशकालवृत्तिनापि दिक्शब्देन योगे यथा स्यात्; इतरथा हि दिग्वृत्तिनैव स्यात् - इयमस्याः पूर्वेति । इह तु न स्यात् - अयमस्मात्पूर्वः काल इति ।

(६) अञ्चूत्तरपद - प्राग् ग्रामात् । प्रत्यग् ग्रामात् (म. भा.) । ननु चायमपि दिक्शब्द एव? 'षष्ठ्यतसर्थप्रत्ययेन' (२.३.३०) इति वक्ष्यति, तस्यायं पुरस्तादपकर्षः ।

(७) आच् - दक्षिणा ग्रामात् । उत्तरा ग्रामात् ।

(८) आहि - दक्षिणाहि ग्रामात् । उत्तराहि ग्रामात् ॥

४९१. षष्ठ्यतसर्थप्रत्ययेन ॥ ३० ॥ (३०९)

'दक्षिणोत्तराभ्यामतसुच्' (५.३.२८) इति वक्ष्यति, तस्येदं ग्रहणम् । अतसर्थेन प्रत्ययेन युक्ते षष्ठी विभक्तिर्भवति । दक्षिणतो ग्रामस्य । उत्तरतो ग्रामस्य । [पुरो ग्रामस्य] पुरस्ताद् ग्रामस्य । उपरि ग्रामस्य । उपरिष्टाद् ग्रामस्य (म. भा.) ॥

४९२. एनपा द्वितीया ॥ ३१ ॥ (६१०)

'एनबन्यतरस्यामदूरेऽपञ्चम्याः' (५.३.३५) इति वक्ष्यति । तेन युक्ते द्वितीया विभक्तिर्भवति । पूर्वेण षष्ठ्यां प्राप्तायामिदं वचनम् । दक्षिणेन ग्रामम् । उत्तरेण ग्रामम् ।

षष्ठ्यपीष्यते - दक्षिणेन ग्रामस्य । उत्तरेण ग्रामस्य । तदर्थं योगविभागः कर्तव्यः ॥

४९३. पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् ॥ ३२ ॥ (६०३)

पञ्चमीग्रहणम् [इह] अनुवर्त्तते । पृथक्, विना, नाना - इत्येतैर्योगे तृतीया विभक्तिर्भवति, अन्यतरस्यां पञ्चमी च । पृथग् देवदत्तेन, पृथग् देवदत्तात् । विना देवदत्तेन, विना देवदत्तात् । नाना देवदत्तेन, नाना देवदत्तात् । 'पृथग्विनानानाभि' इति योगविभागो द्वितीयार्थः ॥

विना वातं विना वर्षं विद्युत्प्रपतनं विना ।
विना हस्तिकृतान् दोषान् केनेमौ पातितौ द्रुमौ ॥

४९४. करणे च स्तोकाल्पकृच्छ्रकतिपयस्या-सत्त्ववचनस्य ॥ ३३ ॥ (६०४)

स्तोक, अल्प, कृच्छ्र, कतिपय - इत्येतेभ्योऽसत्त्ववचनेभ्यः करणे कारकेऽन्यतरस्यां तृतीया भवति । पञ्चम्यत्र पक्षे विधीयते, तृतीया तु करण इत्येव सिद्धा । यदा तु धर्ममात्रं करणतया विवक्ष्यते न द्रव्यम्, तदा स्तोकादीनामसत्त्ववचनता । स्तोकान्मुक्तः, स्तोकेन मुक्तः । अल्पान्मुक्तः, अल्पेन मुक्तः । कृच्छ्रान्मुक्तः, कृच्छ्रेण मुक्तः । कतिपयान्मुक्तः, कतिपयेन मुक्तः ।

असत्त्ववचनस्येति किम्? स्तोकेन विषेण हतः । अल्पेन मधुना मत्तः । करण इति किम्? क्रियाविशेषणे कर्मणि मा भूत् - स्तोकं मुञ्चति ॥

४९५. दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् ॥ ३४ ॥ (६११)

पञ्चम्यनुवर्त्तते । दूरान्तिकार्थैः शब्दैर्योगे षष्ठी विभक्तिर्भवत्यन्यतरस्यां पञ्चमी च । दूरं ग्रामात्, दूरं ग्रामस्य (म. भा.) । विप्रकृष्टं ग्रामात्, विप्रकृष्टं ग्रामस्य । अन्तिकं ग्रामात्, अन्तिकं ग्रामस्य । अभ्याशं ग्रामात्, अभ्याशं ग्रामस्य । अन्यतरस्यांग्रहणं पञ्चम्यर्थम्, इतरथा हि तृतीया पक्षे स्यात् ॥

४९६. दूरान्तिकार्थेभ्यो द्वितीया च ॥ ३५ ॥ (६०५)

पञ्चम्यनुवर्त्तते । दूरान्तिकार्थेभ्यः शब्देभ्यो द्वितीया विभक्तिर्भवति, चकारात्पञ्चमी तृतीयापि समुच्चीयते । दूरं ग्रामस्य, दूराद् ग्रामस्य, दूरेण ग्रामस्य (म. भा.) । अन्तिकं ग्रामस्य, अन्तिकाद् ग्रामस्य, अन्तिकेन ग्रामस्य ।

प्रातिपदिकार्थे विधानम् । असत्त्ववचनग्रहणं चानुवर्त्तते । सत्त्वशब्देभ्यो यथायथं विभक्तयो भवन्ति दूरः पन्थाः, दूराय पथे देहि, दूरस्य पथः स्वम् ॥

४९७. सप्तम्यधिकरणे च ॥ ३६ ॥ (६३३)

सप्तमी विभक्तिर्भवत्यधिकरणे कारके, चकाराद् दूरान्तिकार्थेभ्यश्च । कटे आस्ते । शकटे आस्ते । स्थाल्यां पचति । दूरान्तिकार्थेभ्यः खल्वपि - दूरे ग्रामस्य, अन्तिके ग्रामस्य, अभ्याशे ग्रामस्य । दूरान्तिकार्थेभ्यश्चतस्रो विभक्तयो भवन्ति, द्वितीयातृतीयापञ्चमीसप्तम्यः।

सप्तमीविधाने क्तस्येन्विषयस्य कर्मण्युपसंख्यानम् (म. भा. २.३.३६ वा. १) ।

अधीती व्याकरणे । परिगणिती याज्ञिके । आम्नाती छन्दसि ।

साध्वसाधुप्रयोगे च सप्तमी वक्तव्या (म. भा. वा. २) ।

साधुर्देवदत्तो मातरि । असाधुः पितरि ।

कारकार्हाणां च कारकत्वे सप्तमी वक्तव्या (म. भा. वा. ३) ।
ऋद्धेषु भुञ्जानेषु दरिद्रा आसते । ब्राह्मणेषु तरत्सु वृषला आसते ।
कारकार्हाणां चाकारकत्वे सप्तमी वक्तव्या (म. भा. वा. ४) ।
दरिद्रेष्वासीनेषु ऋद्धा भुञ्जते । वृषलेष्वासीनेषु ब्राह्मणास्तरन्ति ।
तद्विपर्यासे च सप्तमी वक्तव्या (म. भा., वा.) ।
ऋद्धेष्वासीनेषु दरिद्रा भुञ्जते । ब्राह्मणेष्वसीनेषु वृषलास्तरन्ति ।
निमित्तात्कर्मसंयोगे सप्तमी वक्तव्या (म. भा. २.३.३६ वा.) ।
चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥ (म. भा.)

४९८. यस्य च भावेन भावलक्षणम् ॥ ३७ ॥ (७३४)

'सप्तमी' इति वर्तते । भावः क्रिया । यस्य च भावेन यस्य च क्रियया क्रियान्तरं लक्ष्यते ततो भाववतः सप्तमी विभक्तिर्भवति । प्रसिद्धा च क्रिया क्रियान्तरं लक्ष्यति । गोषु दुह्यमानासु गतः । दुग्धास्वागतः। अग्निषु हूयमानेषु गतः। हुतेष्वागतः (म. भा.) ।

भावेनेति किम्? यो जटाभिः स भुङ्क्ते । पुनर्भावग्रहणं किम्? यो भुङ्क्ते स देवदत्तः॥

४९९. षष्ठी चानादरे ॥ ३८ ॥ (६३५)

पूर्वेण सप्तम्यां प्राप्तायां षष्ठी विधीयते, चकारात् सापि भवति । अनादराधिक्ये भावलक्षणे भाववतः षष्ठीसप्तम्यौ विभक्ती भवतः । रुदतः प्राव्राजीत्, रुदति प्राव्राजीत् । क्रोशतः प्राव्राजीत्, क्रोशति प्राव्राजीत् । क्रोशन्तमनादृत्य प्रव्रजित इत्यर्थः ॥

५००. स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ॥ ३९ ॥ (६३६)

षष्ठीसप्तम्यौ वर्तेते । स्वामिन्, ईश्वर, अधिपति, दायाद, साक्षिन्, प्रतिभू, प्रसूत - इत्येतैर्योगे षष्ठीसप्तम्यौ विभक्ती भवतः । गवां स्वामी, गोषु स्वामी । गवामीश्वरः, गोष्वीश्वरः । गवामधिपतिः, गोष्वधिपतिः । गवां दायादः, गोषु दायादः। गवां साक्षी, गोषु साक्षी । गवां प्रतिभूः, गोषु प्रतिभूः । गवां प्रसूतः, गोषु प्रसूतः। षष्ठ्यामेव प्राप्तायां पक्षे सप्तमीविधानार्थं वचनम् ॥

५०१. आयुक्तकुशलाभ्यां चासेवायाम् ॥ ४० ॥ (६३७)

षष्ठीसप्तम्यौ वर्तेते । आयुक्तः=व्यापारितः, कुशलः=निपुणः ताभ्यां योगे आसेवायां गम्यमानायां षष्ठीसप्तम्यौ विभक्ती भवतः । आसेवा तात्पर्यम् । आयुक्तः कटकरणस्य । आयुक्तः कटकरणे । कुशलः कटकरणस्य । कुशलः कटकरणे। आसेवायामिति किम्? आयुक्तो गौः शकटे। तत्र सप्तम्येवाधिकरणे भवति ॥

५०२. यतश्च निर्धारणम् ॥ ४१ ॥ (६३८)

षष्ठीसप्तम्यौ वर्तेते । जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणम् निर्द्धारणम् । यतो निर्द्धारणं ततः षष्ठीसप्तम्यौ विभक्ती भवतः । मनुष्याणां क्षत्रियः शूरतमः । मनुष्येषु क्षत्रियः शूरतमः । गवां कृष्णा सम्पन्नक्षीरतमा । गोषु कृष्णा संपन्नक्षीरतमा । अध्वगानां धावन्तः शीघ्रतमाः । अध्वगेषु धावन्तः शीघ्रतमाः ॥

५०३. पञ्चमी विभक्ते ॥ ४२ ॥ (६३९)

'यतश्च निर्द्धारणम्' इति वर्तते । षष्ठीसप्तम्यपवादो योगः। विभागः=विभक्तम्। यस्मिन्निर्द्धारणाश्रये विभक्तमस्यास्ति ततः पञ्चमी विभक्तिर्भवति । माथुराः पाटलिपुत्रकेभ्यः सुकुमारतराः । आढ्यतराः ॥

५०४. साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः ॥ ४३ ॥ (६४०)

साधु, निपुण - इत्येताभ्यां योगेऽर्चायां गम्यमानायां सप्तमी विभक्तिर्भवति न चेत् प्रतिः प्रयुज्यते । मातरि साधुः । पितरि साधुः । मातरि निपुणः । पितरि निपुणः ।

अर्चायामिति किम्? साधुर्भृत्यो राज्ञः । तत्त्वकथने न भवति । अप्रतेरिति किम्? साधुर्देवदत्तो मातरं प्रति (म. भा.) ।

अप्रत्यादिभिरिति वक्तव्यम् (म. भा. २.३.४३ वा. १) । साधुर्देवदत्तो मातरं परि । मातरमनु (म. भा.) ॥

५०५. प्रसितोत्सुकाभ्यां तृतीया च ॥ ४४ ॥ (६४१)

प्रसित, उत्सुक - इत्येताभ्यां योगे तृतीया विभक्तिर्भवति, चकारात्सप्तमी च । प्रसितः=प्रसक्तः, यस्तत्र नित्यमेवावबद्धः स प्रसितशब्देनोच्यते । केशैः प्रसितः, केशेषु प्रसितः। केशैरुत्सुकः ॥

५०६. नक्षत्रे च लुपि ॥ ४५ ॥ (६४२)

तृतीयासप्तम्यावनुवर्तेते । लुबन्तान्नक्षत्रशब्दात् तृतीयासप्तम्यौ विभक्ती भवतः। पुष्येण (४.२.३,४) पायसमश्नीयात् । पुष्ये पायसमश्नीयात् । मघाभिः पललौदनम्। मघासु पललौदनम्।

नक्षत्र इति किम्? पञ्चालेषु (४.२-६९, ८१) वसति । लुपीति किम्? मघासु ग्रहः । इह कस्मान्न भवति - अद्य पुष्यः, अद्य कृत्तिका (म. भा.)? 'अधिकरणे' इति वर्तते । वचनं तु पक्षे तृतीयाविधानार्थम् ॥

५०७. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ॥ ४६ ॥ (५६२)

प्रातिपदिकार्थः=सत्ता । लिङ्गम्=स्त्रीलिङ्गपुल्लिङ्गनपुंसकानि । परिमाणम् द्रोणः, खारी, आढकम् (म. भा.) । वचनम् एकत्वद्वित्वबहुत्वानि । मात्रशब्दः प्रत्येकमभिसंबध्यते । प्रातिपदिकार्थमात्रे लिङ्गमात्रे परिमाणमात्रे वचनमात्रे प्रथमा विभक्तिर्भवति ।

प्रातिपदिकार्थमात्रे - उच्चैः । नीचैः ।

लिङ्गग्रहणं किम्? कुमारी, वृक्षः, कुण्डम् (म. भा.) इत्यत्रापि यथा स्यात्। परिमाणग्रहणं किम्? द्रोणः, खारी, आढकम् - इत्यत्रापि यथा स्यात् ।

वचनग्रहणं किम्? एकत्वादिषूक्तेष्वपि यथा स्यात्-एकः द्वौ, बहवः (म. भा.) ।

प्रातिपदिकग्रहणं किम्? निपातस्यानार्थकस्य प्रातिपदिकत्वमुक्तम्, ततोऽपि यथा स्यात्-प्रलम्बते । अध्यागच्छति ॥

५०८. सम्बोधने च ॥ ४७ ॥ (५३३)

आभिमुख्यकरणं संबोधनम्, तदधिके प्रातिपदिकार्थे प्रथमा न प्राप्नोतीति वचनमारभ्यते। संबोधने च प्रथमा विभक्तिर्भवति । हे देवदत्त ! हे देवदत्तौ ! हे देवदत्ताः ॥

५०९. साऽऽमन्त्रितम् ॥ ४८ ॥ (४११)

संबोधने या प्रथमा तदन्तं शब्दरूपमामन्त्रितसंज्ञं भवति । तथा चैवोदाहृतम्।

आमन्त्रितप्रदेशाः - 'आमन्त्रितं पूर्वमविद्यमानवद्' (८.१.७२) इत्येवमादयः॥

५१०. एकवचनं संबुद्धिः ॥ ४९ ॥ (१९२)

आमन्त्रितप्रथमाया यदेकवचनं तत्संबुद्धिसंज्ञं भवति । हे पटो ! हे देवदत्त!

संबुद्धिप्रदेशः - 'एङ्ह्रस्वात्संबुद्धेः' (६.१.६९) इत्येवमादयः ॥

५११. षष्ठी शेषे ॥ ५० ॥ (६०६)

कर्मादिभ्यो योऽन्यः प्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिसंबन्धादिः शेषस्तत्र षष्ठी विभक्तिर्भवति । राज्ञः पुरुषस्य गृहम् । पशोः पादः । पितुः पुत्रः ॥

५१२. ज्ञोऽविदर्थस्य करणे ॥ ५१ ॥ (६१२)

जानातेरविदर्थस्याज्ञानार्थस्य करणे कारके षष्ठी विभक्तिर्भवति । सर्पिषो जानीते । मधुनो जानीते । सर्पिषा करणेन प्रवर्तत इत्यर्थः ।

प्रवृत्तिवचनो जानातिरविदर्थः । अथवा-मिथ्याज्ञानवचनः । सर्पिषि रक्तः प्रतिहतो वा । चित्तभ्रान्त्या तदात्मना सर्वमेव ग्राह्यं प्रतिपद्यते । मिथ्याज्ञानमज्ञानमेव ।

अविदर्थस्येति किम्? स्वरेण पुत्रं जानाति ॥

४१३. अधीगर्थदयेशां कर्मणि ॥ ५२ ॥ (६१३)

'शेषे' इति वर्तते । अधीगर्थाः स्मरणार्थाः 'दय दानगतिरक्षणेषु' (धा. पा. ४८१), 'ईश ऐश्वर्ये' (१०२१) - एतेषां कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति । मातुरध्येति । मातुः स्मरति । सर्पिषो दयते । सर्पिष ईष्टे । मधुन ईष्टे ।

कर्मणीति किम्? मातुर्गुणैः स्मरति । शेष इति किम्? मातरं स्मरति ॥

५१४. कृञः प्रतियत्ने ॥ ५३ ॥ (६१४)

सतो गुणान्तराधानम्=प्रतियत्नः । करोतेः कर्मणि कारके शेषत्वेन विवक्षिते प्रतियत्ने गम्यमाने षष्ठी विभक्तिर्भवति । एधोदकस्योपस्कुरुते । शस्त्रपत्रस्योपस्कुरुते।

प्रतियत्न इति किम्? कटं करोति । कर्मणीति किम्? एधोदकस्योपस्कुरुते प्रज्ञया । शेष इत्येव एधोदकमुपस्कुरुते ॥

५१५. रुजार्थानां भाववचनानामज्वरेः ॥ ५४ ॥ (६१५)

रुजार्थानां धातूनां भाववचनानां भावकर्तृकाणां ज्वरिवर्जितानां कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति । चौरस्य रुजति रोगः । चौरस्यामयत्यामयः।

रुजार्थानामिति किम्?

एति जीवन्तमानन्दो नरं वर्षशतादपि ।
जीव पुत्रक मामैवं तपः साहसमाचर ॥

भाववचनानामिति किम्? नदी कूलानि रुजति (म. भा.) । अज्वरेरिति किम्? चौरं ज्वरयति ज्वरः ।

अज्वरिसंताप्योरिति वक्तव्यम् (म. भा. २.३.५४ वा० १) । चौरं संतापयति तापः । शेष इत्येव - चौरं रुजति रोगः ॥

५१६. आशिषि नाथः ॥ ५५ ॥ (६१६)

'नाधृ नाथृ याच्ञोपतापैश्वर्याशीःषु' (धा. पा. ६,७) पठ्यते, तस्याशीः- क्रियस्य कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति । सर्पिषो नाथते । मधुनो नाथते ।

आशिषीति किम्? माणवकमुपनाथति, अङ्ग पुत्रकाधीष्व ॥

५१७. जासिनिप्रहणनाटक्राथपिषां हिंसायाम् ॥ ५६ ॥ (६१७)

जासि, निप्रहण, नाट, क्राथ, पिष् - इत्येतेषां धातूनां हिंसाक्रियाणां कर्मणि कारके षष्ठी विभक्तिर्भवति । 'जसु हिंसायाम्' (धा.पा. १७१९) इति च चुरादौ पठ्यते तस्येदं ग्रहणम्, न दैवादिकस्य-'जसु मोक्षणे (धा. पा. १६६९) 'जसु ताडने' (धा. पा. १२१२) इत्यस्य । चौरस्योज्जासयति । वृषलस्योज्जासयति ।

'निप्रहण' इति संघातविगृहीतविपर्यस्तस्य ग्रहणम् । चौरस्य निप्रहन्ति । चौरस्य निहन्ति । चौरस्य प्रहन्ति । चौरस्य प्रणिहन्ति । चौरस्योन्नाटयति । वृषलस्योन्नाटयति । चौरस्योत्क्राथयति । वृषलस्य क्राथयति ।

निपातनाद् वृद्धिः। अयं हि घटादौ पठ्यते - 'श्रथ क्नथ क्रथ क्लथ हिंसार्थाः' (धा. पा. ७९९-८०२) इति, तत्र 'घटादयो मितः' (धा. पा. ७६३-८२२) इति मित्संज्ञायाम् 'मितां ह्रस्वः' (६.४.९२) इति ह्रस्वत्वं स्यात् । चौरस्य पिनष्टि । वृषलस्य पिनष्टि ।

हिंसायामिति किम्? धानाः पिनष्टि । शेष इत्येव - चौरमुज्जासयति । एषामिति किम्? चौरं हिनस्ति । निप्रहण इति किम्? चौरं विहन्ति ॥

४१८. व्यवहृपणोः समर्थयोः ॥ ५७ ॥ (६१८)

व्यवहृ, पण इत्येतयोः समर्थयोः समानार्थयोः कर्मणि कारके षष्ठीविभक्तिर्भवति। द्यूते क्रयविक्रयव्यवहारे च समानार्थत्वमनयोः । शतस्य व्यवहरति । सहस्रस्य व्यवहरति । शतस्य पणते । सहस्रस्य पणते । आयप्रत्ययः कस्मान्न भवति ? स्तुत्यर्थस्य पणतेरायप्रत्यय इष्यते।

समर्थयोरिति किम्? शलाकां व्यवहरति । गणयतीत्यर्थः । ब्राह्मणान् पणायते। स्तौतीत्यर्थः । शेष इत्येव-शतं पणते ।

५१९. दिवस्तदर्थस्य ॥ ५८ ॥ (६१९)

व्यवहृपणिसमानार्थस्य दीव्यतेः कर्मणि षष्ठी विभक्तिर्भवति । शतस्य दीव्यति। सहस्रस्य दीव्यति । तदर्थस्येति किम्? ब्राह्मणं दीव्यति । योगविभाग उत्तरार्थः ।

४२०. विभाषोपसर्गे ॥ ५९ ॥ (६२०)

'दिवस्तदर्थस्य' (२.३.५८) इति नित्यं षष्ठ्यां प्राप्तायां सोपसर्गस्य विकल्प उच्यते । उपसर्गे सति दिवस्तदर्थस्य कर्मणि कारके विभाषा षष्ठी विभक्तिर्भवति। शतस्य प्रतिदीव्यति। सहस्रस्य प्रतिदीव्यति । शतं प्रतिदीव्यति । सहस्रं प्रतिदीव्यति।

उपसर्गस्येति किम्? शतस्य दीव्यति । तदर्थस्येत्येव - शलाकां प्रतिदीव्यति।

५२१. द्वितीया ब्राह्मणे ॥ ६० ॥ (३३९५)

ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि कारके द्वितीया विभक्तिर्भवति । गामस्य तदहः सभायां दीव्येयुः (मै. सं. १.६.११.५६) ।

अनुपसर्गस्य षष्ठ्यां प्राप्तायामिदं वचनम् । सोपसर्गस्य तु छन्दसि व्यवस्थितविभाषयापि सिद्ध्यति ।

५२२. प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने ॥ ६१ ॥ (६२१)

'प्रेष्य' इति इष्यतेर्दैवादिकस्य लोण्मध्यमपुरुषस्यैकवचनम्, तत्साहचर्याद् ब्रुविरपि तद्विषय एव गृह्यते । प्रेष्यब्रुवोर्हविषः कर्मणः षष्ठी विभक्तिर्भवति देवतासंप्रदाने सति । 'अग्नेये छागस्य हविषो वपाया मेदसः प्रेश्ष्य' (का. श्रौ. सू. ६.६.२६) 'अग्नये छागस्य हविषो वपाया मेदसोऽनुब्रूहि' (का. श्रौ. सू. ६.६.२०)।

प्रेष्यब्रुवोरिति किम्? 'अग्नये छागं हविर्वपां मेदो जुहुधि' (का. श्रौ. सू. ६.६.३) । हविष इति किम्? 'अग्नये गोमयानि प्रेष्य' (श. ब्रा. १२.५.२ ३) देवतासंप्रदान इति किम्? माणवकाय पुरोडाशं प्रेष्य ।

हविषः प्रस्थितस्य प्रतिषेधो वक्तव्यः (म. भा. २.३.६१ वा. १) 'इन्द्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य' (का. श्रौ. सू. ६.६.२३) !।

५२३. चतुर्थ्यर्थे बहुलं छन्दसि ॥ ६२ ॥ (३३९६)

छन्दसि विषये चतुर्थ्यर्थे षष्ठी विभक्तिर्भवति बहुलम् । पुरुषमृगश्चन्द्रमसः (वा. सं. २४.३५) । पुरुषमृगश्चन्द्रमसे । 'गोधा कालका दार्वाघाटस्ते वनस्पती - नाम् । ते वनस्पतिभ्यः (वा. सं. २४.३५) ।

बहुलग्रहणं किम्? 'कृष्णो रात्र्यै' (का. सं. ६८.४०) । 'हिमवते हस्ती (वा. सं. २४.३०) ।

षष्ठ्यर्थे चतुर्थी वक्तव्या (म.भा.२.३.६२ वा.१) । या खर्वेण पिबति तस्यै खर्वो जायते । या दतो धावति तस्यै श्यावदन् । धा नखानि निकृन्तते तस्यै कुनखी । याऽऽङ्क्ते तस्यै काणः। याऽभ्यङ्क्ते तस्यै दुश्चर्मा । या केशान् प्रलिखति तस्य खलतिः (तै.सं. २५.१.६) । 'अहल्यायै जारः' (श.ब्रा. ३.३.१.१९) ॥

५२४. यजेश्च करणे ॥ ६३ ॥ (६६९७)

यजेर्धातोः करणे कारके छन्दसि बहुलं षष्ठी विभक्तिर्भवति । 'घृतस्य यजते' (श. ब्रा. ४.४.२.४) । घृतेन यजते । 'सोमस्य यजते ' (श. ब्रा. ४.४.२.५) । सोमेन यजते ॥

५२५. कृत्वोऽर्थप्रयोगे कालेऽधिकरणे ॥ ६४ ॥ (६२२)

'छन्दसि बहुलम्' इति निवृत्तम्। कृत्वोऽर्थानां प्रत्ययानां प्रयोगे कालेऽधिकरणे षष्ठी विभक्तिर्भवति । पञ्चकृत्वोऽह्नो भुङ्क्ते । द्विरह्नोऽधीते ।

कृत्वोऽर्थग्रहणं किम्? अह्नि शेते । रात्रौ शेते । प्रयोगग्रहणं किम्? अहनि भुक्तम् । गम्यते हि द्विस्त्रिश्चतुर्वेति, न त्वप्रयुज्यमाने भवति । कालग्रहणं किम्? द्विः कांस्यापात्र्यां भुङ्क्ते । अधिकरण इति किम् ? द्विरह्नो भुङ्क्ते । शेष इत्येव - द्विरहन्यधीते ॥

५२६. कर्तृकर्मणोः कृति ॥ ६५ ॥ (६२३)

कृत्प्रयोगे कर्तरि कर्मणि च षष्ठी विभक्तिर्भवति । भवतः शायिका । भवत आसिका । कर्मणि - अपां स्रष्टा । 'पुरां भेत्ता' (ऋ. ८.१७.१४) । 'वज्रस्य भर्त्ता' (तै. सं. १.४.२८.१) ।

कर्तृकर्मणोरिति किम्? शस्त्रेण भेत्ता । कृतीति किम्? तद्धितप्रयोगे मा भूत् -कृतपूर्वी कटम् । भुक्तपूर्व्योदनम् (म. भा.) ।

शेष इति निवृत्तम्, पुनः कर्मग्रहणात्; इतरथा हि कर्तरि च कृति इत्येव ब्रूयात् ॥

५२७. उभयप्राप्तौ कर्मणि ॥ ६६ ॥ (६२४)

पूर्वेण षष्ठी प्राप्ता नियम्यते । 'उभयप्राप्तौ' इति बहुव्रीहिः- उभयोः प्राप्तिर्यस्मिन्कृति सोऽयमुभयप्राप्तिः । तत्र कर्मण्येव षष्ठी विभक्तिर्भवति, न कर्तरि । आश्चर्यो गवां दोहोऽगोपालकेन। रोचते मे ओदनस्य भोजनं देवदत्तेन। साधु खलु पयसः पानं यज्ञदत्तेन । बहुव्रीहिविज्ञानादिह नियमो न भवति - आश्चर्यमिदमोदनस्य नाम पाको ब्राह्मणानां च प्रादुर्भाव इति ॥

अकाकारयोः स्त्रीप्रत्यययोः प्रयोगे नेति वक्तव्यम् (म. भा. २.३.६६ वा. २) । भेदिका देवदत्तस्य काष्ठानाम् । चिकीर्षा देवदत्तस्य कटस्य ॥

शेषे विभाषा (म. भा., वा. ३) । अकाकारयोः स्त्रीप्रत्यययोर्ग्रहणात् तदपेक्षया शेषः स्त्रीप्रत्यय एव गृह्यते । विचित्रा हि सूत्रस्य कृतिः पाणिनेः, पाणिनिना वा (म. भ.) ॥

केचिदविशेषेणैव विभाषामिच्छन्ति-शब्दानामनुशासनमाचार्येण, आचार्यस्येति वा ॥

५२८. क्तस्य च वर्तमाने ॥ ६७ ॥ (६२५)

'न लोकाव्ययनिष्ठाखलर्थतृनाम्' (२.३.६९) इति प्रतिषेधे प्राप्ते पुनः षष्ठी विधीयते । क्तस्य वर्तमानकालविहितस्य प्रयोगे षष्ठी विभक्तिर्भवति । राज्ञां मतः । राज्ञां बुद्धः । राज्ञां पूजितः ।

क्तस्येति किम्? ओदनं पचमानः । वर्तमान इति किम्? ग्रामं गतः ।

नपुंसके भाव उपसंख्यानम् (म. भा. २.३.६७ वा. १) । छात्त्रस्य हसितम् । मयुरस्य नृत्तम् । कोकिलस्य व्याहृतम् (म. भा.) ।

शेषविज्ञानात् सिद्धम् (म. भा. २.३.६७ वा. २) । तथा च कर्तृविवक्षायां तृतीयापि भवति छात्त्रेण हसितमिति ॥

५२९. अधिकरणवाचिनश्च ॥ ६८ ॥ (६२६)

'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः' (३.४.७६) इति वक्ष्यति, तस्य प्रयोगे षष्ठी विभक्तिर्भवति । अयमपि प्रतिषेधापवादो योगः । इदमेषामासितम्। इदमेषां शयितम् । इदमहेः सृप्तम् (म. भा.) । इदं वनकपेर्यातम् । इदमेषां भुक्तम् । इदमेषामशितम् ।

द्विकर्मकाणां प्रयोगे कर्तरि कृति द्वयोरपि षष्ठी द्वितीयावत् । नेताऽश्वस्य ग्रामस्य चैत्रः । अन्ये प्रधाने कर्मण्याहुः, तदा-नेताश्वस्य ग्रमं चैत्रः ॥

५३०. न लोकाव्ययनिष्ठाखलर्थतृनाम् ॥ ६९ ॥ (६२७)

'कर्तृकर्मणोः कृति' (२.३.३५) इति षष्ठी प्राप्ता प्रतिषिध्यते । ल, उ, उक, अव्यय, निष्ठा, खलर्थ, तृन्-इत्येतेषां प्रयोगे षष्ठी विभक्तिर्न भवति ।

'ल' इति शतृशानचौ (३.२.१२४) कानच्क्वसू (३.२.१०६, १०७) किकिनौ (३.२.१८१) च गृह्यन्ते-ओदनं पचन् । ओदनं पचमानः । ओदनं पेचानः। ओदनं पेचिवान्। पपिः सोम ददिर्गाः (ऋ. ६.२३.४) । उ-कटं चिकीर्षुः (३.२.१६८) । ओदनं बुभुक्षुः (म. भा.) । कन्यामलंकरिष्णुः (३.२.१३६) । इष्णुचोऽपि प्रयोगे निषेधः। उक-आगामुकं (३.२.१२४) वाराणसीं रक्ष आहुः।

उकप्रतिषेधे कमेर्भाषायामप्रतिषेधः (म. भा. २.३.६९ वा. ४) । दास्याः कामुकः । अव्यय-कटं कृत्वा । ओदनं भुक्त्वा (३.४.२१) ।

अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः (म. भा. २.३.६९ वा. ५)। व्युष्टायां पुरा सूर्यस्योदेतोराधेयः (३.४.१६) । (काठ. सं. ८.३) पुरा क्रूरस्य विसृपो विरप्शिन् (३.१.१७) । (तै. सं. १.१.९.३) निष्ठा - ओदनं भुक्तवान् । देवदत्तेन कृतम् । खलर्थ- ईषत्करः (३.३.१२६) कटो भवता ।

ईषत्पानः (३.३.१२८) सोमो भवता । तृन्निति प्रत्याहारग्रहणम्, 'लटः शतृशानचौ' (३.२.१२४) इत्यारभ्य आ तृनो नकारात् । तेन शानन्-चानश्-शतृ-तृनामपि प्रतिषेधो भवति (म. भा.) । सोमं पवमानः (३.३.१२८) । नडमाध्नानः (३.२.१२९) ।

अधीयन् (३.२.१३०) पारायणम् (म. भा.) । कर्ता (३.२.१२४) कटान् । वदिता जनापवादान् । द्विषः शतुर्वा वचनम् (म. भा. २.३.६९ वा० ७) । चौरं द्विषन् । चौरस्य द्विषन्॥

५३१. अकेनोर्भविष्यदाधमर्ण्ययोः ॥ ७० ॥ (६२८)

अकस्य भविष्यति काले विहितस्य, इनस्तु भविष्यति चाधमर्ण्ये च विहितस्य प्रयोगे षष्ठी विभक्तिर्न भवति । कटं कारको (३.३.१०) व्रजति । ओदनं भोजको (म. भा.) व्रजति । इनः खल्वपि - ग्रामं गमी (३.३.३) । ग्रामं गामी । आधमर्ण्ये शतं दायी (३.३.१७०) । सहस्रं दायी (म. भा.) ।

भविष्यदाधमर्ण्ययोरिति किम्? यवानां लावकः (३.१.१३३) । सक्तूनां पायकः। अवश्यंकारी (३.३.१७०) कटस्य ।

इह कस्मान्न भवति - वर्षशतस्य पूरकः पुत्रपौत्राणां दर्शक इति ? भविष्यदधिकारे विहितस्याकस्येदं ग्रहणम् ॥

५३२. कृत्यानां कर्तरि वा ॥ ७१ ॥ (६२९)

'कृर्तृकर्मणोः कृति' (२.३.६) इति नित्यं षष्ठी प्राप्ता कर्त्तरि विकल्प्यते । कृत्यानां प्रयोगे कर्तरि वा षष्ठी विभक्तिर्भवति, न कर्मणि । भवता कटः कर्तव्यः। भवतः कटः कर्तव्यः।

कर्त्तरीति किम्? गेयो माणवकः साम्नाम् (म. भा.)

उभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेधो वक्तव्यः (म. भा. २.३.७१) । क्रष्टव्या ग्रामं शाखा देवदत्तेन । नेतव्या ग्राममजा देवदत्तेन ॥

५३३. तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम् ॥ ७२ ॥ (६३०)

तुल्यार्थैः शब्दैर्योगे तृतीया विभक्तिर्भवत्यन्यतरस्याम्, पक्षे षष्ठी च, तुलोपमाशब्दौ वर्जयित्वा । शेषे विषये तृतीयाविधानात् तया मुक्ते षष्ठ्येव भवति। तुल्यो देवदत्तेन, तुल्यो देवदत्तस्य । सदृशो देवदत्तेन, सदृशो देवदत्तस्य ।

अतुलोपमाभ्यामिति किम्? तुला देवदत्तस्य नास्ति । उपमा कृष्णस्य न विद्यते । वेति वर्तमानेऽन्यतरस्यांग्रहणमुत्तरसूत्रे तस्य चकारेणानुकर्षणार्थम्; इतरथा हि तृतीयानुकृष्येत॥

५३४. चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः ॥ ७३ ॥ (६३१)

आशिषि गम्यमानायाम् आयुष्य, मद्र, भद्र, कुशल, सुख, अर्थ, हित- इत्येतैर्योगे चतुर्थी विभक्तिर्भवति । चकारो विकल्पानुकर्षणार्थः । शेषे चतुर्थीविधानात्तया मुक्ते षष्ठी विभक्तिर्भवति ।

अत्रायुष्यादीनां पर्यायग्रहणं कर्त्तव्यम् । आयुष्यं देवदत्ताय देवदत्तस्य वा भूयात् । चिरं जीवितं देवदत्ताय देवदत्तस्य वा भूयात् । मद्रं देवदत्ताय देवदत्तस्य वा भूयात् । भद्रं देवदत्ताय, भद्रं देवदत्तस्य । कुशलं देवदत्ताय । कुशलं देवदत्तस्य । निरामयं देवदत्ताय, निरामयं देवदत्तस्य। सुखं देवदत्ताय, सुखं देवदत्तस्य । शं देवदत्ताय, शं देवदत्तस्य । अर्थो देवदत्ताय, अर्थो देवदत्तस्य। प्रयोजनं देवदत्ताय, प्रयोजनं देवदत्तस्य । हितं देवदत्ताय, हितं देवदत्तस्य । पथ्यं देवदत्ताय, पथ्यं देवदत्तस्य ।

आशिषीति किम्? आयुष्यं देवदत्तस्य तपः ॥

॥ इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ द्वितीयाध्यायस्य तृतीयः पादः॥

अथ द्वितीयाध्याये
चतुर्थः पादः

५३५. द्विगुरेकवचनम् ॥ १ ॥ (७३१)

द्विगुः समासः एकवचनं भवति । एकस्य वचनम्=एकवचनम् । एकस्यार्थस्य वाचको भवतीत्यर्थः । तदनेन प्रकारेण द्विग्वर्थस्यैकवद्भावो विधीयते, द्विग्वर्थ एकवद्भवतीति । समाहारद्विगोश्चेदं ग्रहणम्, नान्यस्य । पञ्चपूलाः समाहृताः पञ्चपूली । दशपूली । द्विग्वर्थस्यैकत्वादनुप्रयोगेऽप्येकवचनं भवति - पञ्चपूलीयं शोभनेति ॥

५३६. द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् ॥ २ ॥ (९०६)

'एकवचनम्' इति वर्तते । अङ्गशब्दस्य प्रत्येकं वाक्यपरिसमाप्त्या त्रीणि वाक्यानि संपद्यन्ते । प्राण्यङ्गानां द्वन्द्व एकवद्भवति तथा तूर्याङ्गानां सेनाङ्गानां च । प्राण्यङ्गानां तावत्-पाणिपादम् । शिरोग्रीवम् । तूर्याङ्गानाम् - मार्दङ्गिकपाणविकम्। वीणावादकपरिवादकम्। सेनाङ्गानाम् रथिकाश्वारोहम् । रथिकपादातम् । हस्त्यश्वादिषु परत्वात्पशुद्वन्द्वे विभाषयैकवद् (२.४.१२) भवति ।

इतरेतरयोगे समाहारे च द्वन्द्वो विहितः, तत्र समाहारस्यैकत्वात्सिद्धमेवैक -वचनम्? इदं तु प्रकरणं विषयविभागार्थम् - प्राण्यङ्गादीनां समाहार एव द्वन्द्वः, दधिपयादीनामितरेतरयोग एव (२.४.१४), वृक्षमृगादीनाम् (२.४.१२) उभयत्रेति ॥

५३७. अनुवादे चरणानाम् ॥ ३ ॥ (९०७)

चरणशब्दः शाखानिमित्तकः पुरुषेषु वर्तते । चरणानां द्वन्द्व एकवद्भवति, अनुवादे गम्यमाने । प्रमाणान्तरावगतस्यार्थस्य शब्देन संकीर्त्तनम् = अनुवादः। उदगात्कठकालापम् । प्रत्यष्ठात् कठकौथुमम् (म. भा.) । कठकालापादीनामुदयप्रतिष्ठे प्रमाणान्तरावगते यदा पुनः शब्देनानूद्येते तदैवमुदाहरणम् । यदा तु प्रथमत एवोपदेशस्तदा प्रत्युदाहरणम् ।

अनुवादे इति किम्? उदगुः कठकालापाः । प्रत्यष्ठुः कठकौथुमाः॥

स्थेणोरद्यतन्यां चेति वक्तव्यम् (म. भा. २.४.३ वा. १,२ । स्थेणोरिति किम्? अनन्दिषुः कठकालापाः । अद्यतन्यामिति किम्? उद्यन्ति कठकालापाः॥

५३८. अध्वर्युक्रतुरनपुंसकम् ॥ ४ ॥ (९०८)

अध्वर्युवेदे यस्य क्रतोर्विधानं सोऽध्वर्युक्रतुः । अध्वर्युक्रतुवाचिनां शब्दानामनपुंसकलिङ्गानां द्वन्द्व एकद्भवति । अध्वर्युक्रतुरनपुंसकं द्वन्द्व इति गौणो निर्देशः। अर्काश्वमेधम् । सायाह्नातिरात्रम् ।

अध्वर्युक्रतुरिति किम्? इषुवज्रौ । उद्भिद्बलभिदौ । अनपुंसकमिति किम्? राजसूयवाजपेये। इह कस्मान्न भवति - दर्शपौर्णमासौ? क्रतुशब्दः सोमयागेषु रूढः ॥

५३९. अध्ययनतोऽविप्रकृष्टाख्यानाम् ॥ ५ ॥ (९०९)

अध्ययनेन निमित्तेन येषामविप्रकृष्टा = प्रत्यासन्ना आख्या तेषां द्वन्द्व एकवद्भवति। पदकक्रमकम् । क्रमकवार्त्तिकम् । सम्पाठः पदानां क्रमस्य च प्रत्यासन्नः ।

अध्ययनत इति किम्? पितापुत्रौ । अविप्रकृष्टाख्यानामिति किम्? याज्ञिकवैयाकरणौ ॥

५४०. जातिरप्राणिनाम् ॥ ६ ॥ (९१०)

जातिवाचिनां शब्दानां द्वन्द्व एकवद्भवति, प्राणिनो वर्जयित्वा । आराशस्त्रि । धानाशष्कुलि।

जातिरिति किम्? नन्दकपाञ्चजन्यौ । अप्राणिनामिति किम्? ब्राह्मणक्षत्रियविट्शूद्राः ।

नञिवयुक्तन्यायेन (व्या. परि. ६५) द्रव्यजातीनामयमेकद्भावः, न गुणक्रियाजातीनाम् । रूपरसगन्धस्पर्शाः । गमनाकुञ्चनप्रसारणानि । जातिपरत्वे च जातिशब्दानामयमेकवद्भावो विधीयते, न नियतद्रव्यविवक्षायाम् - इह कुण्डे बदरामलकानि तिष्ठन्तीति ॥

५४१. विशिष्टलिङ्गो नदी देशोऽग्रामाः ॥ ७ ॥ (९११)

विशिष्टलिङ्गानाम्=भिन्नलिङ्गानां नदीवाचिनां शब्दानां देशवाचिनां च ग्रामवर्जितानां द्वन्द्व एकवद्भवति । नद्यवयवो द्वन्द्वो नदीत्युच्यते । देशावयवश्च देशः। नदीदेश इत्यसमासनिर्देश एवायम् । उद्ध्यश्च इरावती च उद्ध्येरावति । गङ्गाशोणम् । देशः खल्वपि-कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रम् । कुरुकुरुजाङ्गलम्।

विशिष्टलिङ्ग इति किम्? गङ्गायमुने । मद्रकेकयाः । नदीदेश इति किम्? कुक्कुटमयूर्यौ । अग्रामा इति किम्? जाम्बवश्च शालूकिनी च जाम्बवशालूकिन्यौ।

नदीग्रहणमदेशत्वात् । जनपदो हि देशः, तथा च पर्वतानां ग्रहणं न भवति-कैलासश्च गन्धमादनं च = कैलासगन्धमादने ।

अग्रामा इत्यत्र नगराणां प्रतिषेधो वक्तव्यः (म. भा. २.४.७ वा. १) । इह मा भूत् - मथुरा च पाटलिपुत्रं च मथुरापाटलिपुत्रम् ।

उभयतश्च ग्रामाणां प्रतिषेधो वक्तव्यः (म. भा. २.४.७ वा. २) । सौर्यं च नगरम्, केतवतं च ग्रामः=सौर्यकेतवते ॥

५४२. क्षुद्रजन्तवः ॥ ८ ॥ (९१२)

अपचितपरिमाणः क्षुद्रः। क्षुद्रजन्तुवाचिनां द्वन्द्व एकद्भवति । दंशमशकम्। यूकालिक्षम्। क्षुद्रजन्तव इति किम्? ब्राह्मणक्षत्रियौ ॥

क्षुद्रजन्तुरनस्थिः स्यादथा वा क्षुद्र एव यः ॥
शतं वा प्रसृतौ येषां केचिदानकुलादपि ॥

'आ नकुलादपि' इतीयमेव स्मृतिः प्रमाणम्; इतरासां तद्विरोधात् ॥

५४३. येषां च विरोधः शाश्वतिकः ॥ ९ ॥ (९१३)

विरोधः=वैरम् । शाश्वतिकः नित्यः। येषां शाश्वतिको विरोधस्तद्वाचिनां शब्दानां द्वन्द्व एकवद्भवति । मार्जारमूषकम् । अहिनकुलम् ।

शाश्वतिक इति किम्? गौपालिशालङ्कायनाः कलहायन्ते ।

चकारः पुनरस्यैव समुच्चयार्थः । तेन पशुशकुनिद्वन्द्वे विरोधिनामनेन नित्यमेकवद्भावो भवति - अश्वमहिषम्, श्वशृगालम्, काकोलूकम् ॥

५४४. शूद्राणामनिरवसितानाम् ॥ १० ॥ (९१४)

नरवसानम्=बहिष्करणम् । कुतो बहिष्करणम् ? पात्रात् । यैर्भुक्ते पात्रं संस्कारेणापि न शुध्यति ते निरवसिताः (म. भा.) न निरवसिताः=अनिरवसिताः। अनिरवसितशूद्रवाचिनां शब्दानां द्वन्द्व एकवद्भवति । तक्षायस्कारम् । रजकतन्तुवायम्।

अनिरवसितानामिति किम्? चण्डालमृतपाः ॥

५४५. गवाश्वप्रभृतीनि च ॥ ११ । (९१५)

गवाश्वप्रभृतीनि कृतैकवद्भावानि द्वन्द्वरूपाणि साधूनि भवन्ति । गवाश्वम्, गवाविकम्, गवैडकम्, अजाविकम्, अजैडकम् । कुब्जवामनम्, कुब्जकैरातकम्, पुत्रपौत्रम् । श्वचण्डालम् । स्त्रीकुमारम्, दासीमाणवकम् । शाटीपिच्छकम् । उष्ट्रखरम्, उष्ट्रशशम् । मूत्रशकृत्, मूत्रपुरीषम्, यकृन्मेदः, मांसशोणितम् । दर्भशरम्, दर्भपूतीकम्, अर्जुनशिरीषम्, तृणोलपम् । दासीदासम्, कुटीकुटम्, भागवतीभागवतम् । गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तम् (म. भा. २.४.११ वा. १)। रूपान्तरे तु नायं विधिर्भवति - गोऽश्वम्, गोऽश्वौ । पशुद्वन्द्वविभाषैव भवति ॥

५४६. विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्य-श्ववडवपूर्वापराधरोत्तराणाम् ॥ १२ ॥ (९१६)

वृक्ष, मृग, तृण, धान्य, व्यञ्जन, पशु, शकुनि, अश्ववडव, पूर्वापर, अधरोत्तर - इत्येतेषां द्वन्द्वो विभाषैकवद्भवति । प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः । रुरुपृषतम्, रुरुपृषताः । कुशकाशम्, कुशकाशाः । व्रीहियवम्, व्रीहियवाः । दधिघृतम्, दधिघृते । गोमहिषम्, गोमहिषाः। तित्तिरिकपिञ्जलम्, तित्तिरिकपिञ्जलाः । अश्ववडवम्, अश्ववडवौ । पूर्वापरम्, पूर्वापरे । अधरोत्तरम्, अधरोत्तरे ।

बहुप्रकृतिः फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानम् (म. भा. २.४.१२ वा. १) । एषां बहुप्रकृतिरेव द्वन्द्व एकवद् भवति, न द्विप्रकृतिः । बदरामलके । रथिकाश्वारोहौ । प्लक्षन्यग्रोधौ । रुरुपृषतौ । हंसचक्रवाकौ । युकालिक्षे । व्रीहियवौ । कुशकाशौ ॥

५४७. विप्रतिषिद्धं चानधिकरणवाचि ॥ १३ ॥ (९१७)

परस्परविरुद्धं=विप्रतिषिद्धम् । विप्रतिषिद्धार्थानां शब्दानामनधिकरण-वाचिनामद्रव्यवाचिनां द्वन्द्व एकवद् भवति । विभाषानुकर्षणार्थश्चकारः। शीतोष्णम्, शीतोष्णे । सुखदुःखम्, सुखदुःखे । जीवितमरणम्, जीवितमरणे । विप्रतिषिद्धमिति किम्? कामक्रोधौ । अनधिकरणवाचीति किम्? शीतोष्णे उदके ॥

५४८. न दधिपय-आदीनि ॥ १४ ॥ (९१८)

यथायथमेकवद्भावे प्राप्ते प्रतिषेध आरभ्यते । दधिपयादीनि शब्दरूपाणि नैकवद् भवन्ति। दधिपयसी । सर्पिर्मधुनी । मधुसर्पिषी । ब्रह्मप्रजापती । शिववैश्रवणौ । स्कन्दविशाखौ । परिव्राट्कौशिकौ । प्रवर्ग्योपसदौ । शुक्लकृष्णौ। इध्माबर्हिषी । निपातनाद्दीर्घः । दीक्षातपसी ।

श्रद्धातपसी । मेधातपसी । अध्ययनतपसी । उलूखलमुसले । आद्यावसाने । श्रद्धामेधे । ऋक्सामे। वाङ्मनसे ॥

५४९. अधिकरणैतावत्त्वे च ॥ १५ ॥ (९१९)

'न' इति वर्त्तते । अधिकरणं वर्त्तिपदार्थः, स हि समासस्यार्थस्याधारः, तस्यैतावत्त्वे परिमाणे गम्यमाने द्वन्द्वो नैकवद् भवति । यथायथमेकवद्भावः प्राप्तः प्रतिषिध्यते । दश दन्तोष्ठाः । दश मार्दङ्गिकपाणविकाः ॥

५५०. विभाषा समीपे ॥ १६ ॥ (९२०)

अधिकरणैतावत्त्वस्य समीपे विभाषा द्वन्द्व एकवद्भवति । उपदशं दन्तोष्ठम्, उपदशा दन्त्तोष्ठाः । उपदशं मार्दङ्गिकपाणविकम्, उपदशा मार्दङ्गिकपाणविकाः ।

अव्ययस्य संख्याऽव्ययीभावोऽपि विहितः (२.१.६), बहुव्रीहिरपि (२.२.२५) । तत्रैकवद्भापक्षेऽव्ययीभावोऽनुप्रयुज्यते, इतरत्र बहुव्रीहिः (म. भा.)॥

५५१. स नपुंसकम् ॥ १७ ॥ (८२१)

यस्यायमेकवद्भावो विहितः स नपुंसकलिङ्गो भवति द्विगुर्द्वन्द्वश्च । पञ्चगवम्। दशगवम्। द्वन्द्वः खल्वपि - पाणिपादम् । शिरोग्रीवम् । परलिङ्गतापवादो योगः।

अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते (म.भा.२.४.३० वा.४)। पञ्चपूली । दशरथी ।

वाऽऽबन्तः स्त्रियामिष्टः (वा. ५) । पञ्चखट्वम्, पञ्चखट्वी ।

अनो नलोपश्च वा च द्विगुः स्त्रियाम् (वा. ६) । पञ्चतक्षम्, पञ्चतक्षी ।

पात्रादिभ्यः प्रतिषेधो वक्तव्यः (वा. ७) । पञ्चपात्रम् । चतुर्युगम् । त्रिभुवनम्॥

५५२. अव्ययीभावश्च ॥ १८ ॥ (६५९)

अव्ययीभावश्च समासो नपुंसकलिङ्गो भवति । अधिस्त्रि । उपकुमारि। उन्मत्तगङ्गम्। लोहितगङ्गम् । पूर्वपदार्थप्रधानस्यालिङ्गतैव प्राप्ता, अन्यपदार्थप्रधानस्याभिधेयलिङ्गता, अत इदमुच्यते । अनुक्तसमुच्चयार्थश्चकारः।

पुण्यसुदिनाभ्यामहनः क्लीबतेष्यते (म. भा. २.४.३० वा. १) । पुण्याहम्। सुदिनाहम् ।

पथः संख्याव्ययादेः क्लीबतेष्यते (म. भा. २.४.३० वा. २) त्रिपथम् । चतुष्पथम् । विपथम् । सुपथम् । क्रियाविशेषणानां च क्लीबतेष्यते । मृदु पचति। शोभनं पचति ॥

५५३. तत्पुरुषोऽनञ्कर्मधारयः ॥ १९ ॥ (८२२)

अधिकारोऽयमुत्तरसूत्रेषूपतिष्ठते । नञ्समासं कर्मधारयं च वर्जयित्वाऽन्यस्तत्पुरुषो नपुंसकलिङ्गो भवतीत्येतदधिकृतं वेदितव्यम्, यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र । वक्ष्यति-विभाषा सेनासुराच्छायाशालानिशानाम् (२.४.२५) इति । ब्राह्मणसेनम् । ब्राह्मणसेना ।

तत्पुरुष इति किम्? दृढसेनो राजा । अनञिति किम्? असेना । अकर्मधारय इति किम्? परमसेना (म. भा.) ॥

५५४. संज्ञायां कन्थोशीनरेषु ॥ २० ॥ (८२३)

संज्ञायां विषये कन्थान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति, सा चेत् कन्था उशीनरेषु भवति । सौशमिकन्थम् । आह्वरकन्थम् । संज्ञायामिति किम्? वीरणकन्था। उशीनरेष्विति किम्? दाक्षिकन्था । परवल्लिङ्गतापवाद इदं प्रकरणम् ॥

५५५. उपज्ञोपक्रमं तदाद्याचिख्यासायाम् ॥ २१ ॥ (८२४)

उपज्ञायते इत्युपज्ञा, उपक्रम्यते इत्युपक्रमः । उपज्ञा च उपक्रमश्च उपज्ञोपक्रमम्। तदन्तस्तत्पुरुषो नपुंसकलिङ्गो भवति, तदाद्याचिख्यासायां तयोरुपज्ञोपक्रमयोरादेराचिख्यासायां गम्यमानायाम् । आख्यातुमिच्छा=आचिख्यासा, यद्युपज्ञेयस्योपक्रम्यस्य चार्थस्यादिराख्यातुमिष्यते तत एतद्भवति । पाणिन्युपज्ञमकालकं व्याकरणम् । पाणिनेरुपज्ञानेन प्रथमतः प्रणीतमकालकं व्याकरणम् । व्याड्युपज्ञं दशहुष्करणम् । आद्योपक्रमं प्रासादः । नन्दोपक्रमाणि मानानि । दर्शनीयोपक्रमं सुकुमारम् ।

उपज्ञोपक्रममिति किम्? वाल्मीकिश्लोकाः । तदाद्याचिख्यासायामिति किम्? देवदत्तोपज्ञो रथः । यज्ञदत्तोपक्रमो रथः ॥

५५६. छाया बाहुल्ये ॥ २२ ॥ (८२५)

'विभाषा सेनासुराच्छायाशालानिशानाम्' (२.४.२५) इति विभाषां वक्ष्यति, नित्यार्थमिदं वचनम् । छायान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति बाहुल्ये गम्यमाने। पूर्वपदार्थधर्मः बाहुल्यम्। शलभादीनां हि बहुत्वं गम्यते । शलभच्छायम् । इक्षुच्छायम् ।

बाहुल्य इति किम्? कुड्यच्छाया ॥

५५७. सभा राजाऽमनुष्यपूर्वा ॥ २३ ॥ (८२६)

सभान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति सा चेत्सभा राजपूर्वा, अमनुष्यपूर्वा च भवति । इनसभम् । ईश्वरसभम् ।

इह कस्मान्न भवति - राजसभा? पर्यायवचनस्यैवेष्यते । तदुक्तम् - 'जितपर्यायस्यैव राजाद्यर्थम्' (वा. १०) इति । अमनुष्यपूर्वा - रक्षःसभम् । पिशाचसभम् ।

इह कस्मान्न भवति - काष्ठसभा? अमनुष्यशब्दो रूढिरूपेण रक्षःपिशाचादिष्वेव वर्त्तते। राजाऽमनुष्य पूर्वेति किम्? देवदत्तसभा ॥

५५८. अशाला च ॥ २६ ॥ (८२७)

अशाला च या सभा तदन्तस्तत्पुरुषो नपुंसकलिङ्गो भवति । संघातवचनोऽत्र सभाशब्दो गृह्यते । स्त्रीसभम् । दासीसभम् । दासीसंघात इत्यर्थः ।

अशालेति किम्? अनाथसभा । अनाथकुटीत्यर्थः ॥

५५९. विभाषा सेनासुराच्छायाशालानिशानाम् ॥ २५ ॥

सेना, सुरा, छाया, शाला, निशा-इत्येवमन्तस्तत्पुरुषो नपुंसकलिङ्गो भवति विभाषा । ब्राह्मणसेनम्, ब्राह्मणसेना । यवसुरम्, यवसुरा । कुड्यच्छायम्, कुड्यच्छाया। गोशालम्, गोशाला। श्वनिशम्, श्वनिशा ॥

५६०. परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः ॥ २६ ॥ (८१२)

समाहारद्वन्द्वे नपुंसकलिङ्गस्य विहितत्वाद् इतरेतरयोगद्वन्द्वस्येदं ग्रहणम् । परस्य यल्लिङ्गं तद् भवति द्वन्द्वस्य तत्पुरुषस्य च । उत्तरपदलिङ्गं द्वन्द्वतत्पुरुषयोर्विधीयते। कुक्कुटमयूर्याविमे, मयूरीकुक्कुटाविमौ । तत्पुरुषस्य अर्द्धं पिप्पल्याः-अर्द्धपिप्पली। अर्द्धकोशातकी। अर्द्धनखरञ्जनी ।

द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः (म. भा. वा. १) । द्विगुः- पञ्चसु कपालेषु संस्कृतः पुरोडाशः- पञ्चकपालः (४.२.१६, ४.१.८८)। प्राप्तो जीविकां - प्राप्तजीविकः । आपन्नो जीविकाम् - आपन्नजीविकः (२.२.४)। [अलंपूर्व-] अलं जीविकायै - अलञ्जीविकः । गतिसमासः- निष्क्रान्तः कौशाम्ब्याः- निष्कौशाम्बिः (वा. ९४) ॥

५६१. पूर्ववदश्ववडवौ ॥ २७ ॥ (८१३)

अश्ववडवयोर्विभाषैकवद्भावः (२.४.१२) उक्तः, तत्रैकवद्भावादन्यत्र परवल्लिङ्गतायां प्राप्तायामिदमारभ्यते । अश्ववडवयोः पूर्ववल्लिङ्गं भवति । अश्वश्च वडवा चाश्ववडवौ । अर्थातिदेशश्चायम्, न निपातनम् । तत्र द्विवचनमतन्त्रम् । वचनान्तरेऽपि पूर्ववल्लिङ्गता भवति-अश्ववडवान्, अश्ववडवैरिति ॥

५६२. हेमन्तशिशिरावहोरात्रे च च्छन्दसि ॥ २८ ॥ (३३९९)

'पूर्ववत्' इति वर्तते । हेमन्तशिशिरौ, अहोरात्रे - इत्येतयोश्छन्दसि विषये पूर्ववल्लिङ्गं भवति । हेमन्तशिशिरावृतूनां प्रीणामि (तै. सं. १.६.२.३) । अहो रात्रे इदं ब्रूमः (अथर्व. १.१६.५)। परवल्लिङ्गतापवादो योगः । अर्थातिदेशश्चायं न निपातनम्, तेन द्विवचनमतन्त्रम् । वचनान्तरेऽपि पूर्ववल्लिङ्गता भवति । पूर्वपक्षाश्चितयः, अपरपक्षाः पुरीषम्, अहोरात्राणीष्टकाः (तै. सं. ३.११.४.१) ।

छन्दसीति किम्? दुःखे हेमन्तशिशिरे । अहोरात्राविमौ पुण्यौ ॥

छन्दसि लिङ्गव्यत्यय उक्तः, तस्यैवायं प्रपञ्चः ॥

५६३. रात्राह्नाहाः पुंसि ॥ २९ ॥ (८१४)

कृतसमासान्तानां निर्देशः । रात्र, अह्न, अह - इत्येते पुंसि भाष्यन्ते । परवल्लिङ्गतया स्त्रीनपुंसकयोः प्राप्तयोरिदं वचनम् । द्विरात्रः । त्रिरात्रः । चतूरात्रः। पूर्वाह्णः । अपराह्णः । मध्याह्नः। द्व्यहः । त्र्यहः ।

अनुवाकादयः पुंसीति वक्तव्यम् (म. भा. २.४.२९ वा. १) । अनुवाकः। शंयुवाकः (आश्वा. श्रौ. १.१०.११) सूक्तवाकः (ऋ १०.८८.७) ॥

५६४. अपथं नपुंसकम् ॥ ३० ॥ (८१५)

अपथशब्दो नपुंसकलिङ्गो भवति । अपथमिदम् । अपथानि गाहते मूढः ।

इह कस्मान्न भवति - अपथो देशः, अपथा नगरी ? तत्पुरुष इति वर्तते।

५६५. अर्धर्चाः पुंसि च ॥ ३१ ॥ (८१६)

अर्धर्चादयः शब्दाः पुंसि नपुंसके च भाष्यन्ते । अर्धर्चः (तै. सं. ६.३.११.३), अर्धर्चम् (तै. सं. २.४.७.४) । गोमयः (ऋ. १०.६२.२), गोमयम् (शत. १२९.२.३) ।

शब्दरूपाश्रया चेयं द्विलिङ्गता क्वचिदर्थभेदेनापि व्यवतिष्ठते, यथा-पद्मशङ्खशब्दौ निधिवचनौ पुंल्लिङ्गौ, जलजे उभयलिङ्गौ । भूतशब्दः पिशाचे उभयलिङ्गः, क्रियाशब्दस्याभिधेयवल्लिङ्गम् । सैन्धवशब्दो लवणे उभयलिङ्गः, यौगिकस्याभिधेयवल्लिङ्गम्। सारशब्द उत्कर्षे पुल्लिङ्गः न्यायादनपेते (२.१.३८) नपुंसकम् - नैतत्सारमिति । धर्म इत्यपूर्वे पुंल्लिङ्गः, तत्साधने नपुंसकम् - तानि धर्माणि प्रथमान्यासन् (ऋ. १.१६४.४३) ।

अर्द्धर्च । गोमय । कषाय । कार्षापण । कुतप । कपाट । शङ्ख । गूथ । यूथ । ध्वज। कबन्ध । पद्म । गृह । सरक । कंस । दिवस । यूष । अन्धकार । दण्ड । कमण्डलु । मण्ड । भूत । द्वीप । द्यूत । चक्र । धर्म । कर्मन् । मोदक । शतमान । यान । नख । नखर । चरण। पुच्छ । दाडिम । हिम । रजत । सक्तु । पिधान । सार । पात्र । घृत । सैन्धव । औषध । आढक । चषक । द्रोण । खलीन । पात्रीव । षष्टिक । वार । बाण । प्रोथ । कपित्थ। शुष्क । शील । शुल्व । सीधु । कवच । रेणु । कपट । सीकर । मुसल । सुवर्ण । यूप । चमस । वर्ण । क्षीर । कर्ष । आकाश । अष्टापद । मङ्गल । निधन । निर्यास । जृम्भ । वृत्त । पुस्त । क्ष्वेडित । शृङ्ग । शृङ्खल । मधु । मूल । मूलक । शराव । शाल । वप्र । विमान । मुख । प्रग्रीव । शूल । वज्र । कर्पट । शिखर । कल्क । नाट । मस्तक । वलय । कुसुम । तृण । पङ्क । कुण्डल । किरीट । अर्बुद । अङ्कुश । तिमिर । आश्रम । भूषण । इल्कस । मुकुल । वसन्त । तडाग । पिटक । विटङ्क । माष । कोश । फलक । दिन । दैवत । पिनाक । समर । स्थाणु । अनीक । उपवास । शाक । कर्पास । चषाल । खण्ड । दर। विटप । रण । बल। मल । मृणाल । हस्त । सूत्र । ताण्डव । गाण्डीव। मण्डप । पटह। सौध । पार्श्व । शरीर । फल । छल । पुर । राष्ट्र । विश्व । अम्बर । कुट्टिम। मण्डल । ककुद । तोमर । तोरण । मञ्चक । पुङ्ख । मध्य । बाल । वल्मीक । वर्ष। वस्त्र । देह । उद्यान । उद्योग । स्नेह । स्वर । सङ्गम । निष्क । क्षेम । शूक । छत्त्र । पवित्र । यौवन । पानक । मूषिक । वल्कल । कुञ्ज । विहार । लोहित । विषाण । भवन । अरण्य। पुलिन । दृढ । आसन । ऐरावत । शूर्प। तीर्थ । लोमश । तमाल । लोह । दण्डक । शपथ । प्रतिसर । दारु । धनुष् । मान । तङ्क । वितङ्क । मव । सहस्र । ओदन। प्रवाल । शकट । अपराह्ण। नीड । शकल । अर्धर्चादिः ॥

५६६. इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ॥ ३२ ॥ (३५०)

आदेशः=कथनम्, अन्वादेशः=अनुकथनम् । इदमोऽन्वादेशविषयस्याशादेशो भवत्यनुदात्तस्तृतीयादौ विभक्तौ परतः । आभ्यां छात्राभ्यां रात्रिरधीता, अथो

आभ्यामहरप्यधीतम् । अस्मै छात्त्राय कम्बलं देहि, अथो अस्मै शाटकमपि देहि । छात्त्रस्य शोभनं शीलम्, अथो अस्य प्रभूतं स्वम् ।

अशादेशवचनं साकच्कार्थम् (म. भा.) । इमकाभ्यां छात्त्राभ्यां रात्रिरधीता, अथो आभ्यामहरप्यधीतम् ।

नेह पश्चादुच्चारणमात्रमन्वादेशः, किं तर्हि? एकस्यैवाभिधेयस्य पूर्वं शब्देन प्रतिपादितस्य द्वितीयं प्रतिपादनमन्वादेशः । तेनेह न भवति - देवदत्तं भोजय, इमं च यज्ञदत्तम् (म. भा.) इति ॥

५६७. एतदस्त्रतसोस्त्रतसौ चानुदात्तौ ॥ ३३ ॥ (१९६२)

'अन्वादेशे' अनुदात्तः इति वर्तते । एतदोऽन्वादेशविषयस्य अशादेशो भवति अनुदात्तस्त्रतसोः परतः । तौ चापि त्रतसावनुदात्तौ भवतः । एतस्मिन् ग्रामे सुखं वसामः, अथो अत्र युक्ता अधीमहे । एतस्माच्छात्त्राच्छन्दोऽधीष्व, अथो अतो व्याकरणमप्यधीष्व । सर्वानुदात्तं पदं भवति । 'एतदोऽश्' [५/३/२] इत्यशादेशे लब्धे पुनर्वचनमनुदात्तार्थम् ।

५६८. द्वितीयाटौस्स्वेनः ॥ ३४ ॥ (३५१)

'अन्वादेशे' , 'अनुदात्तः' इति वर्त्तते । द्वितीया, टा, ओस् इत्येतेषु परत इदमेतदोरन्वादेशविषययोरेनशब्द आदेशो भवति अनुदात्तः । इदमो मण्डूकप्लुतिन्यायेनानुवृत्तिः। इमं छात्त्रं छन्दोऽध्यापय, अथो एनं व्याकरणमध्यापय । अनेन छात्त्रेण रात्रिरधीता, अथो एनेनाहरप्यधीतम् । अनयोश्छात्त्रयोः शोभनं शीलम्, अथो एनयोः प्रभूतं स्वम् ।

एतदः खल्वपि - एतं छात्त्रं छन्दोऽध्यापय, अथो एनं व्याकरणमप्यध्यापय । एतेन छात्त्रेण रात्रिरधीता, अथो एनेनाहरप्यधीतम् । एतयोश्छात्त्रयोः शोभनं शीलम्, अथो एनयोः प्रभूतं स्वम् ।

एनदिति नपुंसकैकवचने वक्तव्यम् (म. भा. २.४.३४ वा. १) । प्रक्षालयैनत् । परिवर्त्तयैनत् ।

इह कस्मान्न भवति - अयं दण्डो हरानेन । एतमातं ङितं विद्यादिति? यत्र किञ्चिद् विधाय वाक्यान्तरेण पुनरन्यदुपदिश्यते सोऽन्वादेशः । इह तु वस्तुनिर्देशमात्रं कृत्वा एकमेव विधानम् ॥

५६९. आर्धधातुके ॥ ३५ ॥ (२४३२)

'आर्धधातुके' इत्यधिकारोऽयम्, 'ण्यक्षत्रियार्षञितो यूनि लुगणिञोः' (२.४.५८) इति यावत्। यदित ऊर्ध्वमनुक्रमिष्यामस्तदार्धधातुके वेदितव्यम् । वक्ष्यति - 'हनो वध लिङि ' (१.४.४२) वध्यात् । आर्धधातुक इति किम्? हन्यात् । विषयसप्तमी चेयं न परसप्तमी । तेनार्धधातुकविवक्षायामादेशेषु कृतेषु पश्चाद् यथाप्राप्तं प्रत्यया भवन्ति - भव्यम्, प्रवेयम्, आख्येयम् ॥

५७०. अदो जग्धिर्ल्यप्ति किति ॥ ३६ ॥ (३०८०)

अदो जग्धिरादेशो भवति ल्यपि परतः, तकारादौ च किति प्रत्यये । प्रजग्ध्य । विजग्ध्य । जग्धः । जग्धवान् । इकार उच्चारणार्थः, नानुबन्धः, तेन नुम्न भवति । एवं वच्यादीनामपि ।

इह कस्मान्न भवति - अन्नम्? 'अन्नाण्णः ' (४.४.८५) इति निपातनात्।

जग्धौ सिद्धेऽन्तरङ्गत्वात्ति कितीति ल्यबुच्यते ।

ज्ञापयत्यन्तरङ्गाणां ल्यपा भवति बाधनम् ॥ (म. भा. २/४/३६)

तीति किम्? अद्यते । कितीति किम्? अत्तव्यम् ॥

५७१. लुङ्सनोर्घस्लृ ॥ ३७ ॥ (२४२७)

लुङि सनि च परतोऽदो घस्लृ आदेशो भवति । लृदित्करणमङर्थम् । लुङि -अघसत् । अघसताम् । अघसन् । सनि - जिघत्सति । जिघत्सतः । जिघत्सन्ति।

घस्लृभावेऽच्युपसंख्यानम् (म. भा. २.४.३७ वा. १) । प्रात्तीति प्रघसः॥

५७२. घञपोश्च ॥ ३८ ॥ (३२३६)

घञि अपि च परतोऽदो घस्लृ आदेशो भवति । घासः । प्रघसः । 'उपसर्गेऽदः' (३.३.५९) इत्यप् ॥

५७३. बहुलं छन्दसि ॥ ३९ ॥ (३३९८)

छन्दसि विषये बहुलमदो घस्लृ आदेशो भवति । घस्तान्नूनम् (वा. सं. २१.४३) । सग्धिश्च मे (वा. सं. १८.९) । न च भवति - आत्तामद्य मध्यतो मेद उद्धृतम् (वा. सं. ११.४३)।

अन्यतरस्यांग्रहणमेव कस्मान्न क्रियते, तदेवोत्तरार्थमपि भविष्यति ? कार्यान्तरार्थं बहुलग्रहणम् । घस्तामित्यत्रोपधालोपो न भवति ॥

५७४. लिट्यन्यतरस्याम् ॥ ४० ॥ (२४२४)

लिटि परतोऽदोऽन्यतरस्यां घस्लादेशो भवति । जघास, जक्षतुः, जक्षुः । आद, आदतु, आदुः ॥

५७५. वेञो वयिः ॥ ४१ ॥ (२४११)

'लिट्यन्यतरस्याम्' इति वर्त्तते । वेञो वयिरादेशो भवति अन्यतरस्यां लिटि परतः । इकार उच्चारणार्थः । उवाय, ऊयतुः, ऊयुः । पक्षे - ऊवतुः, ऊवुः । 'लिटि वयो यः' (६.१.३८) इति यकारस्य सम्प्रसारणं प्रतिषिध्यते । 'वश्चास्यान्यतरस्यां किति' (६.१.३९) इति वकारो विधीयते । ववौ ववतुः, ववुः । 'वेञः' (६.१.४०) इति संप्रसारणं न भवति ॥

५७६. हनो वध लिङि ॥ ४२ ॥ (२४३३)

हन्तेर्धातोर्वध इत्ययमादेशो भवति लिङि परत आर्धधातुके । वध्यात्, वध्यास्ताम्, वध्यासुः । अकारान्तश्चायमादेशः, तत्राकारस्य लोपो भवति (६.४.४८)। तस्य स्थानिवद्भावाद् अवधीदिति हलन्तलक्षणा वृद्धिः (७.२.३) न भवति ॥

५७७. लुङि च ॥ ४३ ॥ (२४३४)

लुङि च परतो हनो वध इत्ययमादेशो भवति । अवधीत्, अवधिष्टाम् । अवधिषुः । योगविभाग उत्तरार्थः- आत्मनेपदेषु लुङि विकल्पो यथा स्याल्लिङि मा भूत् ॥

५७८. आत्मनेपदेष्वन्यतरस्याम् ॥ ४४ ॥ (२६९६)

पूर्वेण नित्ये प्राप्ते विकल्प उच्यते । आत्मनेपदेषु परतो हनो लुङ्यन्यतरस्यां वध इत्ययमादेशो भवति । आवधिष्ट । आवधिषाताम् । आवधिषत । न च भवति - आहत । आहसाताम् । आहसत ॥

५७९. इणो गा लुङि ॥ ४५ ॥ (२४२८)

इणः 'गा' इत्ययमादेशो भवति लुङि परतः । अगात्, अगाताम्, अगुः । 'लुङि ' इति वर्त्तमाने पुनर्लुङ्ग्रहणम् 'आत्मनेपदेष्वन्यतरस्याम्' (२.४.४४) इत्येतन्मा भूत् । इह त्वविशेषेण नित्यं च भवति । अगात् । अगायि भवता ।

इण्वदिक इति वक्तव्यम् (म. भा. २.४.४५१) अध्यगात् । अध्यगाताम् । अध्यगुः ॥

५८०. णौ गमिरबोधने ॥ ४६ ॥ (२६०७)

णौ परत इणोऽबोधनार्थस्य गमिरादेशो भवति । इकार उच्चारणार्थः । गमयति, गमयतः, गमयन्ति । अबोधने इति किम्? प्रत्याययति । इण्वदिकः (वा. १६७) इत्येव - अधिगमयति ॥

५८१. सनि च ॥ ४७ ॥ (२६१५)

सनि परत इणोऽबोधनार्थस्य गमिरादेशो भवति । जिगमिषति, जिगमिषतः, जिगमिषन्ति । अबोधन इत्येव - अर्थान्प्रतीषिषति । इण्वदिक इत्येव - अधिजिगमिषति । योगविभाग उत्तरार्थः - 'इङश्च' (१.४.४८) इति सन्येव यथा स्यात् ॥

५८२. इङश्च ॥ ४८ ॥ (१६१६)

इङश्च सनि परतो गमिरादेशो भवति । अधिजिगांसते, अधिजिगांसेते, अधिजिगांसन्ते॥

५८३. गाङ् लिटि ॥ ४९ ॥ (२४५९)

गाङादेशो भवतीङो लिटि परतः । अधिजगे, अधिजगाते, अधिजगिरे । गाङोऽनुबन्धकरणं विशेषणार्थम् 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' (१.२.१) इत्यत्रास्य ग्रहणं यथा स्यात्। न हि स्थानिवद्भावेन 'गाङ्' इति रूपं लभ्यते ॥

५८४. विभाषा लुङ्लृङोः ॥ ५० ॥ (२४६०)

लुङि लृङि च परत इङो विभाषा गाङादेशो भवति । आदेशपक्षे 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' (१.२.१) इति ङित्वम्, 'घुमास्थागापाजहातिसां हलि' (६.४.६६) इतीत्वम् । अध्यगीष्ट, अध्यगीषाताम्, अध्यगीषत । न च भवति - अध्यैष्ट, अध्यैषाताम्, अध्यैषत । लृङि खल्वपि - अध्यगीष्यत, अध्यगीष्येताम्, अध्यगीष्यन्त । न च भवति - अध्यैष्यत, अध्यैष्येताम्, अध्यैष्यन्त ॥

५८५. णौ च संश्चङो ॥ ५१ ॥ (२६०१)

'इङो गाङ् विभाषा' इति वर्त्तते । 'णौ' इतीङपेक्षया परसप्तमी, संश्चङोः इति च ण्यपेक्षया। णौ सन्परे चङ्परे च परत इङो विभाषा गाङादेशो भवति । अधिजिगापयिषति । न च भवति - अध्यापिपयिषति । चङि खल्वपि - अध्यजीगपत् [न च भवति -] अध्यापिपत् ॥

५८६. अस्तेर्भूः ॥ ५२ ॥ (२४७०)

अस्तेर्धातोर्भू इत्ययमादेशो भवति आर्धधातुके । भविता । भवितुम् । भवितव्यम् ।

इह कस्मान्न भवति - ईहामास, ईहामासतुः, ईहामासुः? कृञ्चानुप्रयुज्यते लिटि' (३.१.४०) इति प्रत्याहारग्रहणेनास्तेर्ग्रहणसामर्थ्यात् । तथा चोच्यते -

'अनुप्रयोगे तु भुवाऽस्त्यबाधनं स्मरन्ति कर्तुर्वचनान्मनीषिणः' ॥ इति ॥

५८७. ब्रुवो वचिः ॥ ५३ ॥ (२४५३)

ब्रुवो वचिरादेशो भवति आर्धधातुकविषये । इकार उच्चारणार्थः । वक्ता । वक्तुम् । वक्तव्यम्, स्थानिवद्भावेन कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदं भवति। ऊचे । वक्ष्यते ॥

४८८. चक्षिङः ख्याञ् ॥ ५४ ॥ (२४३६)

चक्षिङः ख्याञादेशो भवत्यर्धधातुके । आख्याता । आख्यातुम् । आख्यातव्यम्। स्थानिवद्भावेन नित्यमात्मनेपदं न भवति; ञकारानुबन्धकरणसामर्थ्यात् । आख्यास्यति। आख्यास्यते ।

क्शादिरप्ययमादेश इष्यते (?) । आक्शाता । आक्शातुम् । आक्शातव्यम्।

वर्जने प्रतिषेधो वक्तव्यः (म. भा. २.४.५४ वा. ९) । दुर्जनाः संचक्ष्याः। वर्जनीया इत्यर्थः।

असनयोश्च प्रतिषेधो वक्तव्यः (वा.१०) नृचक्षा रक्षः (अथ ८.३.१०) हिंसार्थोऽत्र धातुः । अनेः खल्वपि विचक्षणः पण्डितः । बहुलं संज्ञाछन्दसोरिति वक्तव्यम् (वा. ११)

अन्नवधकगात्रविचक्षणाजिराद्यर्थम् ॥

५८९. वा लिटि ॥ ५५ ॥ (२४३७)

पूर्वेण नित्ये प्राप्ते विकल्प उच्यते । लिटि परतश्चक्षिङः ख्याञादेशो वा भवति । आचख्यौ, आचख्यतुः, आचख्युः । न च भवति - आचचक्षे आचचक्षाते, आचचक्षिरे ॥

५९०. अजेर्व्यघञपोः ॥ ५६ ॥ (२२९२)

अजेर्धातोः 'वी' इत्ययमादेशो भवत्यार्धधातुके परतो घञपौ वर्जयित्वा । प्रवयणीयः (३.१.९६) । प्रवायकः (३.१.१३३) । अघञपोरिति किम्? समाजः। उदाजः (३.३.१८) । अपि तु - समजः। उदजः । 'समुदोरजः पशुषु' (३.३.६९) इत्यप् । दीर्घोच्चारणं किम्? प्रवीताः ॥ घञपोः

प्रतिषेधे क्यप उपसंख्यानं कर्तव्यम् (म. भा. २.४.५६ वा. १) समज्या (३.३.९९) । वलादावार्धधातुके विकल्प इष्यते (?) प्रवेता, प्राजिता । प्रवेतुम्, प्राजितुम्(म. भा.) ॥

५९१. वा यौ ॥ ५७ ॥ (३२९२)

पूर्वेण नित्ये प्राप्ते विकल्प उच्यते । 'यु' इति ल्युटो ग्रहणम् । यौ परभूते अजेर्वा 'वी' इत्ययमादेशो भवति । प्रवयणो दण्डः, प्राजनो दण्डः । प्रवयणमानय, प्राजनमानय ॥

५९२. ण्यक्षत्त्रियार्षञितो यूनि लुगणिञोः ॥ ५८ ॥ (१२७६)

ण्यादयो गोत्रप्रत्ययाः । ण्यन्तात् क्षत्त्रियगोत्राद् आर्षाद् ञितश्च परयोरणिञोर्यूनि लुग्भवति । ण्यन्तात्तावत् - 'कुर्वादिभ्यो ण्यः' (४.१.१५१), तस्माद्यूनि इञ् (४.१.९५), तस्य लुक्। कौरव्यः पिता । कौरव्यः पुत्रः ।

ननु च कौरव्यशब्दस्तिकादिषु पठ्यते, ततः फिञा भवितव्यम् - कौरव्यायणिरिति? क्षत्त्रियगोत्रस्य तत्र ग्रहणम् 'कुरुनादिभ्यो ण्यः' (४.१.१७२) इत्यनेन विहितस्य; इदं तु ब्राह्मणगोत्रम्, 'कुर्वादिभ्यो ण्यः' (४.१.१५१) इति ण्यः। क्षत्त्रिय - 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' (४.१.११४) इत्यण्, तस्माद्यूनि इञ्, तस्य लुक् । श्वाफल्कः पिता। श्वाफल्कः पुत्रः । आर्ष - ऋष्यण् (४.१.११), तस्माद्यूनि इञ, तस्य लुक् । वासिष्ठः पिता। वासिष्ठः पुत्रः ।

ञित् - 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्' (४.१.१०४), तस्माद्यूनि इञ्, तस्य लुक् । बैदः पिता । बैदः पुत्रः । अणः खल्वपि - तिकादिभ्यः फिञ् (४.१.१५४) तस्माद्यूनि 'प्राग्दीव्यतोऽण्' (४.१.८३), तस्य लुक् । तैकायनिः पिता । तैकायनिः पुत्रः ।

एतेभ्य इति किम्? 'शिवादिभ्योऽण्' (३.१.११२) तस्माद् यूनि 'अत इञ्' (४.१.९५), तस्य न लुग्भवति । कौहडः पिता । कौहडिः पुत्रः ।

यूनीति किम्? वामरथ्यस्य छात्त्राः वामरथाः । 'कुर्वादिभ्यो ण्यः' (४.१.१५१) इति ण्यः, तस्मात् 'कण्वादिभ्यो गोत्रे' (४.२.१११) इति शैषिकोऽण् तस्य लुग् न भवति । अणिञोरिति किम्? दाक्षेरपत्यं युवा दाक्षायणः ।

अब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानम् (म. भा. २.४.५८ वा. ३) । बौधिः पिता । बौधिः पुत्रः । जाबालिः पिता । जाबालिः पुत्रः । औदुम्बरिः पिता। औदुम्बरिः पुत्रः (म. भा.) । भाण्डीजङ्घिः पिता । भाण्डीजङ्घिः पुत्रः । साल्वा - वयवलक्षण इञ् (४.१.१७३) तस्मात्फक्, (४.१.१०१), तस्य लुक् । पैलादिदर्शनात् सिद्धम् ॥

५९३. पैलादिभ्यश्च ॥ ५९ ॥ (१०८४)

'पैल' इत्येवमादिभ्यश्च युवप्रत्ययस्य लुग् भवति । 'पीलाया वा' (४.१.११८) इत्यण् । तस्माद् 'अणो द्व्यचः' (४.१.१५६) इति फिञ्, तस्य लुक् । पैलः पिता । पैलः पुत्रः । अन्ये पैलादय इञन्ता, तेभ्यः 'इञः प्राचाम्' (१.४.६०) इति लुकि सिद्धेऽप्रागर्थः पाठः । पैल । शालङ्कि । सात्यकि । सात्यकामि । दैवि । औदमज्जि । औदव्रजि । औदमेधि । औदबुद्धि । दैवस्थानि । पैङ्गलायनि । राणायनि । रौहक्षिति । भौलिङ्गि । औद्गाहमानि । औज्जिहानि॥ तद्राजाच्चाणः (ग. सू. २१) । आकृतिगणोऽयम् ॥

४९४. इञः प्राचाम् ॥ ६० ॥ (१०८५)

गोत्रे य इञ् तदन्ताद्युवप्रत्ययस्य लुग् भवति । गोत्रविशेषणं प्राग्ग्रहणम्, न विकल्पार्थम्। पान्नागारेरपत्यं युवा । 'यञिञोश्च' (४.१.१०१) इति फक्, तस्य लुक् । पान्नागारिः पिता । पान्नागारिः पुत्रः । मान्थरैषणिः पिता । मान्थरैषणिः पुत्रः । प्राचामिति किम्? दाक्षिः पिता । दाक्षायणः पुत्रः ॥

५९५. न तौल्वलिभ्यः ॥ ६१ ॥ (१०८६)

अनन्तरेण प्राप्तो लुक् प्रतिषिध्यते । तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य न लुग्भवति। तौल्वलिः पिता । तौल्वलायनः पुत्रः । तौल्वलि । धारणि । रावणि । पारणि । दैलीपि । दैवलि । दैवमित्रि । दैवयज्ञि । प्रावाहणि । मान्धातकि । आनुहारति । श्वाफल्कि । आनुमति। आहिंसि । आसुरि । आयुधि । नैमिषि । आसिबन्धकि । बैकि । आन्तरहाति । पौष्करसादि । वैरकि । वैलकि । वैहति । वैकर्णि । कारेणुपालि । कामालि ॥

५९६. तद्राजस्य बहुषु तेनैवास्त्रियाम् ॥ ६२ ॥ (११९३)

'ते तद्राजाः' (४.१.१७२) 'ञ्यादयस्तद्राजा' (४.३.११९) इति वक्ष्यति, तस्य तद्राजसंज्ञस्य प्रत्ययस्य बहुषु वर्त्तमानस्यास्त्रीलिङ्गस्य लुग्भवति, तेनैव चेत्तद्राजेन कृतं बहुत्वं भवति । अङ्गाः । वङ्गाः । पुण्ड्राः । सुह्माः । मगधाः (४.१.१७१) लोहध्वजाः । व्रीहिमन्तः (५.३.१११)।

तद्राजस्येति किम्? औपगवाः । बहुष्विति किम्? आङ्गः । 'तैनैव' ग्रहणं किम्? प्रियो वाङ्गो येषां त इमे प्रियवाङ्गा (म. भा.) । अस्त्रियामिति किम्? आङ्ग्यः स्त्रियः (म. भा.) ॥

५९७. यस्कादिभ्यो गोत्रे ॥ ६३ ॥ (११४६)

'बहुषु तेनैवास्त्रियाम्' इति सर्वमनुवर्तते । 'यस्क' इत्येवमादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु वर्त्तमानस्यास्त्रीलिङ्गस्य लुग्भवति, तेनैव चेद् गोत्रप्रत्ययेन कृतं बहुत्वं भवति । प्रत्ययविधेश्चान्यत्र लौकिकस्य गोत्रस्य ग्रहणमित्यनन्तरापत्येऽपि लुग्भत्येव - यस्काः । लभ्याः। बहुष्वित्येव -यास्कः । तेनैवेत्येव प्रिययास्कः। अस्त्रियामित्येव - यास्क्यः स्त्रियः ।

गोत्रे इति किम्? यास्काश्छात्राः ।

यस्क । लभ्य । दुह्य । अयःस्थूण । तृणकर्ण । एते पञ्च शिवादिषु पठ्यन्ते। ततः परेभ्यः षड्भ्य इञ् । सदामत्त । कम्बलभार । बहिर्योग । कर्णाटक । पिण्डीजङ्घ । बकसक्थ। ततः परेभ्यश्चतुर्भ्यः 'गृष्ट्यादिभ्यश्च' (४.१.१६३) इति ढञ् । बस्ति । कुद्रि । अजबस्ति । मित्रयु। ततः परेभ्यो द्वादशभ्य इञ् । रक्षोमुख। जङ्घारथ । मन्थक । उत्कास । कटुक । मन्थक । पुष्करसत् । विषपुट । उपरिमेखल । क्रोष्टुमान् । क्रोष्टुपाद । शीर्षमाय । पुष्करसच्छब्दाद् बाह्वादिपाठादिञ् । खरपशब्दो नडादिषु पठ्यते, ततः फक् । पदक, वर्मक - 'एताभ्याम् अत इञ्' (४.१.९२) । भलन्दनशब्दात् 'शिवादिभ्योऽण्' (४.१.११२)। भडिल । भण्डिल। भडित । भण्डित - एतेभ्यश्चतुर्भ्यः 'अश्वादिभ्यः फिञ्' (४.१.११०) ॥

४९८. यञञोश्च ॥ ६४ ॥ (११०८)

'बहुषु तेनैवास्त्रियाम्' (२.४.६२) 'गोत्रे' (२.४.६३) इति चानुवर्तते । यञोऽञश्च गोत्रप्रत्ययस्य बहुषु वर्तमानस्यास्त्रिलिङ्गस्य लुग्भवति । 'गर्गादिभ्यो यञ्' , (४.१.१०५) गर्गाः । वत्साः । अजः खल्वपि- 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्' (४.१.१०४) बिदाः, उर्वाः । बहुष्वित्येव - गाग्र्यः । बैदः । तेनैवेत्येव-प्रियगाग्र्याः। प्रियबैदाः । अस्त्रियामित्येव - गाग्र्यः स्त्रियः । बैद्यः स्त्रियः । गोत्र इत्येव - 'द्वीपादनुसमुद्रं यञ्', (४.३.१०) द्वैप्याः । 'उत्सादिभ्योऽञ्', (४.१.८६) औत्साश्छात्राः । यञादीनामेकद्वयोर्वा तत्पुरुषे षष्ठ्या उपसंख्यानम् (म.भा) गाग्र्यस्य कुलं गाग्र्यकुलम्, गर्गकुलं वा । गाग्र्ययोः कुलं गाग्र्यकुलम्, गर्गकुलं वा । एवं बैदस्य कुलं बैदकुलम्, बिदकुलं वा, बैदयोः कुलं बैदकुलम्, बिदकुलं वा ।

यञादीनामिति किम्? आङ्गकुलम्। एकद्वयोरिति किम्? गर्गाणां कुलं गर्गकुलम्। तत्पुरुष इति किम्? गाग्र्यस्य समीपमुपगाग्र्यम् । षष्ठ्या इति किम्? परमगाग्र्यः (म. भा.)॥

५९९. अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च ॥ ६५ ॥ (११४७)

अत्र्यादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु लुग्भवति । अत्रिशब्दात् 'इतश्चानिञः' (४.१.१२२) इति ढक् । इतरेभ्य ऋष्यण् (४.१.११४) । अत्रयः । भृगवः । कुत्साः । वसिष्ठाः ।

गोतमाः । अङ्गिरसः । बहुष्वित्येव - आत्रेयः, भार्गवः । तेनैवेत्येव - प्रियात्रेयाः । प्रियभार्गवाः। अस्त्रियामिति किम्? आत्रेय्यः स्त्रियः॥

६००. बह्वच इञः प्राच्यभरतेषु ॥ ६६ ॥ (११४८)

बह्वचः प्रातिपदिकाद् य इञ् विहितः प्राच्यगोत्रे भरतगोत्रे च वर्तते, तस्य बहुषु लुग्भवति। पन्नागाराः । मन्थरैषणाः (४.१.९५) । भरतेषु खल्वपि - युधिष्ठिराः । अर्जुनाः (४.१.९६) । बह्वच इति किम्? वैकयः । पौष्पयः । प्राच्यभरतेष्विति किम्? बालाकयः (४.१.९६) । हास्तिदासयः (४.१.९५) । भरताः प्राच्या एव, तेषां पुनर्ग्रहणं ज्ञापनार्थम् - अन्यत्र प्राग्ग्रहणे भरतग्रहणं न भवतीति, तेन 'इञः प्राचाम्' (२.४.६०) इति भरतानां युवप्रत्ययस्य लुग्न भवति। आर्जुनिः पिता । आर्जुनायनः (४.१.१०१) पुत्रः ॥

६०१. न गोपवनादिभ्यः ॥ ६७ ॥ (११४९)

गोपवनादिभ्यः परस्य प्रत्ययस्य लुग्न भवति । बिदाद्यन्तर्गणोऽयम् । ततोऽञो (४.१.१०४) गोत्रप्रत्ययस्य 'यञञोश्च' (२.४.६४) इति लुक् प्राप्तः प्रतिषिध्यते। गौपवनाः । शैग्रवाः।

गोपवन । शिग्रु । बिन्दु । भाजन । अश्व । अवतान । श्यामाक । श्वापर्ण । एतावन्त एवाष्टौ गोपवनादयः । परिशिष्टानां हरितादीनां प्रमादपाठः । ते हि चतुर्थे बिदादिषु (४.१.१०४) पठ्यन्ते । तेभ्यश्च बहुषु लुग्भवत्येव - हरिताः, किंदासा इति ॥

६०२. तिककितवादिभ्यो द्वन्द्वे ॥ ६८ ॥ (११५०)

तिकादिभ्यः कितवादिभ्यश्च द्वन्द्वे गोत्रप्रत्ययस्य बहुषु लुग्भवति । तैकायनयश्च कैतवायनयश्च - 'तिकादिभ्यः फिञ्' (४.१.१५४), तस्य लुक्, तिकाकितवाः बाड्खरयश्च भाण्डीरथयश्च - 'अत इञ्' (४.१.९५) तस्य लुक् बड्खरभण्डीरथाः । औपकायनाश्च लामकायनाश्च - 'नडादिभ्यः फक्' (४.१.९९) तस्य लुक्, उपकलमकाः । पाफकयश्च नारकयश्च - 'अत इञ्' , (४.१.९५) तस्य लुक्, पफकनरकाः । वाकनखयश्च श्वागुदपरिणद्धयश्च - 'अत इञ्' (४.१.९५) तस्य लुक्, वकनखश्वगुदपरिणद्धाः । उजाशब्दात् अत इञ् (४.१.९५), ककुभशब्दात् 'शिवादिभ्योऽण् (४.१.११२) तयोर्लुक् औब्जयश्च काकुभाश्च उब्जककुभाः । लाङ्कयश्च शान्तमुखयश्च - अत इञ्, (४.१.५९) तस्य लुक्, लङ्कशान्तमुखाः । उरस् शब्दस्तिकादिषु पठ्यते, ततः फिञ्, लङ्कटशब्दादिञ्, तयोर्लुक्, औरसायनयश्च लाङ्कटयश्च उरसलङ्कटाः । भ्राष्टकयश्च - कापिष्टलयश्च 'अत इञ्' (४.१.५९), तस्य लुक्

भ्रष्टककपिष्ठलाः। कार्ष्णाजिनयश्च कार्ष्णासुन्दरयश्च - 'अत इञ्' (४.१.५९), तस्य लुक्, कृष्णाजिनकृष्णसुन्दराः । आग्निवेश्यश्च दासेरकयश्च - अग्निवेशशब्दाद् 'गर्गादिभ्यो यञ्' (४.१.१०५), दासेरकशब्दाद् 'अत इञ्' (४.१.५९), तयोर्लुक्, अग्निवेशदासेरकाः ॥

६०३. उपकादिभ्योऽन्यतरस्यामद्वन्द्वे ॥ ६९ ॥ (११५१)

'उपक' इत्येवमादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु लुग्भवति, अन्यतरस्यां द्वन्द्वे चाद्वन्द्वे च । अद्वन्द्वग्रहणं द्वन्द्वाधिकारनिवृत्त्यर्थम् (म. भा.) । एतेषां च मध्ये त्रयो द्वन्द्वास्तिककितवादिषु पठ्यन्ते - उपकलमकाः, भ्रष्टककपिष्ठलाः, कृष्णाजिनकृष्णसुन्दरा इति । तेषां पूर्वेण नित्यमेव लुग्भवति । अद्वन्द्वे त्वनेन विकल्पः-उपकाः, औपकायनाः । लमकाः, लामकायनाः । भ्रष्टकाः, भ्राष्टकयः। कपिष्ठलाः, कापिष्ठलयः । कृष्णाजिनाः, कार्ष्णाजिनयः । कृष्णसुन्दराः, कार्ष्णसुन्दरय इति । परिशिष्टानां च द्वन्द्वेऽद्वन्द्वे च विकल्प इति । पण्डारक । अण्डारक । गडुक। सुपर्यक । सुपिष्ठ । मयूरकर्ण । खारीजङ्घ । शलावल । पतञ्जल । कण्ठेरणि । कुषीतक । कशकृत्स्न । निदाघ । कलशीकण्ठ । दामकण्ठ । कृष्णपिङ्गल । कर्णक । पर्णक । जटिलक । वधिरक । जन्तुक । अनुलोम । अर्द्धपिङ्गलक । प्रतिलोम । प्रतान । अनभिहित ॥

६०४. आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् ॥ ७० ॥ (११५२)

आगस्त्यकौण्डिन्ययोर्गोत्रप्रत्ययोरणो यञश्च बहुषु लुग्भवति, परिशिष्टस्य च प्रकृतिभागस्य यथासंख्यमगस्ति, कुण्डिनच्-इत्येतावादेशौ भवतः । अगस्तयः। कुण्डिनाः । चकारः स्वरार्थः । मध्योदात्तो हि कुण्डिनीशब्दस्तदादेशोऽपि तथा स्यात् । अगस्त्यशब्दादृष्यण् (४.१.११४), कुण्डिनशब्दाद् 'गर्गादित्वाद्यञ्' (४.१.१०५), तयोः 'गोत्रेऽलुगचि' (४.१.८९) इति लुकि प्रतिषिद्धे आगस्तीयाश्छात्त्रा इति वृद्धलक्षणश्छो (४.२.११४) भवति । कौण्डिन्ये त्वणैव भवितव्यम्-'कण्वादिभ्यो गोत्रे' (४.२.१११) इति, तत्र विशेषो नास्ति - कौण्डिनाश्छात्त्राः ॥

६०५. सुपो धातुप्रातिपदिकयोः ॥ ७१ ॥ (६५०)

सुपो विभक्तेर्धातुसंज्ञायाः प्रातिपदिकसंज्ञायाश्च लुग्भवति । 'तदन्तर्गतास्तद्ग्रहणेन गृह्यन्ते' (परि. ९०) । धातोस्तावत् - पुत्रीयति । घटीयति (३.१.३२) । प्रातिपदिकस्य - कष्टश्रितः । राजपुरुषः (१.२.४६)। धातुप्रातिपदिकयोरिति किम्? वृक्षः । प्लक्षः (१.२.४५) ॥

६०६. अदिप्रभृतिभ्यः शपः ॥ ७२ ॥ (२४२३)

अदिप्रभृतिभ्य उत्तरस्य शपो लुग्भवति । अत्ति । हन्ति । द्वेष्टि ॥

६०७. बहुलं छन्दसि ॥ ७३ ॥ (३४००)

छन्दसि विषये शपो बहुलं लुग्भवति । अदिप्रभृतिभ्य उक्तस्ततो न भवत्यपि - 'वृत्रं हनति' (ऋ. ८.८९.३) 'अहिः शयते' (ऋ. १.३२.५) । अन्येभ्यश्च भवति - 'त्राध्वं नो देवाः' (ऋ. २.२९.६) ॥

६०८. यङोऽचि च ॥ ७४ ॥ (२६५०)

यङो लुग्भवति अचि प्रत्यये परतः । चकारेण बहुलग्रहणमनुकृष्यते, न तु छन्दसीति, तेन छन्दसि भाषायां च यङो लुग्भवति । लोलुवः । पोपुवः । सनीस्रंसः । दनीध्वंसः (३.१.१३४)। बहुलग्रहणादनच्यपि भवति - शाकुनिको लालपीति । दुन्दुभिर्वावदीति (७.३.९४)॥

६०९. जुहोत्यादिभ्यः श्लुः ॥ ७५ ॥ (२४८९)

शबनुवर्तते, न यङ् । जुहोत्यादिभ्य उत्तरस्य शपः श्लुर्भवति । लुकि प्रकृते श्लुविधानं द्विर्वचनार्थम् (६.१.१०) । जुहोति । बिभर्ति । नेनेक्ति ॥

६१०. बहुलं छन्दसि ॥ ७६ ॥ (३४०१)

छन्दसि विषये बहुलं शपः श्लुर्भवति । यत्रोक्तं तत्र न भवति, अन्यत्रापि भवति । जुहोत्यादिभ्यस्तावन्न भवति 'दाति प्रियाणि' (ऋ. ४ ८ ३) 'धाति देवम्' (ऋ. ७.९०.३) । अन्येभ्यश्च भवति - पूर्णा विवष्टि (ऋ. ७.१६.११) । जनिमा विवक्ति (ऋ. ९.९७.७) ॥

६११. गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ॥ ७७ ॥ (२२२३)

लुगनुवर्त्तते, न श्लुः । गाति, स्था, घु, पा, भू - इत्येतेभ्यः परस्य सिचो लुग्भवति परस्मैपदेषु परतः । अगात् । अस्थात् । घु - अदात्, अधात् । अपात् । अभूत् ॥ गापोर्ग्रहणे इण्पिबत्योर्ग्रहणम् (म. भा. २.४.७७ वा. १) । गायतेः पातेश्च न भवति - अगासीन्नटः (म. भा.) । अपासीन्नृपः ।

परस्मैपदेष्विति किम्? अगासातां ग्रामौ देवदत्तेन ॥

६१२. विभाषा घ्राधेट्शाच्छासः ॥ ७८ ॥ (२३७६)

घ्रा, धेट्, शा, छा, सा - इत्येतेभ्य उत्तरस्य सिचः परस्मैपदेषु विभाषा लुग्भवति । धेटः पूर्वेण प्राप्ते विभाषार्थं वचनम्, परिशिष्टानामप्राप्ते । अघ्रात्, अघ्रासीत् । अधात्, अधासीत् । अशात्, अशासीत् । अच्छात्, अच्छासीत् । असात्, असासीत् । परस्मैपदेष्वित्येव - अघ्रासातां सुमनसौ देवदत्तेन ॥

६१३. तनादिभ्यस्तथासोः ॥ ७९ ॥ (२५४७)

तनादिभ्य उत्तरस्य सिचस्तथासोः परतो विभाषा लुग्भवति । अतत, अतथाः। अतनिष्ट, अतनिष्ठाः । असात्, असाथाः । असनिष्ट, असनिष्ठाः । 'जनसनखनां सञ्झलोः' (६.४.४२) इत्यात्वम् । थासा साहचर्यादात्मनेपदस्य तशब्दस्य ग्रहणम् परस्मैपदे न भवति अतनिष्ट यूयम् (म. भा.) ॥

६१४. मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः ॥ ८० ॥ (६४०२)

मन्त्रविषये घस, ह्वर, णश, वृ, दह, आत्, वृच्, कृ, गमि, जनि इत्येतेभ्य उत्तरस्य लेर्लुग्भवति । घस - ऊक्षन् पितरोऽमीमदन्त पितरः (तै. सं. १.८.५.३).। ह्वरेति 'ह्वृ कौटिल्ये' (धा. पा. ९३१) - मा ह्वर्मित्रस्य त्वा । णश - धूर्तिः प्रणङ् मर्त्यस्य (ऋ. १, १८.३) वृ इति वृङ्वृञोः (धा. पा. १५१०. १२५५) सामान्येन ग्रहणम् - 'सुरुचो वे न आवः' (वा. स. १३.३)। दह - मा न आ धक् (ऋ. ६.६१.१४) आदिति आकारान्तग्रहणम् - 'प्रा पूरणे' (धा. पा. १०६१) । आप्रा द्यावापृथिवी अन्तरिक्षम् (ऋ. १. ११५. १)। वृच् - मा नो अस्मिन्महाधने परावर्क् भारभृद्यथा (ऋ. ८.५.१२) । कृ - अक्रन् कर्म कर्मकृतः (तै. स. १.८.३.३) । गमि - सद्यः पुष्टिं निरुन्धानासो अग्मन् (ऋ० १.१३२.७).। जनि - 'अज्ञत वा अस्य दन्ताः' (ऐ. ब्रा. ७.२४.२ पृ. ११४८)। ब्राह्मणे प्रयोगोऽयम् । मन्त्रग्रहणं तु छन्दस उपलक्षणार्थम् ॥

६१५. आमः ॥ ८१ ॥ (२२३८)

आमः परस्य लेर्लुग् भवति । ईहाँचक्रे । ऊहाँचक्रे । ईक्षांचक्रे ॥

६१६. अव्ययादाप्सुपः ॥ ८२ ॥ (४५२)

अव्ययादुत्तरस्यापः सुपश्च लुग्भवति । तत्र शालायाम् । यत्र शालायाम् । सुपः खल्वपि - कृत्वा । ह्रत्वा ॥

६१७. नाव्ययीभावादतोऽम्त्वपञ्चम्याः ॥ ८३ ॥ (६५७)

पूर्वेण लुक् प्राप्तः प्रतिषिध्यते । अदन्तादव्ययीभावादुत्तरस्य सुपो न लुग्भवति, अमादेशस्तु तस्य सुपो भवत्यपञ्चम्याः । एतस्मिन् प्रतिषिद्धे पञ्चम्याः श्रवणमेव भवति । उपकुम्भं तिष्ठति । उपकुम्भं पश्य । उपमणिकं तिष्ठति । उपमणिकं पश्य । अत इति किम्? अधिस्त्रि । अधिकुमारि । अपञ्चम्या इति किम्? उपकुम्भादानय ॥

६१८. तृतीयासप्तम्योर्बहुलम् ॥ ८४ ॥ (६५८)

पूर्वेण नित्यमम्भावे प्राप्ते वचनमिदम् । तृतीयासप्तम्योर्विभक्त्योर्बहुलमम्भावो भवति, अव्ययीभावे । उपकुम्भेन कृतम्, उपकुम्भं कृतम् । उपकुम्भे निधेहि, उपकुम्भं निधेहि ।

सप्तम्या ऋद्धिनदीसमाससंख्यावयवेभ्यो नित्यममिति वक्तव्यम् (म. भा. २.४.८४ वा. १)। सुमद्रम् । सुमगधम् । उन्मत्तगङ्गम् । लोहितगङ्गम् । एकविंशतिभारद्वाजम् (म. भा.) बहुलवचनात्सिद्धम् ॥

६१९. लुटः प्रथमस्य डारौरसः ॥ ८५ ॥ (२१८८)

लुडादेशस्य प्रथमपुरुषस्य परस्मैपदस्यात्मनेपदस्य च यथाक्रमं डा, रौ रस् - इत्येते आदेशा भवन्ति । कर्त्ता । कर्त्तारौ । कर्त्तारः । आत्मनेपदस्य - अध्येता । अध्येतारौ । अध्येतारः ।

प्रथमस्येति किम्? श्वः कर्त्तासि, श्वोऽध्येतासे ॥

॥ इति श्रीजयादित्यविरचितायां काशिकावृत्तौ द्वितीयाध्यायस्य चतुर्थः पादः ॥४॥

॥ समाप्तश्चायं द्वितीयोऽध्यायः ॥